॥रा०वा०आ० ॥१॥

श्रीगणेशायनमः॥प्रविश्यतुमहारण्यंदंडकारण्यमात्मवान्॥ददर्शरामोदुर्द्धर्षस्तापसाश्रममंडलं॥१॥कुशचीरपरि
क्षिप्तंब्राह्म्यालक्ष्म्यासमावृतं॥यथाप्रदीप्तंदुर्द्दर्षंगगनेसूर्यमंडलं॥२॥शरण्यंसर्वभूतानांसुसंमृष्टाजिरंसदा॥मृगैर्बहुभि
राकीर्णंपक्षिसंघैःसमावृतं॥३॥पूजितंचोपनृत्तंचनित्यमप्सरसांगणैः॥विशालैरग्निशरणैःस्रुग्भांडैरजिनैःकुशैः॥४॥समि
द्भिस्तोयकलशैःफलमूलैश्चशोभितं॥आरण्यैश्चमहावृक्षैःपुण्यैःस्वादुफलैर्वृतं॥५॥बलिहोमार्चितंपुण्यंब्रह्मघोषानुनादि
तं॥पुष्पैर्वन्यैःपरिक्षिप्तंपद्मिन्याचसपद्मया॥६॥फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनांबरैः॥सूर्यवैश्वानराभैश्चपुराणैर्मुनि
भिर्वृतं॥७॥पुण्यैश्चनियताहारैःशोभितंपरमर्षिभिः॥तद्ब्रह्मभवनप्रख्यंब्रह्मघोषनिनादितं॥८॥ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुप
शोभितं॥तंदृष्ट्वाराघवःश्रीमान्तापसाश्रममंडलं॥९॥अभ्यगच्छन्महातेजाविज्यंकृत्वामहद्धनुः॥दिव्यज्ञानोपपन्नास्तेरामंदृष्ट्वा
महर्षयः॥१०॥अभ्यगच्छंस्तदाप्रीतावैदेहींचयशस्विनीं॥तेतंसोममिवोद्यंतंदृष्ट्वावैधर्मचारिणं॥११॥लक्ष्मणंचैवदृष्ट्वातुवैदेहींच
यशस्विनीं॥मंगलानिप्रयुंजानाःप्रत्यगृह्णन्दृढव्रता॥१२॥रूपंसंहननंलक्ष्मींसौकुमार्यंसुवेषतां॥ददृशुर्विस्मिताकारारामस्यव
नवासिनः॥१३॥वैदेहींलक्ष्मणंरामंनेत्रैरनिमिषैरिव॥आश्चर्यभूतान्ददृशुःसर्वेतेवनवासिनः॥१४॥तत्रैनंहिमहाभागाःसर्वभू
तहितेरताः॥अतिथिंपर्णशालायांराघवंसन्यवेशयन्॥१५॥ततोरामंसुसत्कृत्यविधिनापावकोपमाः॥आजह्रुस्तेमहाभागाःस ॥राम॥ ॥२॥

लिलंधर्मचारिणः ॥१६॥ मंगलानिप्रयुंजानामुदारामंयथायुताः । मूलंपुष्पंफलंवन्यंआश्रमंचमहात्मनः ॥१७॥ निवेदयित्वाधर्म
ज्ञास्ततःप्रांजलयोऽब्रुवन् । धर्मपालोजनस्यास्यशरण्यस्त्वंमहायशाः ॥१८॥ पूजनीयश्चमान्यश्चराजादंडधरोगुरुः । इंद्रस्येवचतुर्भा
गःप्रजारक्षतिराघव ॥१९॥ राजातस्माद्वरान्भोगान्रम्यान्भुंक्तेनमस्कृतः । तेवयंभवतारक्ष्याभवद्विषयवासिनः ॥२०॥ नगरस्था
वनस्थावात्वन्नोराजाजनेश्वरः । न्यस्तदंडावयंराजन्जितक्रोधाजितेंद्रियाः ॥२१॥ रक्षितव्यास्त्वयाशश्वद्गर्भभूतास्तपोधनाः ॥
एवमुक्त्वाफलैर्मूलैःपुष्पैरन्यैश्चपार्थिवं ॥२२॥ वन्यैश्चविविधाहारैःसलक्ष्मणमपूजयन् । तथान्येतापसासिद्धारामंवैश्वान
रोपमं । न्यायवृत्तायथान्यायंतर्पयामासुरीश्वरं ॥२३॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेप्रथमःसर्गः ॥१॥ कृताति
थ्योऽथरामस्तुसूर्यस्योदयनंप्रति । आमंत्र्यसमुनीन्सर्वान्वनमेवान्वगाहत ॥१॥ नानामृगगणाकीर्णंशार्दूलमृगसेवितं । ध्व
स्तवृक्षलतागुल्मंदुर्दर्शसलिलाशयं ॥ निष्कूजनानाशकुनिझिल्लिकागणनादितं ॥२॥ लक्ष्मणानुगतोरामोवनमध्यंदद
र्शह । सीतयासहकाकुत्स्थस्तस्मिन्घोरमृगायुते ॥३॥ ददर्शगिरिशृंगाभंपुरुषादंमहास्वनं । गभीराक्षंमहावक्त्रंविकटंविकृ
तोदरं ॥४॥ वीभत्संविषमंदीर्घंविकृतंघोरदर्शनं । वसानंचर्मवैयाघ्रंवसार्द्रंरुधिरोक्षितं ॥५॥ त्रासनंसर्वभूतानांव्यादिता
स्यमिवांतकं । त्रीन्सिंहांश्चतुरोव्याघ्रान्द्वौवृकौपृषतान्दश ॥६॥ सविषाणंवसादिग्धंगजस्यचशिरोमहत् । अवसज्यायसेशू

॥रा०बा०आ०
॥२॥

न०

लेविंदंतंमहास्वनं॥५॥सरामंलक्ष्मणंचैवसीतांदृष्ट्वाचमैथिलीं।अभ्यधावत्सुसंक्रुद्धःप्रजाःकालःइवांतकः।६।सकृत्वाभैरवं
नादंचालयन्निवमेदिनीं॥अंकेनादायवैदेहीमपाक्रम्यततोब्रवीत्॥७॥युवांजटाचीरधरौसभार्यौक्षीणजीवितौ॥प्रविष्टौदंडका
रण्यंशरचापासिधारिणौ॥८॥कथंतापसयोर्वांचवासःप्रमदयासह॥अधर्मचारिणौपापौकौयुवांमुनिदूषकौ॥९॥अहंवन॰
मिदंदुर्गंविराधोनामराक्षसः।चरामिसायुधोनित्यमृषिमांसानिभक्षयन्॥१०॥इयंनारीवरारोहाममभार्याभविष्यति॥युवयोः
पापयोश्चाहंपास्यामिरुधिरंमृधे॥११॥तस्यैवंब्रुवतोदुष्टंविराधस्यदुरात्मनः॥श्रुत्वासगर्ववचनंसंभ्रांताजनकात्मजा॥१२॥सी
ताप्रावेपतोद्वेगात्प्रवातेकदलीयथा॥तांदृष्ट्वाराघवःश्रीमान्विराधांकगतांशुभां॥१३॥अब्रवील्लक्ष्मणंवाक्यंमुखेनपरि
शुष्यता॥पश्यसौम्यनरेंद्रस्यजनकस्यात्मसंभवां॥१४॥ममभार्यांशुभाचारांविराधांकेप्रवेशितां॥अत्यंतसुखसंवृद्धांराजपु
त्रींमनस्विनीं॥१५॥यदभिप्रेतमस्मासुप्रियंवरमयंचतत्॥कैकेय्यास्तुसुसंवृत्तंक्षिप्रमद्यैवलक्ष्मण॥यानतुष्यतिराज्ये
नपुत्रार्थेदीर्घदर्शिनी॥१६॥ययाहंसर्वभूतानांप्रियःप्रस्थापितोवनं॥अद्येदानींसकामासायामाताममसध्यमा॥१७॥पर
स्पर्शात्तवैदेह्यानदुःखतरमस्तिमे॥पितुर्विनाशात्सौमित्रेस्वराज्याहरणात्तथा॥१८॥इतिब्रुवतिकाकुत्स्थेबाष्पशोकपरिप्लु
ते अब्रवील्लक्ष्मणःक्रुद्धोरुद्धोनागइवश्वसन्॥१९॥अनाथइवभूतानांनाथस्त्वंवासवोपमः।मयाप्रेष्येणकाकुत्स्थकिम ॥राम॥
॥२॥

र्थेपरितप्यसे॥२३॥शरेणनिहतस्यास्यमयाक्रुद्धेनरक्षसः।विराधस्यगतासोर्हिमहीपास्यतिशोणितं॥२४॥राज्यकामेन
ममक्रोधोभरतेयोवभूवह।तंविराधेविमोक्ष्यामिवज्रीवज्रमिवाचले॥२५॥ममभुजवलवेगवेगितःपततशरोस्यमहान्महो
रसि।व्यपनयतुततोस्यजीवितंपततुततश्चमहींविघूर्णितः॥२६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेद्वितीयः
सर्गः॥२॥छ॥इत्युक्त्वालक्ष्मणःश्रीमान्विराधंप्रहसन्निव।कोभवान्वनमभ्येत्यचरिष्यतियथासुखं॥१॥अथोवाचपुन
र्वाक्यंविराधःपूरयन्वनं।आत्मानंपृच्छतेब्रूतंकौयुवांक्वगमिष्यथः॥२॥तमुवाचततोरामोराक्षसंज्वलिताननं।पृच्छंतंसुमहा
तेजाइक्ष्वाकुकुलमात्मनः॥३॥क्षत्रियौवृत्तसंपन्नौविद्धिनौवनगोचरौ।त्वांतुवेदितुमिच्छावःकस्त्वंचरसिदंडकान्॥४॥तमुवा
चविराधस्तुरामंसत्यपराक्रमं।हंतवक्ष्यामितेराजन्निबोधममराघव॥५॥पुत्रःकिलजवस्याहंमाताममशतह्रदा।विराध
इतिमामाहुःपृथिव्यांसर्वराक्षसाः॥६॥तपसाचापिमेप्राप्ताब्रह्मणोहिप्रसादजा।शस्त्रेणावध्यतालोकेछेद्याभेद्यत्वमेवच॥
७॥उत्सृज्यप्रमदामेनामनपेक्षौयथागतं।त्वरमाणौपलायेथांनवांजीवितमाददे॥८॥तंरामःप्रत्युवाचेदंकोपसंरक्तलोचनः
राक्षसंविकृताकारंविराधंपापचेतसं॥९॥क्षुद्रधिक्त्वांतुहीनार्थंमृत्युरन्वेषतेध्रुवं।रणेप्राप्स्यसिसंतिष्ठनमेजीवन्विमो
क्ष्यसे॥१०॥ततःसज्यंधनुःकृत्वारामःसुनिशितान्शरान्।सुशीघ्रमभिसंधायराक्षसंनिजघानह॥११॥धनुषाज्यागुणवतासप्त

॥रा०बा०आ॥ बाणान्मुमोच ह॥ रुक्मपुंखान्महावेगान्सुपर्णानिलतुल्यगान्॥२२॥ ते शरीरं विराधस्य भित्वा बर्हिणवाससः निपेतुः शो-
॥३॥ णितादिग्धा धरण्यां पावकोपमाः॥२३॥ स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः॥ अभ्यद्रवत्सुसंक्रुद्धस्तदा रामं सलक्ष्मणं
॥२४॥ स विनद्य महानादं शूलं शक्रध्वजोपमं॥ प्रगृह्याशोभत तदा व्यात्ताननइवांतकः॥२५॥ अथ तौ भ्रातरौ तत्र शरवर्षं ववर्षतुः
विराधे राक्षसे तस्मिन्कालांतकयमोपमे॥२६॥ स प्रहस्य महारौद्रं स्थित्वाजृंभत राक्षसः॥ जृंभमाणस्य च ततः कायान्निष्पेतु-
राशुगाः॥२७॥ बलात्तु वरदानस्य प्राणान्संरुध्य राक्षसः॥ विराधः शूलमुद्यम्य राघवावभ्यसर्ज्जयत्॥२८॥ तच्छूलं वज्रसंकाशं गगने
ज्वलनोपमं॥ द्वाभ्यां शराभ्यां चिच्छेद रामः शस्त्रभृतां वरः॥२९॥ तद्रामविशिखैश्छिन्नं शूलं तस्यापि पातितं॥ पपात शनिना छिन्नं
मेरोरिव शिलातलं॥३०॥ तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पाविवोद्यतौ॥ तूर्णमापततस्तस्य तदा प्रहरतां बलात्॥३१॥ स वध्यमानः सु-
भृशं भुजाभ्यां परिगृह्य तौ॥ अप्रकंप्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत॥३२॥ तस्याभिप्रायमाज्ञाय रामो लक्ष्मणमब्रवीत्॥ वहत्वयमलं पा
तावत्पथानेन तु राक्षसः॥३३॥ यथेच्छति हि सौमित्रे तथा वहतु राक्षसः॥ अयमेव हि नः पंथा येन याति निशाचरः॥३४॥ स तु स्वब-
लवीर्येण तौ समुत्क्षिप्य राक्षसः॥ बालाविव स्कंधगतौ चकारातिबलौ ततः॥३५॥ तावारोप्य ततः स्कंधे राघवौ रजनीचरः॥ विराधो वि- ॥राम॥
नदन्घोरं जगामाभिमुखो वनं॥३६॥ वनं महामेघनिभं प्रविष्टो द्रुमैर्महद्भिर्विविधैरुपेतं॥ नानाविधैः पक्षिगणैर्विचित्रं शिवायुतं म- ॥३॥

लमृगेविकीर्णे॥२८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेतृतीयःसर्गः॥३॥ह्रियमाणौतुतौदृष्ट्वावैदेहीरामलक्ष्म
णौ॥उच्चैःस्वरेणचुक्रोशप्रगृह्यसुमहाभुजौ॥१॥एषदाशरथीरामःसत्यवान्बलवान्नृजुः॥रक्षसारौद्ररूपेणह्रियतेसहलक्ष्म
णः॥२॥मांवृकाभक्षयिष्यंतिशार्दूलाद्वीपिनस्तथा॥मांहरोत्सृज्यकाकुत्स्थौनमस्तेराक्षसोत्तम॥३॥तस्यास्तद्वचनंश्रुत्वावैदेह्यारा
मलक्ष्मणौ॥वेगंप्रचक्रतुर्वधेतस्यदुरात्मनः॥४॥तस्यरौद्रस्यसौमित्रिःसव्यंबाहुंबभंजह॥रामस्तुदक्षिणंबाहुंतरसातस्य
रक्षसः॥५॥सभग्नबाहुःसंविग्नोनिपपाताशुराक्षसः॥धरण्यांमेघसंकाशोवज्रभिन्नइवाचलः॥६॥मुष्टिभिर्जानुभिःपद्भिःसूदयं
तौचराक्षसं॥उद्यम्योद्यम्यचाप्येनंस्थंडिलेनिष्पिपेषतुः॥७॥सविद्धोबहुभिर्बाणैःखड्गाभ्यांचपरिक्षतः॥निष्पिष्टोबहुधाभूमौनम
मारसराक्षसः॥८॥तंप्रेक्ष्यरामःसुभृशमवध्यमचलोपमं॥भयेष्वभयदःश्रीमानिदंवचनमब्रवीत्॥९॥तपसापुरुषव्याघ्रराक्ष
सोयंनशक्यते॥शस्त्रेणयुधिनिर्जेतुंराक्षसंनिखनावहे॥१०॥कुंजरस्येवरौद्रस्यराक्षसस्यास्यलक्ष्मणः॥महतोस्यमहच्छ्वभ्रंख
न्यतांरौद्रवर्चसः॥११॥इत्युक्त्वालक्ष्मणंरामःप्रदरःखन्यतामिति॥तस्थौविराधमाक्रम्यकंठेपादेनवीर्यवान्॥१२॥तच्छ्रुत्वाराघ
वेणोक्तंराक्षसःप्रश्रितंवचः॥इदंप्रोवाचकाकुत्स्थविराधःपुरुषर्षभं॥१३॥हतोऽहंपुरुषव्याघ्रशक्रतुल्यबलेनवै॥मयातुपू
र्वंत्वंमोहादज्ञातःपुरुषर्षभ॥१४॥कौशल्यासुप्रजारामविदितस्त्वंमयाधुना॥वैदेहीचमहाभागालक्ष्मणश्चमहायशाः॥१५॥

।।रा०बा०आ० अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुं।तुंबरुर्नाम गंधर्वः शप्तो वैश्रवणेन हि।।१८।।प्रसाद्यमानश्च मया सोऽब्रवीन्मां महाय
।।४।। शाः।यदा दाशरथी रामस्त्वां वधिष्यति संयुगे।।तदा प्रकृतिमापन्नो भवान् स्वर्गं गमिष्यति।।१९।।अनुपस्थीयमानो मां संक्रुद्धो
व्याजहार ह।।इति वैश्रवणो राजा रंभासक्तमुवाच ह।।२०।।तव प्रसादान्मुक्तोऽहं मिह शापात् सुदारुणात्।।भवनं स्वं गमिष्यामि स्व
स्ति तेऽस्तु परंतप।।२१।।इतो वसति धर्मात्मा शरभंगः प्रतापवान्।अध्यर्द्धयोजने तात महर्षिः सूर्यसन्निभः।।२२।।तं क्षिप्रमभिगच्छ त्वं
स ते श्रेयो विधास्यति।।अवटे चापि मां राम निक्षिप्य कुशली व्रज।।२३।।रक्षसां गतसत्त्वानामेष धर्मः सनातनः।अवटे ये निधीयंते
तेषां लोकाः सनातनाः।।२४।।एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः।बभूव स्वर्गसंप्राप्तो न्यस्तदेहो महाबलः।।२५।।तच्छ्रुत्वा राघ
वो वाक्यं लक्ष्मणं व्यादिदेश ह।।कुंजरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण।।२६।।महतः सुमहत् श्वभ्रं खन्यतां रौद्रकर्मणः।।इत्युक्त्वा
लक्ष्मणं रामः प्रदरः खन्यतामिति।।२७।।तस्थौ विराधमाक्रम्य कंठे पादेन वीर्यवान्।।ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमं।।
२८।।अखनत्पार्श्वतस्तस्य विराधस्य दुरात्मनः।।तं मुक्तकंठमुत्क्षिप्य शंकुकर्णं महास्वनं।।विराधं प्राक्षिपच्छ्वभ्रे नदंतं भैरवस्वनं।
२९।।तमाहवे निर्जितमाशुविक्रमौ स्थिरावुभौ संयति रामलक्ष्मणौ।मुदान्वितौ चिक्षिपतुर्भयावहं नदंतमुत्क्षिप्य बलेन राक्ष ।।राम।।
सं।।३०।।असत्यतां प्रेक्ष्य महासुरस्य तौ स्थितेन शस्त्रेण तदा नरर्षभौ।संमंत्र्य चात्यर्थविशारदावुभौ बिले विराधस्य वधं प्रचक्रतुः ।।४।।

३०।स्वयंविराधेनहिमृत्युरात्मनःप्रसह्यरामेणवधार्थमीप्सितः।निवेदितःकाननचारिणास्वयंनमेवधःशस्त्रकृतोभवेदिति
३१।तथैवरामेणनिशम्यभाषितंकृतामतिस्तस्यबिलप्रवेशने।बिलंचतेनातिबलेनरक्षसाप्रविश्यमानेनवनंविनादितं॥
३२।प्रहृष्टरूपाविवरामलक्ष्मणौविराधमूर्व्यांप्रदरेनिपात्यतं।ननंदतुर्वीतभयौमहावनेशिलाभिरंतर्दधतुश्चराक्षसं।३३।
ततस्तुतौकांचनचित्रकार्मुकौनिहत्यरक्षःपरिगृह्यमैथिलीं।विजह्रतुस्तौमुदितौमहावनेदिविस्थितौचंद्रदिवाकराविव
३४।इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेचतुर्थःसर्गः।४।११।हत्वातुतंभीमबलंविराधंराक्षसंवने।ततःसीतांपरिष्व
ज्यसमाश्वास्यचवीर्यवान्।१।अब्रवील्लक्ष्मणंरामोभ्रातरंदीप्ततेजसं।कष्टंवनमिदंदुर्गंनचास्मोवनगोचराः।२।अभिगच्छामहे।
शीघ्रंशरभंगंतपोधनं।आश्रमंशरभंगस्यराघवोभिजगामह।३।तस्यदेवप्रभावस्यतपसाभावितात्मनः।समीपेशरभंगस्यद
दर्शमहदद्भुतं।४।विभ्राजमानंवपुषासूर्यवैश्वानरप्रभं।रथप्रवरमारूढमाकाशेविबुधानुगं।५।असंस्पृशंतंवसुधांददर्श
विबुधेश्वरं।सुप्रभाभरणंदेवंविरजोंबरधारिणं।६।तद्विधैरेवबहुभिःपूज्यमानंमहर्षिभिः हरिभिर्वाजिभिर्युक्तमंतरिक्षेतंरथं॥ ग
७।ददर्शदूरतस्तस्यतरुणादित्यसन्निभं।पांडुराभ्रघनप्रख्यंचंद्रमंडलसन्निभं।८।अपश्यद्विमलंछत्रंचित्रमालोपशोभितं
चामरव्यजनेचाग्र्येरुक्मदंडेमहाधने।गृहीतेवरनारीभ्यांधूयमानेनमूर्द्धनि।९।गंधर्वामरसिद्धाश्चबहवःपरमर्षयः।अंतरि

सतं देवं वाग्भिरग्र्याभिरस्तुवन् ॥११॥ सह संभाषमाणे तु शरभंगेन वासवे । दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् ॥१२॥ रामोऽपि रथमु
द्दिश्य भ्रातुर्दर्शयताद्भुतं । अर्चिष्मंतं श्रिया जुष्टं अद्भुतं पश्य लक्ष्मण ॥१३॥ प्रतपंतमिवादित्यमंतरिक्षगतं रथं । ये हयाः पुरुहूत
स्य पुरा शक्रस्य नः श्रुताः ॥१४॥ अंतरिक्षगता दिव्यास्त इमे हरयो ध्रुवं । इमे च पुरुषव्याघ्रा ये तिष्ठंत्यभितो रथं ॥१५॥ शतं शतं कुंड-
लिनो युवानः खड्गपाणयः । विस्तीर्णविपुलोरस्काः परिघायतबाहवः ॥१६॥ शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः । उरोदेशे
षु सर्वेषां हारा ज्वलनसन्निभाः ॥१७॥ रूपं बिभ्रति सौमित्रे पंचविंशतिवार्षिकं । एतद्धि किल देवानां वयो भवति नित्यदा ॥१८॥ यइमे
पुरुषव्याघ्रा दृश्यंते शुभदर्शनाः । इहैव सह वैदेह्या मुहूर्त्तं तिष्ठ लक्ष्मण ॥१९॥ यावज्जानाम्यहं व्यक्तं क एष द्युतिमान् रथे । त
मेवमुक्त्वा सौमित्रिमिहैव स्थीयतामिति ॥२०॥ अभिचक्राम काकुत्स्थः शरभंगाश्रमं प्रति । ततः समभिगच्छंतं प्रेक्ष्य रामं शची
पतिः ॥२१॥ शरभंगमनुज्ञाप्य विबुधानिदमब्रवीत् । इहोपयात्यसौ रामो यावन्मां नाभिभाषते ॥२२॥ निष्ठां नयत तावत्तु ततो मां
द्रष्टुमर्हति । तावद्गच्छामहे शीघ्रं यावन्मां नाभिभाषते ॥२३॥ जितवंतं कृतार्थं च दृष्ट्वा द्रक्ष्याम्यहं हरिं । कर्म ह्यनेन कर्त्तव्यं म
हदन्यैः सुदुष्करं ॥२४॥ इति वज्री तमामंत्र्य मानयित्वा च तापसं । रथेन हरियुक्तेन ययौ दिवमरिंदमः ॥२५॥ प्रयाते तु सहस्रा
क्षे राघवः सपरिच्छदः । अग्निहोत्रमुपासीनं शरभंगमुपागमत् ॥२६॥ तस्य पादौ च संगृह्य रामः सीता च लक्ष्मणः । निषेदुस्त

दनुज्ञाताल्लब्धवासानिमंत्रिताः॥२७॥ ततः शक्रोपयानं तत्पर्यपृच्छत्स राघवः। शरभंगश्च तत्सर्वं राघवाय न्यवेदयत्॥२८॥ मा
मेष वरदो राम ब्रह्मलोकं निनीषति। जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः॥२९॥ अहं ज्ञात्वा नरव्याघ्र वर्त्तमानमदूरतः। ब्रह्म
लोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिं॥३०॥ त्वयाहं पुरुषव्याघ्र धार्मिकेण महात्मना समागम्य गमिष्यामि त्रिदिवं दिवसे
वितं॥३१॥ अक्षया नरशार्दूल जिता लोका मया शुभाः। ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान्॥३२॥ एवमुक्तो नरव्याघ्र
सर्वशास्त्रविदां वरः। ऋषिणा शरभंगेन राघवो वाक्यमब्रवीत्॥३३॥ अहमेव हरिष्यामि सर्वलोकान्महामुने॥ आवासं त्वह
मिच्छामि प्रदिष्टमिह कानने॥३४॥ राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै॥ शरभंगो महाप्राज्ञः पुनरेवाब्रवीद्वचः॥३५॥ इह राम म
हातेजाः सुतीक्ष्णो नाम धार्मिकः॥ वसत्यरण्ये धर्मात्मा स ते श्रेयो विधास्यति॥३६॥ सुतीक्ष्णमभिगच्छ त्वं शुचौ देशे तपस्विनं॥ रम
णीये वनोद्देशे स ते वासं विधास्यति॥३७॥ इमां मंदाकिनीं राम प्रतिस्रोतामभिव्रज। नदीं पुष्पोडुपवहां ततस्तत्र गमिष्यसि॥
३८॥ एष पंथा नरव्याघ्र मुहूर्त्तं पश्य तात मां॥ यावज्जहामि गात्राणि जीर्णं त्वचमिवोरगः॥३९॥ ततो वह्निं समाधाय हुत्वा चाज्येन
मंत्रवित्। शरभंगो महाप्राज्ञः प्रविवेश हुताशनं॥४०॥ तस्य रोमाणि केशांश्च ददाहाग्निर्महात्मनः॥ जीर्णां त्वचमथास्थीनि यच्च मां
संशशोणितं॥४१॥ स च पावकसंकाशः कुमारः समपद्यत। उत्थायाग्निचयात्तस्माच्छरभंगो व्यरोचत॥४२॥ स लोकानाहिताग्नीनां

मृषीणांचसुकर्मणां।देवानांचअतिक्रम्यब्रह्मलोकंमरोहत॥४३॥सपुण्यकर्माभुवनेद्विजर्षभःपितामहंसानुचरंददर्शह॥पिता
महश्चापिसमीक्ष्यतंद्विजंननंदसुस्वागतमित्युवाचह॥४४॥इत्यार्षेरामा०वाल्मी०आरण्यकांडेपंचमःसर्गः॥५॥शरभंगेदिवंप्राप्तेमु
निसंघाःसमागताः।अभ्यगच्छंतकाकुत्स्थंरामंज्वलिततेजसं॥१॥वैखानसावालखिल्यासंप्रक्षालामरीचिपाः।अश्मकूटाश्च
बहवपत्राहाराश्चतापसाः॥२॥दंतोलूखलिनश्चैवतथैवोन्मज्जकाःपरे।गात्रशय्याअशय्याश्चतथैवाभ्रावकाशिकाः॥३॥
मुनयःसलिलाहारावायुभक्षास्तथापरे।आकाशनिलयाश्चैवतथास्थंडिलशायिनः॥४॥मासोपवासिनोदांतास्तथार्द्रपटवास
सः॥सजयाश्चतपोनित्यास्तथापंचतपोन्विताः॥५॥सर्वेब्राह्म्याश्रियाजुष्टादृढयोगाःसहस्रशः॥शरभंगाश्रमेराममभिजग्मुश्च
तापसाः॥६॥अभिगम्यचधर्मज्ञारामंधर्मभृतांवरं॥ऊचुःपरमधर्मज्ञंऋषिसंघाःसमाहिताः॥७॥त्वमिक्ष्वाकुकुलस्यास्यपृथिव्या
श्चमहारथः॥प्रधानश्चासिनाथश्चदेवानांमघवानिव॥८॥विश्रुतस्त्रिषुलोकेषुयशसाविक्रमेणच॥पितृव्रतत्वंसत्यंचत्वयिधर्म
श्चपुष्कलः॥९॥त्वामासाद्यमहात्मानंधर्मज्ञंधर्मवत्सलं॥अर्थित्वान्नाथवक्ष्यामस्तच्चनःक्षंतुमर्हसि॥१०॥अधर्मस्तुमहान्नाथभवे
त्तस्यतुभूपतेः॥योहरेद्बलिषड्भागंनचरक्षतिपुत्रवत्॥११॥युंजानःस्वानिवत्प्राणान्प्राणैरिष्टान्सुतानिव॥नित्ययुक्तःसदारक्षन्स ॥राम॥
र्वान्विषयवासिनः॥१२॥प्राप्नोतिशाश्वतींरामकीर्तिंसबहुवार्षिकीं।ब्रह्मणःस्थानमासाद्यतत्रापिचमहीपते॥१३॥यःकरोतिपरंध ॥६॥

र्मपर्णमूलफलाशनः॥ तत्रराज्ञश्चतुर्भागः प्रजाधर्मेणरक्षतः॥१४॥ सोयंब्राह्मणभूयिष्ठोवानप्रस्थगणोमहान्। त्वंनाथोनाथवद्रा
मराक्षसैर्हन्यतेभृशं॥१५॥ एहिपश्यशरीराणिमुनीनांभावितात्मनां॥ हतानांराक्षसैर्घोरैर्बहूनांबहुधावने॥१६॥ पंपानदीनिवासा
नामनुमंदाकिनीमपि॥ चित्रकूटालयानांचक्रियतेकदनंमहत्॥१७॥ एवंवयंनमृष्यामोविप्रकारंतपस्विनां॥ क्रियमाणंवनेघो
रंराक्षसैर्भीमविक्रमैः॥१८॥ ततःस्त्वांशरणार्थंचशरण्यंसमुपस्थिताः॥ परिपालयनोरामवध्यमानान्निशाचरैः॥१९॥ परात्वत्तोगति
र्वीरपृथिव्यांनोपपद्यते॥ परिपालयनःसर्वान्राक्षसेभ्योनृपात्मज॥२०॥ एतच्छ्रुत्वातुकाकुत्स्थस्तापसानांतपस्विनां॥ इदंप्रोवाच
धर्मात्मासर्वानेवतपस्विनः॥२१॥ नैवमर्हथमांवक्तुमाज्ञाप्योहंतपस्विनां॥ केवलेनस्वकार्येणप्रवेष्टव्यंवनंमया॥ विप्रकारमपाकर्तुं
राक्षसैर्भवतामिमं॥ पितुस्तुनिर्देशकरःप्रविष्टोहमिदंवनं॥२३॥ भवतामर्थसिद्ध्यर्थमागतोहंयदृच्छया॥ तस्यमेयंवनेवासोभविष्य
तिमहाफलः॥२४॥ तपस्विनांरणेशत्रून्हंतुमिच्छामिराक्षसान्॥ पश्यंतुवीर्यमृषयःसभ्रातुर्मेतपोधनाः॥२५॥ दत्वावरंचापिसता
पसानांधर्मप्रधानःसहलक्ष्मणेन॥ तपोधनश्चापिसहार्यवृत्तः॥ सुतीक्ष्णमेवाभिजगामवीरः॥२६॥ इत्यार्षेश्रीरामा० वा० आरण्यकां
डेषष्ठःसर्गः॥६॥ रामश्चसहितोभ्रात्रासीतयाचपरंतपः॥ सुतीक्ष्णस्याश्रमपदंजगामसहितोद्विजैः॥१॥ सगत्वादूरमध्वानंनदीस्ती
र्त्वाबहूदकाः॥ ददर्शविमलंशैलंमहामेरुमिवोन्नतं॥२॥ ततस्तदिक्ष्वाकुवरौसंततंविविधैर्द्रुमैः॥ काननंतौविविशतुःसीत(

॥रा॰आ॰॥ यासहराघवो ३ प्रविष्टस्तुवनंरामोवहुपुष्पफलद्रुमं।ददर्शाश्रममेकांतेचीरमूलपरिष्कृतं।४।तत्रतापसमासीनंमलपंकजटा
॥७॥ धरं रामःसुतीक्ष्णंविधिवत्तपोवृद्धमभाषत।५।रामोहमस्मिभगवन्भवंतंद्रष्टुमागतः।आगतंपाहिधर्मज्ञमहर्षेसत्यविक्र
म।६।सनिरीक्ष्यतदारामंवीरंधर्मभृतांवरं।समाश्लिष्यचवाहुभ्यांइदंवचनमब्रवीत्।७।स्वागतंतेनरश्रेष्ठरामसत्यभृतां
वर।आश्रमोयंत्वयाक्रांतःसनाथइवसांप्रतं।८।प्रतीक्षमाणस्त्वामेवनारोहेऽहंमहायशाः।देवलोकमितोवीरदेहंत्यक्त्वा
महीतले।९।चित्रकूटमनुप्राप्तोराज्यभ्रष्टोमयाश्रुतः।इहोपयातःकाकुत्स्थदेवराजःशतक्रतुः।१०।उपगम्यचमांदेवोमहा
देवःसुरेश्वरः।सर्वाँल्लोकान्जितानाहममपुण्येनकर्मणा।११।तेषुदेवर्षिजुष्टेषुजितेषुतपसामया।मत्प्रसादात्सभार्यस्त्वं
विहरस्वसलक्ष्मणः।१२।तमुग्रतपसंदीप्तंमहर्षिंसत्यवादिनं।प्रत्युवाचात्मवान्रामोब्रह्माणमिववासवः।१३।अहमेवाहरि
ष्यामिसर्वाँल्लोकान्महामुने।आवासंत्वहमिच्छामिप्रदिष्टमिहकानने।१४।भवान्सर्वत्रकुशलःसर्वभूतहितेरतः।आख्यातः
शरभंगेनगौतमेनमहात्मना।१५।एवमुक्तस्तुरामेणमहर्षिर्लोकविश्रुतः।अब्रवीन्मधुरंवाक्यंहर्षेणमहताप्लुतः।१६।अयमेवा
श्रमोरामगुणवान्रम्यतामिह।ऋषिसंघानुचरितःसदामूलफलायुतः।१७।इममाश्रममागम्यमृगसंघामहीयसः।अटित्वा ॥राम॥
प्रतिगच्छंतिलोभयित्वाकुतोभयाः।१८।नान्योदोषोभवेदत्रमृगेभ्योन्यत्रविद्धिवै।तच्छ्रुत्वावचनंतस्यमहर्षेर्लक्ष्मणाग्रजः।१९।उ ॥७॥

वाचवचनंरामोविकृष्यसशरंधनुः॥तानहंसुमहाभागमृगसंघान्समागतान्॥२०॥हन्यांनिशितधारेणशरेणाशनिवर्चसा॥भ
वांस्तत्राभिषज्येतकिंस्यात्कृच्छ्रतरंततः॥२१॥एकस्मिन्नाश्रमेवासंचिरंतुनसमर्थये॥तमेवमुक्त्वावरदंरामःसंध्यामुपागमत्॥२२॥अन्वा
स्यपश्चिमांसंध्यांतत्रवासमकल्पयत्॥सुतीक्ष्णस्याश्रमेरामःसीतयालक्ष्मणेनच॥२३॥ततःशुभंतापसभोज्यमन्नंस्वयंसुतीक्ष्णः
पुरुषर्षभाभ्यां॥सत्कृत्यताभ्यांप्रददौमहात्मासंध्यानिवृत्तौरजनीनिरीक्ष्य॥२४॥इत्यार्षेश्रीरामायणेआरण्यकांडेसप्तमःसर्गः
७॥रामस्तुसहसौमित्रीःसुतीक्ष्णेनाभिपूजितः॥परिणाम्यनिशांतत्रप्रत्यूषेप्रत्यबुध्यत॥१॥उत्थायतुयथाकालंराघवःसहसी
तया॥उपस्पृश्यतुशीतेनतोयेनोत्पलगंधिना॥२॥अथतेग्नीन्सुरांश्चैववैदेहीरामलक्ष्मणौ॥कालंविधिवदभ्यर्च्यतपस्विश
रणेवने॥३॥उदयंतंदिनकरंदृष्ट्वाविगतकल्मषाः॥सुतीक्ष्णमभिगम्येदंश्लक्ष्णंवचनमब्रुवन्॥४॥सुखोषिताःस्मभगवन्त्वया
पूज्येनपूजिताः॥आपृच्छामःप्रयास्यामोमुनयस्त्वरयंतिनः॥५॥त्वरामहेवयंद्रष्टुंकृत्स्नमाश्रममंडलं॥ऋषीणांपुण्यशीलानांदंड
कारण्यवासिनां॥६॥अभ्यनुज्ञातुमिच्छामःसहैभिर्मुनिसत्तमैः॥धर्मनित्यैस्तपोदांतैर्विशिखैरिवपावकैः॥७॥अविषह्यातपोया
वत्सूर्योनातिविराजते॥अमार्गेणागतांलक्ष्मींप्राप्येवान्वयवर्जितः॥८॥तावदिच्छामहेगंतुमित्युक्त्वाचरणौमुनेः॥ववंदतुस्तावेका
ग्रौसीतयासहराघवौ॥९॥तौसंस्पृशंतावुत्थाप्यचरणौमुनिपुंगवः॥गाढमाश्लिष्यतंराममिदंवचनमब्रवीत्॥१०॥अरिष्टंगच्छपं

॥रा॰आ॰॥ थानेंरामसौमित्रिणासह सीतयाचानयासार्द्धं छाययेवानुवृत्तया॥२१॥ पश्याश्रमपदंरम्यंदंडकारण्यवासिनां॥ एषांत
॥८॥ पस्विनांरामतपसाभावितात्मनां॥२२॥सुप्राज्यफलमूलानिपुष्पितानिवनानिच॥ प्रशस्तमृगयूथानिशांतपक्षिगणानि
च॥२३॥फुल्लपंकजखंडानिप्रसन्नसलिलानिच॥ कारंडवविकीर्णानितटाकानिसरांसिच॥२४॥द्रक्ष्यसेदृष्टिरम्याणिगिरिप्र
स्रवणानिच॥ रमणीयान्यरण्यानिमयूराभिरुतानिच॥२५॥गम्यतांवत्ससौमित्रेभवानपिचगच्छतु॥ आगंतव्यंततेदृष्ट्वापुन
रेवाश्रमंमम॥ एवमुक्तस्तथेत्युक्त्वाकाकुत्स्थःसहसीतया॥२६॥प्रदक्षिणंमृषिंकृत्वाप्रस्थातुमुपचक्रमे॥ ततःशुभतरेतूणीध
नुषीचायतेक्षणा॥२७॥ददौसीतातयोर्भ्रात्रोःखड्गौचकनकात्मरू॥ आबध्यचशुभेतूणीचापेत्वादायसस्वने॥२८॥निःक्रांता
वाश्रमपदात्तावुभौरामलक्ष्मणौ॥ श्रीमंतौरूपसंपन्नावनुज्ञातौमहर्षिणा प्रस्थितौधृतचापौतौसीतयासहराघवौ॥२९॥इत्या
र्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेअष्टमःसर्गः॥८॥सुतीक्ष्णेनाभ्यनुज्ञातंप्रस्थितंरघुनंदनं हृद्ययास्निग्धयावाचा
भर्त्तारमिदमब्रवीत्॥१॥अयंतुधर्मःसुसूक्ष्मेणविधिनाप्राप्यतेमहान्॥ निवृत्तेनतुशक्योयंव्यसनात्कामजादिह॥२॥त्रीण्ये
वव्यसनान्यत्रकामजानिभवंत्युत॥ मिथ्यावाक्यंपरमकंतस्माद्गुरुतरावुभौ॥३॥परदाराभिगमनंविनावैरंचरौद्रता॥ मिथ्या ॥राम॥
वाक्यंनतेभूतंनभविष्यतिराघव॥४॥कुतोभिलाषणंस्त्रीणांपरेषांधर्मनाशनं॥ तवनास्तिमनुष्येंद्रनचाभूत्तेकदाचन॥५॥ ॥८॥

मनस्यपि तथाराम नचैतद्विद्यते क्वचित्॥ स्वदारनिरतस्त्वंच नित्यमेव नृपात्मज॥८॥ धर्मिष्ठः सत्यसंधश्च पितुर्निदेशका
रकः॥ सत्यसंध महाभाग श्रीमल्लक्ष्मणपूर्वज॥९॥ त्वयि धर्मश्च सत्यं च त्वयि सर्वं प्रतिष्ठितं॥ तच्च सर्वं महाबाहो शक्यं वोढुं
जितेंद्रियैः॥ तव वश्येंद्रियत्वं च जानामि शुभदर्शन॥९॥ तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनं॥ निर्वैरं क्रियते मोहात्तच्च ते समु
पस्थितं॥१०॥ प्रतिज्ञातस्त्वया वीर दंडकारण्यवासिनां॥ ऋषीणां रक्षणार्थाय वधः संयति रक्षसां॥११॥ एतन्निमित्तं वचनं दं
डकाइति विश्रुतं॥ प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः॥१२॥ ततस्त्वां प्रस्थितं दृष्ट्वा मम चिंताकुलं मनः॥ त्वद्वृत्तं चिंत
यंत्या वै भवेन्निश्रेयसं हितं॥१३॥ न हि मे रोचते वीर गमनं दंडकान्प्रति॥ कारणं तव वक्ष्यामि वदंत्याः श्रूयतां मया॥१४॥ त्वं हि बा
ण धनुष्पाणिर्भ्रात्रा सह वनं गतः॥ दृष्ट्वा वनचरान्घोरान्कच्चिद्विकुर्याः शरव्ययं॥ क्षत्रियाणामपि धनुर्हुताशस्येंधनानि च
॥१५॥ समीपतः स्थितं तेजो बलमुच्छ्रयते भृशं॥ पुरा किल महाबाहो तपस्वी सत्यवान्शुचिः॥१६॥ कस्मिंश्चिदभवत्पुण्ये वने रतमृग
द्विजे॥ तस्यैव तपसो विघ्नं कर्तुमिंद्रः शचीपतिः॥१७॥ खड्गपाणिरथागच्छदाश्रमं भटरूपधृक्॥ तस्मिंस्तदाश्रमपदे निशितः खड्ग
उत्तमः॥१८॥ संन्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः॥ स तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः॥१९॥ वने तु विचरत्येव रक्षन्प्रत्य
यमात्मनः॥ यत्र गच्छत्युपादातुं मूलानि च फलानि च॥२०॥ न विना याति तं खड्गं न्यासरक्षणतत्परः॥ नित्यं शस्त्रं परिवहन्क्रमेण

॥रा॰आ॰ ॥९॥

सतपोधनः॥२१॥चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयं॥ततः स रौद्राभिरतः प्रमत्तोधर्मकर्षितः॥२२॥तस्य शस्त्रस्य संवासा-
ज्जगाम नरकं मुनिः॥एवमेतत्पुरावृत्तं शस्त्रसंयोगकारणं॥२३॥अग्निसंयोगवद्धेतुः शस्त्रसंयोग उच्यते स्नेहाच्च बहुमानाच्च स्मा-
रये त्वां न शिक्षये॥२४॥न कथंचन सा कार्या गृहीतधनुषा त्वया॥बुद्धिर्वैरं विना हंतुं राक्षसान्दंडकाश्रितान्॥२५॥अपराधं विना
हंतुं लोकान्वीर न कामये॥क्षत्रियाणां तु वीराणां वनेषु नियतात्मनां॥२६॥धनुषा कार्यमेतावदार्त्तानामभिरक्षणं॥क्व च शस्त्रं
क्व च वनं क्व च क्षात्रं तपः क्व च॥२७॥व्याविद्धमिदमस्माकं देशधर्मस्तु पूज्यतां॥तदार्य कलुषा बुद्धिर्जायते शस्त्रसेवनात्॥२८॥पु-
नर्गत्वा त्वयोध्यायां क्षत्रधर्मं चरिष्यसि॥२९॥अक्षया तु भवेत्प्रीतिः श्वश्रूश्वसुरयोर्मम यदि राज्यं हि संन्यस्य भवेस्त्वं निरतो मुनिः
॥३०॥धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखं॥धर्मेण लभते सर्वं धर्मसारमिदं जगत्॥३१॥आत्मानं नियमैस्तैस्तैः कर्शयित्वा प्रयत्नतः॥
प्राप्यते निपुणैर्धर्मो न सुखाल्लभ्यते सुखं॥३२॥नित्यं शुचिमतिः सौम्य चर धर्मं तपोवने॥सर्वं तु विदितं तुभ्यं त्रैलोक्ये यद्विवर्त्त-
ते॥३३॥स्त्रीचापलादेतदुदाहृतं मे धर्मं च वक्तुं तव कः समर्थः॥विचार्य बुद्ध्या तु सहानुजेन यद्रोचते तत्कुरु माचिरेण॥३४॥इत्यार्षे
श्रीरामायणे वाल्मीकीये आरण्यकांडे नवमः सर्गः॥९॥वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया॥श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचा- ॥राम॥
थ जानकीं॥१॥हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः॥कुलं व्यपदिशंत्या च जनकस्य महात्मनः॥२॥किं नु वक्ष्याम्यहं देवि त्वयैवोक्तमि ॥९॥

दंवचः॥ क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति॥ ३॥ ते चार्ता दंडकारण्ये मुनयः संशितव्रताः। मां सीते स्वयमागम्य शरण्याः श
रणं गताः॥ ४॥ वसंतो धर्मनिरता वने मूलफलाशनाः॥ न लभंते सुखं भीरु राक्षसैः क्रूरकर्मभिः॥ ५॥ सर्वकालेषु निरता नियमैर्विवि
धैर्युताः॥ भक्ष्यंते राक्षसैर्भीमैर्नरमांसोपजीविभिः॥ ६॥ ते भक्ष्यमाणा मुनयो दंडकारण्यवासिनः॥ अस्मानभ्यवपद्येति मामूचु
र्द्विजसत्तमाः॥ ७॥ मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतं। कृत्वा वचनशुश्रूषां वाक्यमेतदुदाहृतं॥ ८॥ प्रसीदंतु भवंतो मे ह्रीरे
षा हि ममातुला॥ यदीदृशैरुपस्थेयैरहं विप्रैरुपस्थितः॥ ९॥ किं करोमीति च मया व्याहृतं मुनिसन्निधौ॥ सर्वैरेव समागम्य वा
गियं समुदाहृता॥ १०॥ राक्षसैर्दंडकारण्ये बहुभिः कामरूपिभिः। अर्दितास्म भृशं राम भवान्नस्त्रातुमर्हति॥ ११॥ होमकाले तु संप्रा
प्ते पर्वकालेषु चानघ॥ धर्षयंति स्म दुर्द्धर्षा राक्षसाः पिशिताशनाः॥ १२॥ राक्षसैर्द्धर्षितानां च तापसानां तपस्विनां॥ गतिं मृगयमा
णानां भवान्नः परमा गतिः॥ १३॥ कामं तपःप्रभावेन शक्ता हंतुं निशाचरान्॥ चिरार्जितं तु नेच्छामस्तपः खंडयितुं वयं॥ १४॥ बहुविघ्नं
तपो नित्यं दुश्चरं चैव राघव। तेन शापं न मुंचामो भक्ष्यमाणाश्च राक्षसैः॥ १५॥ तदर्द्यमानान्रक्षोभिर्दंडकारण्यवासिनः॥ रक्ष नस्त्वं
सह भ्रात्रा त्वंनाथा हि वयं मुने॥ १६॥ मया चैतद्वचः श्रुत्वा कार्त्स्न्येन परिपालनं॥ ऋषीणां दंडकारण्ये संश्रुतं जनकात्मजे॥ १७॥ संश्रु
त्य च न शक्ष्यामि जीवमानः प्रतिश्रवं। मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा॥ १८॥ अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणां॥ न तु

॥रा० आ० ॥
॥२०॥

प्रतिज्ञांसंश्रुत्यब्राह्मणेभ्योविशेषतः॥१९॥तदवश्यंमयाकार्यमृषीणांपरिपालनं॥अनुक्तेनापिवैदेहिप्रतिज्ञायाथकिंपुनः॥२०॥
ममस्नेहच्चसौहार्दादिदमुक्तंत्वयावचः॥परितुष्टोस्म्यहंसीतेनह्यनिष्टोऽनुशिष्यते॥२१॥सदृशंचानुरूपंचकुलस्यतवशोभने॥स
धर्मचारिणीमेत्वंप्राणेभ्योपिगरीयसी॥२२॥इत्येवमुक्त्वावचनंमहात्मासीतांप्रियांमैथिलराजपुत्रीं॥रामोधनुष्मान्सहलक्ष्मणे
नजगामरम्याणितपोवनानि॥२३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेदशमःसर्गः॥१०॥अग्रतःप्रययौरामःसीताम
ध्येसुमध्यमा॥पृष्ठतस्तुधनुष्पाणिर्लक्ष्मणोनुजगामह॥तौपश्यमानौविविधान्शैलप्रस्थान्वनानिच॥नदीश्चविविधारम्या
जग्मतुःसहसीतया॥२॥सारसांश्चक्रवाकांश्चनदीपुलिनचारिणः॥सरांसिचसपद्मानियुतानिजलजैःखगैः॥३॥यूथबद्धांश्चपृ
षतान्मदोन्मत्तान्विषाणिनः॥महिषांश्चवराहांश्चगजांश्चद्रुमवैरिणः॥४॥तेगत्वादूरमध्वानंलंबमानेदिवाकरे॥ददृशुःसहिता
रम्यंतटाकंयोजनायतं॥५॥पद्मपुष्करसंबाधंगजयूथैरलंकृतं॥सारसैर्हंसकादंबैःसंकुलंजलजातिभिः॥६॥प्रसन्नसलिलेर
म्येतस्मिन्सरसिशुश्रुवे॥गीतवादित्रनिर्घोषस्तत्रकश्चिन्नदृश्यते॥७॥ततःकौतूहलाद्रामोलक्ष्मणश्चमहाबलः॥मुनिंधर्म
भृतंनामप्रष्टुंसमुपचक्रमे॥८॥इदमत्यद्भुतंदृष्ट्वासर्वेषांनोमहामुने॥कौतूहलंमहज्जातंकिमेतत्साधुकथ्यतां॥९॥तेनैवमु
क्तोधर्मात्माराघवेणमुनिस्तदा॥प्रभावंसरसःकृत्स्नमाख्यातुमुपचक्रमे॥१०॥इदंपंचाप्सरोनामतटाकंसार्वकामिकं॥निर्मितं

॥राम॥
॥२०॥

तपसारामसुनिनामांडकर्णिना॥११॥सहितेपेतपस्तीव्रंमांडकर्णिर्महामुनिः॥दशवर्षसहस्राणिवायुभक्षोजलाशयः॥१२
ततःप्रव्यथिताःसर्वेदेवाःसाग्निपुरोगमाः॥अब्रुवन्वचनंसर्वेपरस्परसमागताः॥१३॥अस्माकंकस्यचित्स्थानमेषप्रा
र्थयतेमुनिः॥इतिसंविग्नमनसःसर्वेतत्रदिवौकसः॥ततःकर्तुंतपोविघ्नंदेवैःसर्वैर्नियोजिताः॥प्रधानाप्सरसःपंचवि
द्युच्चलितवर्चसः॥१४॥अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः॥नीतोमदनवश्यत्वंदेवानांकार्यसिद्धये॥१५॥ताश्चैवाप्सर
सःपंचमुनेःपत्नीत्वमागताः॥तटाकेनिर्मितंतासांतस्मिन्नंतर्हितंगृहं॥१६॥तत्रैवाप्सरसःपंचनिवसंत्योयथासुखं॥रमयंति
तपोयोगान्मुनिंयौवनमास्थितं॥१७॥तासांसंक्रीडमानानामेषवादित्रनिस्वनः॥श्रूयतेभूषणोन्मिश्रोगीतशब्दोमनोहरः॥१८
आश्चर्यमितितस्यैतद्वचनंभावितात्मनः॥राघवःप्रतिजग्राहसहभ्रात्रामहायशाः॥१९॥एवंकथयमानस्यसहभ्रात्रामहा
मुनेःअग्रतोरमणीयंसददर्शाश्रममंडलं॥कुशचीरपरिक्षिप्तंनानावृक्षसमाकुलं॥२०॥प्रविश्यसहवैदेह्यालक्ष्मणेनचरा
घवः॥उवाससुनिभिःसर्वैःपूज्यमानोमहात्मभिः॥२१॥तदातस्मिन्सकाकुत्स्थःश्रीमत्याश्रममंडले॥उषित्वातुसुखंतत्रपूज्य
मानोमहर्षिभिः॥२२॥जगामचाश्रमांस्तेषांपर्यायेणतपस्विनां॥येषामुषितवान्सर्वंसकाशेसुमहास्त्रवित्॥२३॥क्वचित्परिद
शान्मासानेकंसंवत्सरंक्वचित्॥क्वचिच्चचतुरोमासान्पंचषट्चापरान्क्वचित्॥२४॥अपरत्राधिकान्मासानध्यर्द्धमधिकंक्वचि

 त्॥ त्रिमासानष्टमासांश्च राघवोन्यवसत्सुखं॥२६॥ ततः संवसतस्तस्य मुनीनामाश्रमेषु च। रमतश्चानुकूल्येन ययुः संवत्सरा
 दश॥२७॥ परिवृत्य स धर्मज्ञो राघवः सह सीतया। सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह॥२८॥ स तमाश्रममागम्य मुनिभिः पू
जितस्तदा। तत्रापि न्यवसद्रामः कंचित्कालमरिंदमः॥२९॥ अथाश्रमस्थो विनयात्कदाचित्तं महामुनिं। उपासीनः स काकुत्स्थः
सुतीक्ष्णमिदमब्रवीत्॥३०॥ अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः। वसतीति मया नित्यं कथाः कथयतां श्रुतं॥३१॥ न हि जा
नामि तं देशं वनस्यास्य महत्तया। यत्राश्रमपदं रम्यं महर्षेस्तस्य धीमतः॥३२॥ प्रसादात्तत्र भवतः सानुजः सह सीतया। अग
स्त्यमभिगच्छेयमभिवादयितुं मुनिं॥३३॥ मनोरथो महानेष हृदि संपरिवर्तते। यदहं तं मुनिवरं शुश्रूषेयमपि स्वयं॥३४॥ इति
रामस्य तच्छ्रुत्वा धर्मात्मा मुनिसत्तमः। सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजं॥३५॥ अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणं
अगस्त्यम भिगच्छेति सीतया सह राघव॥३६॥ दिष्ट्या त्विदानीमर्थेस्मिन्स्वयमेव ब्रवीषि मां॥ अहमाख्यामि ते राम यत्राग
स्त्यो महामुनिः॥३७॥ योजनान्याश्रमात्तात याहि चत्वारि वै ततः। दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातुराश्रमः॥३८॥ स्थलप्राये वनो
द्देशे पिप्पलीवनशोभिते। बहुपुष्पफले रम्ये नानाशकुनिनादिते॥३९॥ पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाः शिवाः। हंसकारं 
डवाकीर्णाः चक्रवाकैरलंकृताः॥४०॥ तत्रैकां रजनीमुष्य प्रभाते राम गम्यतां। दक्षिणां दिशमास्थाय वनखण्डस्य पार्श्वतः॥४१॥ त 

तोगस्त्याश्रमपदं गत्वा योजनमंतरं ॥ रमणीये वनोद्देशे वहुपादपसंवृते ॥ ४२ ॥ रंस्यते तत्र वैदेही लक्ष्मणश्च सहत्वया ॥ सहि
रम्यो वनोद्देशो वहुपादपसंकुलः ॥ ४३ ॥ यदि वुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिं ॥ अद्यैव गमने बुद्धिं रोचयस्व महामते ॥ ४४ ॥ इति
रामो मुनेः श्रुत्वा सह भ्रात्राभिवाद्य च ॥ प्रतस्थेगस्त्यमुद्दिश्य सानुजः सह सीतया ॥ ४५ ॥ पश्यन्‌ वनानि रम्याणि पर्वतांश्चाभ्रस
न्निभान्‌ ॥ सरांसि सरितश्चैव समान्‌ निविविधानि च ॥ ४६ ॥ सुतीक्ष्णेनोपदिष्टेन गत्वा तेन यथासुखं ॥ इदं परमसंहृष्टो वाक्यं लक्ष्म
णमव्रवीत्‌ ॥ ४७ ॥ एतदेवाश्रमपदं नूनं तस्य महात्मनः ॥ अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥ ४८ ॥ यथा ही मे वनस्यास्य ज्ञाताः स्प
पथि सहस्रशः ॥ सन्नता फलभारेण पुष्पभारेण च द्रुमाः ॥ ४९ ॥ पिप्पलीनां च पक्वानां वनादस्मादुपागतः ॥ गंधोयं पवनोत्क्षिप्तः
सहसा कटुकोदयः ॥ ५० ॥ तत्र तत्र च दृश्यंते संक्षिप्ताः काष्ठसंचयाः ॥ लूनाश्च पथि दृश्यंते दर्भा वैडूर्यवर्चसः ॥ ५१ ॥ एतच्च वनम
ध्यस्थं कृष्णाभ्रशिखरोपमं ॥ पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ॥ ५२ ॥ विविक्तेषु च तीर्थेषु कृतस्नाना महर्षयः ॥ पुष्पोप
हारान्‌ कुर्वंति कुसुमैः स्वयमर्जितैः ॥ ५३ ॥ तत्सुतीक्ष्णस्य वचनं यथा सौम्य मया श्रुतं ॥ अगस्त्यस्याश्रमो भ्रातुर्नूनमेव भविष्यति ॥ ५४
निगृह्य तपसा मृत्युं लोकानां हितकाम्यया ॥ यस्य भ्रात्रा त्राकृतेयं दिक्‌ शरण्या पुण्यकर्मणा ॥ ५५ ॥ इहैकदा किल क्रूरो वातापिरपि
वेल्वलः ॥ भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५६ ॥ धारयन्‌ ब्राह्मणं रूपं इल्वलः संस्कृतं वदन्‌ ॥ आमंत्रयति विप्रान्सः श्रा

॥रा० आ०॥ इमुद्दिश्यनिर्घृणः॥५७॥भ्रातरंसंस्कृतंकृत्वाततस्तंमेषरूपिणं।द्विजातीन्भोजयामासशास्त्रदृष्टेनकर्मणा॥५८॥ततोभुक्तव
॥१२॥ तांतेषांविप्राणामिल्वलोब्रवीत्।वातापेनिष्क्रमस्वेतिस्वरेणमहतावदन्॥५९॥ततोभ्रातुर्वचःश्रुत्वावातापिर्मेषवन्नदन्।भित्वा
भित्वाशरीराणिब्राह्मणानांविनिष्पतत्॥६०॥ब्राह्मणानांसहस्राणितैरेवंकामरूपिभिः।विनाशितानिसंहत्यनित्यशःपिशिताश
नैः॥६१॥अगस्त्येनतदादेवैःप्रार्थितेनमहर्षिणा।अनुभूयकिलश्राद्धेभक्षितःसनिशाचरः॥६२॥ततःसंपन्नमित्युक्त्वादत्वाहस्ताव
सेचनं।भ्रातरंनिष्क्रमस्वेतिइल्वलःसोभ्यभाषत॥६३॥तंतदाभाषमाणंतुभ्रातरंविप्रघातिनं।अब्रवीत्प्रहसन्धीमानगस्त्योमु
निपुंगवः॥६४॥कुतोनिःक्रमितुंशक्तिर्मयाजीर्णस्यराक्षस।भ्रातुस्तेमेषरूपस्यगतस्ययमसादनं॥६५॥अथतद्वचनंश्रुत्वाभ्रातुर्नि
धनसंश्रितं।प्रधर्षयितुमारेभेमुनिंक्रोधान्निशाचरः॥६६॥सोभिद्रवद्द्विजेंद्रंतंमुनिनादीप्ततेजसा।चक्षुषानलकल्पेननिर्दग्धो
निधनंगतः॥६७॥तस्यायमाश्रमोभ्रातुस्तटाकवनशोभितः।विप्रानुकंपयायेनकर्मेदंदुष्करंकृतं॥६८॥एवंकथयमानस्यतस्य
सौमित्रिणासह।रामस्यास्तंगतःसूर्यःसंध्याकालोभ्यवर्त्तत॥६९॥उपास्यपश्चिमांसंध्यांसहभ्रात्रायथाविधि।प्रविवेशाश्रमप
दंतमृषिंचाभ्यवादयत्॥७०॥सम्यक्प्रतिगृहीतःसमुनिनातेनराघवः।न्यवसत्तांनिशामेकांप्राश्यमूलफलानिच॥७१॥तस्यांरात्र्यां ॥राम॥
व्यतीतायामुदितेसूर्यमंडले।भ्रातरंतमगस्त्यस्यआमंत्रयतराघवः॥७२॥अभिवादयेत्वांभगवन्सुखमस्म्युषितोनिशां।आमं ॥१२॥

त्रयित्वागच्छामिगुरुंतंद्रष्टुमग्रजं॥७३॥गम्यतामितितेनोक्तोजगामरघुनंदनः॥यथोद्दिष्टेनमार्गेणवनंतच्चावलोकयन्॥७४
नीवारांस्तिमिषांश्चैवपनसान्वंजुलान्धवान्।चिरिबिल्वान्मधूकांश्चप्रकीर्यमपितिंदुकान्॥७५॥पुष्पितान्पुष्पिताग्रा
भिर्लताभिःपरिवेष्टितान्॥ददर्शरामःशतशस्तत्रकांतारपादपान्॥७६॥हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान्॥मत्तैःशकु
निसंघैश्चशतशःप्रविनादितान्॥७७॥ततोब्रवीत्समीपस्थंरामोराजीवलोचनः।पृष्टतोनुगतंवीरंलक्ष्मणंलक्ष्मिवर्द्धनं॥७८॥
स्निग्धपत्रायथावृक्षायथाक्षांतामृगद्विजाः॥आश्रमोनातिदूरस्थोमहर्षेर्भावितात्मनः॥७९॥अगस्त्यइतिविख्यातोलोकेस्वे
नैवकर्मणा॥आश्रमोदृश्यतेतस्यपरिश्रांतश्रमापहः॥८०॥आज्यधूमाकुलवनश्चीरमालापरिष्कृतः॥प्रशांतमृगयूथश्चनाना
शकुनिसंकुलः॥८१॥निगृह्यतरसामृत्युंलोकानांहितकाम्यया॥दक्षिणादिक्कृतायेनशरण्यापुण्यकर्मणा॥८२॥तस्येतदाश्रमप
दंप्रभावाद्यस्यराक्षसैः॥दिगियंदक्षिणात्रासात्दृश्यतेनोपभुज्यते॥८३॥यदाप्रभृतिचाक्रांतादिगियंपुण्यकर्मणा॥तदाप्रभृति
निर्वैराःप्रशांतारजनीचराः॥८४॥नाम्नाचेयंभगवतोदक्षिणादिक्प्रदक्षिणा॥प्रथितात्रिषुलोकेषुदुर्द्धर्षाक्रूरकर्मभिः॥८५॥मार्गं
निरोद्धुंसततंभास्करस्याचलोत्तमः॥संदेशंपालयन्यस्यविंध्यशैलोनवर्द्धते॥८६॥अयंदीर्घायुषस्तस्यलोकेविश्रुतकर्मणः॥अ
गस्त्यस्याश्रमःश्रीमान्विनीतमृगसेवितः॥८७॥एषलोकार्च्चितःसाधुर्हितेचाभिरतःसतां॥अस्मानिहागतानेषःश्रेयसायोजयिष्य

॥रा०आ०॥ ति॥८८॥आराधयिष्याम्यत्राहमगस्त्यं तंमहामुनिं। शेषंचवनवासस्यसौम्यवत्स्याम्यहंसुखं॥८९॥अत्रदेवाःसगंधर्वाःसि
॥२३॥ द्धाश्चपरमर्षयः॥अगस्त्यंनियताहारंसततंपर्युपासते॥९०॥नात्रजीवेन्मृषावादीक्रूरोवायदिवाशठः। नृशंसःकामवृत्तोवा
मुनिरेषतथाविधः॥९१॥अत्रदेवाश्चयक्षाश्चनागाश्चपतगैःसह॥वसंतिनियताहाराधर्ममाराधयिष्णवः॥९२॥अत्रसिद्धा
महात्मानोविमानैःसूर्यसन्निभैः॥त्यक्त्वादेहान्नवैर्देहैःस्वर्यातापरमर्षयः॥९३॥यक्षत्वममरत्वंचराज्यानिविविधानिच॥
अत्रदेवाःप्रयच्छंतिभूतैराराधिताःशुभैः॥९४॥आगताःस्माश्रमपदंसौमित्रेप्रविशाग्रतः। निवेदयस्वमांप्राप्तंऋषयेसह
सीतया॥९५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेएकादशःसर्गः॥११॥सप्रविश्याश्रमपदंलक्ष्मणोराघवानुजः
अगस्त्यशिष्यमासाद्यवाक्यमेतदुवाचह॥१॥राजादशरथोनामज्येष्ठस्तस्यसुतोबली। रामःप्राप्तोमुनिंद्रष्टुंसीतयासहभा
र्यया॥२॥लक्ष्मणोनामतस्याहंभ्राताત्ववरजोहितः। अनुरक्तश्चभक्तश्चयदितेश्रोत्रमागतः॥३॥अत्रगायत्री। तेवयंवनम
त्युग्रंप्रविष्टाःपितृशासनात्॥द्रष्टुमिच्छामहेसर्वेभगवंतंनिवेद्यतां॥४॥तस्यतद्वचनंश्रुत्वालक्ष्मणस्यतपोधनः॥तथेत्युक्त्वाग्नि
शरणंप्रविवेशनिवेदितुं॥५॥सप्रविश्यमुनिश्रेष्ठंतपसाद्योतितप्रभं कृतांजलिरुवाचेदंवचनंव्यक्तयागिरा॥६॥यथोक्तंल ॥राम॥
क्ष्मणेनैवशिष्योगस्त्यस्यसंमतः॥पुत्रोदशरथस्यासौरामोनाममहायशाः॥७॥सहभ्रात्राश्रमपदंसीतयासहभार्यया॥द्रष्टुंभवं ॥२३॥

तमायातःशुश्रूषार्थमरिंमः॥८॥यद्त्रानंतरंतत्वमाज्ञापयितुमर्हसि॥ततःशिष्यादुपश्रुत्यप्राप्तंरामंसलक्ष्मणं॥९॥वैदेहीं
चमहाभागामिदंवचनमब्रवीत्॥दिष्ट्यारामश्चिरस्याद्यद्रष्टुंमांसमुपागतः॥१०॥मनसाकांक्षितंह्यस्यमयाप्यागमनंस्वयं॥
गम्यतांसत्कृतोरामःसभार्यःसहलक्ष्मणः॥११॥प्रवेश्यतांसमीपंमेकिंचासौनप्रवेशितः॥एवमुक्तस्तमुनिनाधर्मज्ञेनमहा
त्मना॥१२॥अभिवाद्याब्रवीच्छिष्यस्तथेतिनियतांजलिः॥ततोनिःक्रम्यसंभ्रांतःशिष्योलक्ष्मणमब्रवीत्॥१३॥कासौरामोमु
निंद्रष्टुमेतुप्रविशतुस्वयं॥ततोगत्वाश्रमपदंशिष्येणसहलक्ष्मणः॥१४॥दर्शयामासकाकुत्स्थंसीतांचजनकात्मजां॥तंशिष्यःप्र
श्रितंवाक्यमगस्त्यवचनंब्रुवन्॥१५॥प्रावेशयद्यथान्यायंसत्कारार्हंसुसत्कृतं॥प्रविवेशततोरामःसीतयासहलक्ष्मणः॥१६॥
प्रशांतहरिणाकीर्णमाश्रमंह्यवलोकयन्॥तत्रतुब्रह्मणःस्थानमग्नेःस्थानंतथैवच॥१७॥विष्णोःस्थानंमहेंद्रस्यस्थानंचैववि
वस्वतः॥सोमस्थानंभगस्थानंकौवेरस्थानमेवच॥१८॥धातुर्विधातुःस्थानंचवायोःस्थानंतथैवच॥स्थानंचपाशहस्तस्यवरुण
स्यमहात्मनः॥१९॥स्थानंतथैवगायत्र्यावसूनांस्थानमेवच॥स्थानंचनागराजस्यगरुडस्यतथैवच॥२०॥कार्त्तिकेयस्यचस्थानंध
र्मस्थानंचपश्यति॥ततःशिष्यैःपरिवृतोमुनिरप्यभिनिष्पतत्॥२१॥तंददर्शाग्रतोरामोमुनीनांदीप्ततेजसां॥अब्रवीद्वचनंरामोल
क्ष्मणंलक्ष्मिवर्द्धनं॥२२॥एषलक्ष्मणनिष्क्रामत्यगस्त्योभगवानृषिः॥औदार्येणाभिगच्छामितपसोराशिमुत्तमं॥२३॥एवमुक्त्वाम

॥रा॰आ॰॥ ह्वावाहुरगस्त्यं सूर्यवर्चसं। जग्राह परमप्रीतस्तस्य पादौ परंतपः॥२४॥ अभिवाद्य तु धर्मात्मा तस्थौ रामः कृतांजलिः। सीतया सह वै
॥२४॥ देह्या तदा रामः सलक्ष्मणः॥२५॥ प्रतिगृह्य च काकुत्स्थमर्चयित्वासनोदकैः। कुशलप्रश्नमुक्त्वा तमास्यतामिति सोऽब्रवीत्॥२६॥ अ
ग्निं हुत्वा प्रदायार्घ्यमतिथीन्प्रतिपूज्य च। वानप्रस्थेन धर्मेण न तेषां भोजनं ददौ॥२७॥ प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुंगवः। उ
वाच राममासीनं प्रांजलिं धर्मकोविदं॥२८॥ अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन्। दुःसाक्षीव परे लोके स्वानि मांसानि भ
क्षयेत्॥२९॥ राजा सर्वस्य लोकस्य धर्मचारी महारथः। पूजनीयश्च मान्यश्च भवान् प्राप्तः प्रियातिथिः॥३०॥ एवमुक्त्वा फलैर्मूलैः पुष्पै
रन्यैश्च राघवं। पूजयित्वा यथाकामं पुनरेवाब्रवीद्वचः॥३१॥ इदं दिव्यं महच्चापं हेमरत्नविभूषितं। वैष्णवं पुरुषव्याघ्र निर्मितं
विश्वकर्मणा॥३२॥ अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः। दत्तो मम महेंद्रेण तूणी चाक्षयसायकौ॥३३॥ संपूर्णौ निशितैर्बाणै
र्ज्वलद्भिरिव पावकैः। महारजतकोशोयमसिर्हेमविभूषितः॥३४॥ अनेन धनुषा राम हत्वा संख्ये महासुरान्। आजहार श्रियं दीप्तां
पुरा विष्णुर्दिवौकसां॥३५॥ तद्धनुस्तौ च तूणीरौ शरं खड्गं च मानद। जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा॥३६॥ एवमुक्त्वा महाते
जाः समस्तं तद्वरायुधं। दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत्॥३७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे द्वादशः स ॥राम॥
र्गः॥१२॥ राम प्रीतोस्मि भद्रं ते परितुष्टोस्मि लक्ष्मण। अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया॥१॥ अध्वश्रमेण वां खेदो बाधते प्र ॥२५॥

चुरःश्रमः॥व्यक्तमुत्कंठतेदेवीमैथिलीजनकात्मजा॥२॥एषाचसुकुमारीचखेदैश्चनविमानिता।प्राज्यदोषंवनंप्राप्ताभर्तृस्नेहप्रचो ६
दिता॥३॥यथैषारमतेरामइहसीतातथाकुरु॥दुष्करंकृतवत्येषावनेत्वामनुगच्छती॥४॥एषाहिप्रकृतिःस्त्रीणामासृष्टेरघुनंद
न॥समस्थमनुरज्यंतेविषमस्थंत्यजंतिच॥५॥शतह्रदानांलोलत्वंशस्त्राणांतीक्ष्णतांतथा॥गरुडानिलयोःशैघ्र्यमनुगच्छंतियो
षितः॥६॥इयंतुभवतोभार्यादोषैरेतैर्विवर्जिता॥श्लाघ्याचव्यपदेश्याचयथादेवीत्वरुंधती॥७॥अलंकृतोयंदेशश्चयत्रसौमि
त्रिणासह॥वैदेह्याचानयारामवत्स्यसित्वमरिंदम॥८॥एवमुक्तःसमुनिनाराघवःसंयतांजलिः॥उवाचप्रश्रितंवाक्यंऋषिं
दीप्तमिवानलं॥९॥धन्योस्म्यनुगृहीतोस्मियस्यमेमुनिपुंगवः॥गुणैःसभ्रातृभार्यस्यवरदःपरितुष्यसि॥१०॥किंतुव्यादिशमेदेशं
सोदकंबहुकाननं॥यत्राश्रमपदंकृत्वावसेयंनिरतःसुखं॥११॥ततोब्रवीन्मुनिश्रेष्ठःश्रुत्वारामस्यभाषितं॥ध्यात्वामुहूर्तंधर्मा
त्माधीरोधीरतरंवचः॥१२॥इतोद्वियोजनेतातबहुमूलफलोदकः।देशोबहुमृगःश्रीमान्पंचवट्यभिविश्रुतः॥१३॥तत्रगत्वाश्र
मपदंकृत्वासौमित्रिणासह॥वैदेह्याचानयारामवत्स्यसित्वमरिंदम॥१४॥रमस्वत्वंपितुर्वाक्यंयथोक्तमनुपालयन्॥विदितो
प ह्येषवृत्तांतोममसर्वस्तवानघ॥१५॥तपसश्चप्रभावेनस्नेहाद्दशरथस्यच॥हृदयस्थश्चतेछंदोविज्ञातस्तपसामया॥१६॥इहवासं
प्रतिज्ञायमयासहतपोवने॥वसंतंत्वांजनाःसर्वेज्ञास्यंतिरघुनंदन॥१७॥अतश्चत्वामहंब्रूमिगच्छपंचवटीमिति॥सहिरम्योवनोद्दे

॥ रा०आ० ॥ शो मैथिली तत्र रंस्यते ॥ स देशः श्लाघनीयश्च नातिदूरे च राघव ॥१८॥ गोदावर्याः समीपे च मैथिली तत्र रंस्यते । प्राज्यमूलफलैश्चैव
॥२५॥ नानाद्विजगणैर्युतः ॥१९॥ विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च ॥ भवानपि सदारश्च शक्तश्च परिरक्षणे ॥२०॥ अपि चात्र वसन्रा
मतापसान्पालयिष्यसि ॥ एतदालक्ष्यते वीर मधूकानां महद्वनं ॥२१॥ उत्तरेणास्य गंतव्यं न्यग्रोधमभिगच्छता ॥ ततः स्थलमुपारुह्य
पर्वतस्याविदूरतः ॥२२॥ ख्यातः पंचवटीत्येव नित्यपुष्पितकाननः ॥ अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह ॥२३॥ सत्कृत्यामंत्र
यामास तमृषिं सत्यवादिनं ॥ तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवंदनौ ॥२४॥ तमाश्रमं पंचवटीं जग्मतुः सह सीतया ॥ गृहीतचापौ
तु नराधिपात्मजौ विषक्ततूणी समरेष्वकातरौ । यथोपदिष्टेन यथा महर्षिणा प्रजग्मतुः पंचवटीं समाहितौ ॥२५॥ इत्यार्षे
श्रीरामायणे वाल्मीकीये आरण्यकांडे त्रयोदशः सर्गः ॥१३॥ अथ पंचवटीं गच्छन्नंतरा रघुनंदनः । आससाद महाकायं गृध्रं
भीमपराक्रमं ॥१॥ तं दृष्ट्वा तौ महाभागौ वटस्थं रामलक्ष्मणौ ॥ मेनाते राक्षसं क्षिप्रं ब्रुवाणौ को भवानिति ॥२॥ स तौ मधुरया वा
चा सौम्यया प्रीणयन्निव ॥ उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः ॥३॥ स तं पितृसखं बुद्ध्वा पूजयामास राघवः ॥ स तस्य कु
लमव्यग्रमथ पप्रच्छ नाम च ॥४॥ रामस्य वचनं श्रुत्वा कुलमात्मानमेव च ॥ आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवं ॥५॥ पूर्वका ॥ राम ॥
ले महाबाहो ये प्रजापतयो भवन् ॥ तान्मे निगदतः सर्वानादितः शृणु राघव ॥६॥ कर्दमः प्रथमस्तेषां विक्रीतस्तदनंतरं ॥ शेष ॥२५॥

श्चसुश्रवाश्चैववहुपुत्रश्चवीर्यवान्॥ ७॥ स्थाणुर्मरीचिरत्रिश्चक्रतुश्चैवमहावलः। पुलस्त्यश्चांगिराश्चैवप्रचेताःपुलहस्त
था॥ ८॥ दक्षोविवस्वानवरोरिष्टनेमिश्चराघव। काश्यपश्चमहातेजातेषामासीच्चपश्चिमः॥ ९॥ प्रजापतेस्तुदक्षस्यवभूवुरितिनः
श्रुतं। षष्टिर्दुहितरोरामयशस्विन्योमहायशः॥ १०॥ काश्यपःप्रतिजग्राहतासामष्टौसुमध्यमाः। अंगिरास्त्वपराराम कन्याः
त्रसगृहीत्तदा॥ ११॥ अदितिंचदितिंचैवदनूमप्यथकालिकां। ताम्रांक्रोधवशांचैवमनुंचाप्यनलामपि॥ १२॥ तास्तुकन्यास्त
तःप्रीतःकाश्यपःपुनरव्रवीत्। पुत्रांस्त्रैलोक्यभर्तॄन्वैजनयिष्यथमत्समान्॥ १३॥ अदितिस्तन्मनामैरोदितिश्चदनुरेवच
कालिकाचमहावाहोशेषास्त्वमनसोभवन्॥ १४॥ अदित्यांजज्ञिरेदेवास्त्रयस्त्रिंशदरिंदम। आदित्यावसवोरुद्राअश्विनौच
परंतप॥ १५॥ दितिस्त्वजनयत्पुत्रांदैत्यांस्तातयशस्विनः। तेषामियंवसुमतीपुरासीत्सवनार्णवा॥ १६॥ दनुस्त्वजनयत्पुत्रमश्व
ग्रीवमरिंदम। नरकंकालिकंचैवकालिकापिव्यजायत॥ १७॥ क्रौंचीभासींतथाश्येनींधृतराष्ट्रींतथाशुकीं। ताम्रापितुसुतावेक
न्यापंचैतालोकविश्रुता॥ १८॥ उलूकान्जनयत्क्रौंचीभासीभासान्व्यजायत। श्येनीश्येनांश्चगृध्रांश्चव्यजायतसुतेजसः॥ १९॥ धृ
तराष्ट्रीतुहंसांश्चकलहंसांश्चसर्वशः। चक्रवाकांश्चभद्रंतेविजज्ञेसाचभामिनी॥ २०॥ शुकीनतांविजज्ञेसाननतायांविनतासुता
दश। क्रोधवशाराम विजज्ञेप्यात्मसंभवान्॥ २१॥ मृगींचमृगमंदांचहरिंभद्रमदामपि। मातंगीमथशार्दूलींश्वेतांचसुरभिंतथा। स

 सर्वलक्षणसंपन्नां सुरसां कद्रुकामपि॥ अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम॥२३॥ ऋक्षाश्च मृगमंदायाः सृमराश्चमरास्तथा। तत
 स्त्विरावती नाम जज्ञे भद्रमदा सुता॥२४॥ तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः। हर्य्याश्च हरयोपत्यं वानराश्च तरस्विनः॥२५
गोलांगूलांश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान्॥ मातंगास्त्वथ मातंग्या अपत्यं मनुजर्षभ॥२६॥ दिशागजं तु काकुत्स्थ श्वेताप्यजन
यत्सुतं। ततो दुहितरौ राम सुरभिर्देव्यजायत॥२७॥ रोहिणीं नाम भद्रं ते गंधर्वीं च यशस्विनीं॥ रोहिण्यजनयद्गा वै गंधर्वी वा
जिनः सुतान्॥२८॥ सुरसाजनयन्नागान् राम कद्रूस्तु पन्नगान्॥ मनुर्मनुष्यान् जनयत्काश्यपस्य महात्मनः॥२९॥ ब्राह्मणान् क्ष
त्रियान्वैश्याञ्छूद्रांश्च मनुजर्षभ॥ मुखतो ब्राह्मणा जाता वाहुभ्यां क्षत्रियस्तथा॥३०॥ ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा विनिःसृ
ताः। सर्वान् पिंडफलान्वृक्षाननलापि व्यजायत॥३१॥ जज्ञे राम महाबाहो तांश्च सर्वान्महीरुहान्॥ विनता च शुकी पौत्री कद्रूश्च सुर
सा स्वसा॥३२॥ कद्रुर्नागं सहस्रं तु विजज्ञे धरणीधरं॥ द्वौ पुत्रौ विनतायास्तु गरुडोरुण एव च॥३३॥ तस्माज्जातोहमरुणात्संपाति
श्च ममाग्रजः॥ जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम॥३४॥ सोहं वाससहायस्ते भविष्यामि यदीच्छसि इदं दुर्गं हि कांतारं मृगराक्ष
ससेवितं॥३५॥ सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे॥३६॥ जटायुषं तु प्रतिपूज्य राघवो मुदा परिष्वज्य च सन्नतो भवत्॥ पितु 
र्हि शुश्राव सखित्वमात्मवान् जटायुषा संकथितं पुनः पुनः॥३७॥ स तत्र रामः परिधाय मैथिलीं सहैव तेनातिबलेन पक्षिणा॥ ज 

गामतां पंचवटीं सलक्ष्मणो रिपून्दिधक्षन्कुलभा निवानलः ॥३७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे चतुर्दशः स
र्गः ॥१४॥ ततः पंचवटीं गत्वा नानाव्यालमृगायुतां ॥ उवाच भ्रातरं श्रीमान्सौमित्रिं दीप्ततेजसं ॥१॥ आगताः स्म यथोद्दिष्टं यं देशं मु
निरब्रवीत् ॥ अयं पंचवटीदेशः सौम्य पुष्पितपादपः ॥२॥ सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ॥ आश्रमः कतरस्मिन्नो देशे
भवति संमतः ॥३॥ रमते यत्र वैदेही त्वमहं चापि लक्ष्मण ॥ तादृशो दृश्यतां देशः सन्निकृष्टजलाशयः ॥४॥ वनरामण्यकं यत्र ज
लरामण्यकं तथा ॥ सन्निकृष्टं च यस्मिंस्तु समित्पुष्पकुशोदकं ॥५॥ एवमुक्तस्तु रामेण लक्ष्मणः संयतांजलिः ॥ सीतासमक्षं काकु
त्स्थमिदं वचनमब्रवीत् ॥६॥ परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ॥ स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥७॥ सुप्रीतस्ते
न वाक्येन लक्ष्मणस्य महाद्युतिः ॥ विमृशन्रोचयामास देशं सर्वगुणान्वितं ॥८॥ स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ॥ हस्ते
गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥९॥ अयं देशः समः श्रीमान्पुष्पितैस्तरुभिर्वृतः ॥ इहाश्रमपदं सौम्य यथावत्कर्तुमर्हसि
॥१०॥ इयमादित्यसंकाशैः पद्मैः सुरभिगंधिभिः ॥ अदूरे दृश्यते रम्या पद्मिनी पद्मसेविता ॥११॥ यथाख्यातमगस्त्येन मुनिना भाविता
त्मना ॥ इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥१२॥ हंसकारंडवाकीर्णा चक्रवाकोपसेविता ॥ नातिदूरे न चासन्ने मृगयूथनि
पीडिता ॥१३॥ मयूरनादिता रम्याः प्रांशवो बहुकंदराः ॥ दृश्यंते गिरयः सौम्य फुल्लैस्तरुभिरावृताः ॥१४॥ सौवर्णै राजतैस्ताम्रैर्देशे दे

॥रा॰ आ॰॥ शैश्च धातुभिः॥ गवाक्षिता इवाभांति गजाःपरमपंक्तिभिः॥१५॥ सालैस्तालैस्तमालैश्च खर्जूरैःपनसाम्रकैः॥ नीवारैस्तिमिशैश्चै
॥१७॥ वपुन्नागैश्चोपशोभिताः॥ चूतैरशोकैस्तिलकैः चंपकैःकेतकैरपि॥ पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृता॥१७॥ स्यंदनैश्चंद
नैर्नीपैःपनसैर्लकुचैरपि॥ धवाश्वकर्णखदिरैःशमीकिंशुकपाटलैः॥१८॥ इदं पुण्यमिदं मेध्यं इदं बहुमृगद्विजं॥ इह वत्स्या
मसौमित्रे सार्द्धमेतेन पक्षिणा॥१९॥ एवमुक्तस्तु रामेण लक्ष्मणःपरवीरहा॥ अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः॥२०॥ प
र्णशालां सुविपुलां तत्र संघातमृत्तिकां॥ सुस्तंभां मस्करैर्दीर्घैः कृतवंशां सुशोभनां॥२१॥ शमीशाखाभिरास्तीर्य दृढपाशाव
पाशितां॥ कुशकाशशरैःपर्णैः सुपरिच्छादितां तथा॥२२॥ समीकृततलां रम्यां चकार सुमहाबलः॥ निवासं राघवस्यार्थे चकारा
तुलविक्रमः॥२३॥ स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा॥ स्नात्वा पद्मानि चादाय सफलःपुनरागतः॥२४॥ ततः पुष्पबलिं
कृत्वा शांतिं च स यथाविधि॥ दर्शयामास रामाय तदाश्रमपदं कृतं॥२५॥ स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया॥ राघवःप
र्णशालायां हर्षमाहारयत्परं॥२६॥ सुसंहृष्टःपरिष्वज्य बाहुभ्यां लक्ष्मणं तदा॥ अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत्॥२७॥ प्री
तोस्मि ते महत्कर्म त्वया कृतमिदं प्रभो॥ प्रदेयो यन्निमित्तं ते परिष्वंगो मया कृतः॥२८॥ भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण॥ त्व ॥राम॥
या पुत्रेण धर्मात्मा न संवृत्तःपिता मम॥२९॥ एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्द्धनः॥ तस्मिन्देशे बहुफले न्यवसत्स सुखं सुखी ॥१७॥

३०कंचित्कालंसधर्मात्मासीतयालक्ष्मणेनच। अन्वास्यमानोन्यवसत्स्वर्गलोकेयथामरः ।३१। इत्यार्षेश्रीरामायणेवाल्मीकी
येआरण्यकांडेपंचदशःसर्गः ।१५। वसतस्तस्यतुसुखंराघवस्यमहात्मनः शरद्व्यपायेहेमंतेऋतुरिष्टःप्रवर्तत ।१। सकदाचि
त्प्रभातायांशर्वर्यांरघुनंदनः ।प्रययावभिषेकार्थंरम्यांगोदावरींनदीं ।२। प्रव्हःकलशहस्तस्तंसीतयासहवीर्यवान् ।पृष्टतो
नुव्रजन्भ्रातासौमित्रिरिदमब्रवीत् ।३। अयंसकालःसंप्राप्तःप्रियोयस्तेप्रियंवद ।अलंकृतइवाभातियेनसंवत्सरःशुभः ।४।
नीहारपरुषोलोकःपृथिवीसस्यमालिनी ।जलान्यनुपभोग्यानिसुभगोहव्यवाहनः ।नवाग्रयणपूजाभिरभ्यर्च्यपितृदेवताः
कृताग्रयणकाःकालेसंतोविगतकल्मषाः ।६। प्राज्यकामाजनपदाःसंपन्नतरगोरसाः ।विचरंतिमहीपालायात्रार्थेविजि
गीषवः ।७। सेवमानेदृढंसूर्येदिशमंतकसेवितां ।विहीनतिलकेवस्त्रीनोत्तरादिक्प्रकाशते ।८। प्रकृत्याहिमकोशाढ्योदू
रसूर्यश्चसांप्रतं ।यथार्थनामासुव्यक्तंहिमवान्हिमवान्गिरिः ।९। अत्यंतसुखसंचारामध्याह्नेस्पर्शतःसुखाः ।दिवसाःसुभगा
दित्याःछायासलिलदुर्भगाः ।१०। मृदुसूर्याःसनीहाराःपटुशीताःसमारुताः ।शून्यारण्याहिमध्वस्तादिवसाभांतिसांप्रतं ।११। नि
वृत्ताकाशशयनाःपुष्यनीताहिमारुणाः ।शीतवृद्धतरायामास्त्रियामायांतिसांप्रतं ।१२। रविसंक्रांतसौभाग्यस्तुषारारुणमंड
लः ।निश्वासांधइवादर्शश्चंद्रमानप्रकाशते ।१३। ज्योत्स्नातुषारमलिनापौर्णमास्यांनराजते ।सीतेवचातपश्यामालक्ष्यतेनचशोभ

॥रा०आ० ते ॥१४॥ प्रकृत्याशीतलस्पर्शो हिमवृद्धश्च सांप्रतं। प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥१५॥ बाष्पछन्नान्यरण्यानि यवगो
॥१८॥ धूमवंति च। शोभंतेभ्युदिते सूर्ये नदद्भिः क्रौंचसारसैः ॥१६॥ खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतंदुलैः। शोभंते किंचिदालंबाः शाल
यः कनकप्रभाः ॥१७॥ मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः। दूरमभ्युदितः सूर्यः शशांक इव लक्ष्यते ॥१८॥ अग्राह्यवीर्यः पूर्वाह्ने म
ध्याह्ने स्पर्शतः सुखः। संरक्तः किंचिदापांडुरातपः शोभते क्षितौ ॥१९॥ अवश्यायनिपातेन किंचित्प्रक्लिन्नशाड्वला। वनानां शोभते
भूमिर्निविष्टतरुणातपाः ॥२०॥ संस्पृशन्विमलं शीतमुदकं द्विरदः सुखं। अत्यर्थतृषितो वन्यः प्रतिसंहरते करं ॥२१॥ एते हि स
मुपासीना विहगा जलचारिणः। न विगाहंति सलिलमप्रगल्भा इवाहवं ॥२२ अवश्यायतमोनद्धा नीहारतमसावृताः। प्रसुप्ता
इव लक्ष्यंते विपुष्पा वनराजयः ॥२३॥ बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः। हिमार्द्रवालुकैस्तीरैः सरितो भांति सांप्रतं ॥२४॥
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य। शैत्यादगाधस्थमपि प्रायेण रसवज्जलं ॥२५॥ जराजर्झरितैः पत्रैः शीर्णकेसरपांडुभिः। ना
लशेषैर्हिमध्वस्तैर्नभांति कमलाकराः ॥२६॥ अस्मिंस्तु पुरुषव्याघ्र काले दुःखसमन्वितः। तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पु
रे ॥२७॥ त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून्। तपस्वी नियताहारः शेते शीते महीतले ॥२८॥ सोपि वेलामिमां नूनमभिषे ॥राम॥
कार्थमुद्यतः। वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूं नदीं ॥२९॥ अत्यंतसुखसंवृद्धः सुकुमारो हिमार्दितः। कथंवापररात्रेषु सरयूम ॥१८॥

नगाहते॥२०॥पद्मपत्रेक्षणः श्रीमान् श्यामो निरुदरो महान्॥धर्मज्ञः सत्यवादी च ह्रीनिषेधो जितेंद्रियः॥२१॥प्रियाभिभाषी मधु
रो दीर्घबाहुररिंदमः॥संत्यज्य विविधान् भोगान् आर्यं सर्वात्मनाश्रितः॥२२॥जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना॥वनस्थ
मपि तापस्येयस्त्वामनुधीयते॥२३॥न पित्र्यमनुवर्त्तंते मातृकं द्विपदा इति।ख्यातो लोकप्रवादोयं भरतेनान्यथा कृतः॥२४॥भर्त्ता
दशरथो यस्याः साधुश्च भरतः सुतः।कथं नु सांब कैकेयी तादृशी क्रूरदर्शिनी॥२५॥इत्येवं लक्ष्मणे वाक्यं स्नेहाद्ब्रुवति धार्मिके।
परिवादं जनन्यास्तमसहन् राघवोब्रवीत॥२६॥न तेंबा मध्यमा तात गर्हितव्या कथंचन॥तामेवेक्ष्वाकुनाथस्य भरतस्य क
थां कुरु॥२७॥निश्चितापि हि मे बुद्धिर्वनवासे दृढव्रता॥भरतः स्नेहसंतप्ता बालिशी क्रियते पुनः॥२८॥संस्मराम्यस्य वाक्यानि
प्रियाणि मधुराणि च॥हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च॥२९॥कदा ह्यहं समेष्यामि भरतेन महात्मना॥शत्रुघ्नेन च वी
रेण त्वया च रघुनंदन॥४०॥इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीं।चक्रेभिषेकं काकुत्स्थः सानुजः सह सीतया॥४१॥तर्पयित्वा
थ सलिलैस्ते पितॄन् दैवतानि च॥स्तुवंति स्मोदितं सूर्यं देवताश्च तथानघाः।४२।कृताभिषेकः स रराज रामः सीताद्वितीयः स
ह लक्ष्मणेन॥कृताभिषेकस्त्वगराजपुत्र्या रुद्रः सनंदिर्भगवानिवेशः॥४३॥इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे षो
डशः सर्गः॥१६॥कृताभिषेको रामस्तु सीता सौमित्रिरेव च।तस्माद्गोदावरीतीरात्ततो जग्मुः स्वमाश्रमं॥१॥आश्रमं तमुपागम्य

॥रा०आ०॥ राघवःसहलक्ष्मणः।कृत्वापौर्वाह्णिकंसर्वंपर्णशालामुपाविशत्॥२॥सवाससुखितस्तत्रपूज्यमानोमहर्षिभिः।सरामःपर्णशा
॥१९॥ लायामासीनःसहसीतया॥३॥विरराजमहाबाहुश्चित्रयाचंद्रमाइव।लक्ष्मणेनसहभ्रात्राचकारविविधाकथा॥४॥तथा
सीनस्यरामस्यकथासंसक्तचेतसः।तंदेशंराक्षसीकाचिदाजगामयदृच्छया॥५॥सातुशूर्पणखानामदशग्रीवस्यरक्षसः॥भगि
गिनीराममासाद्यददर्शत्रिदशोपमं॥६॥सिंहोरस्कंमहाबाहुंपद्मपत्रनिभेक्षणं।आजानुबाहुंदीप्तास्यमतीवप्रियदर्शनं॥७॥
गजविक्रांतगमनंजटामंडलधारिणं।सुकुमारंमहासत्वंपार्थिवव्यंजनान्वितं॥८॥राममिंदीवरश्यामंकंदर्पसदृशंप्रभं॥ब
भूवेंद्रोपमंदृष्ट्वाराक्षसीकाममोहिता॥९॥सुमुखंदुर्मुखीरामंवृत्तमध्यंमहोदरी।विशालाक्षंविरूपाक्षीसुकेशंताम्रमूर्द्धजा
॥१०॥प्रियरूपंविरूपासासुस्वरंभैरवस्वना।तरुणंदारुणावृद्धादक्षिणंवामभाषिणी॥११॥न्यायवृत्तंसुदुर्वृत्ताप्रियमप्रियदर्श
ना।शरीरजसमाविष्टाराक्षसीराममब्रवीत्॥१२॥जटीतापसरूपेणसभार्यःशरचापधृक्।आगतस्त्वमिमंदेशंकथंराक्षससेवि
तं॥१३॥किमागमनकार्यंतेतत्वमाख्यातुमर्हसि।एवमुक्तस्तुराक्षस्याशूर्पणख्यापरंतपः॥१४॥ऋजुबुद्धितयासर्वमाख्यातुमु
पचक्रमे।अनृतंनहिरामस्यकदाचिदपिसंमतं॥१५॥विशेषादाश्रमस्थस्यसमीपेस्त्रीजनस्यच।आसीद्दशरथोनामराजात्रि ॥राम॥
दशविक्रमः॥१६॥तस्याहमग्रजःपुत्रोरामोनामजनैःश्रुतः।भ्रातायंलक्ष्मनामयवीयान्मामनुव्रतः॥१७॥इयंभार्याचवैदेहीममसी ॥१९॥

तेति विश्रुता ॥ नियोगात्तु नरेंद्रस्य पितुर्मातुश्च यंत्रितः ॥१५॥ धर्मार्थी धर्मकांक्षी च वनं वस्तुमिहागतः त्वां तु वेदितुमिच्छामि
कथ्यतां कासि कस्य वा ॥१६॥ नहि तावन्मनोज्ञांगी राक्षसी प्रतिभासि मे इह चैव किंनिमित्तं त्वमागता ब्रूहि तत्वतः ॥१७॥ साब्रवीद्व
चनं श्रुत्वा राक्षसी मदनार्दिता ॥ श्रूयतां राम वक्ष्यामि तत्वार्थं वचनं मम ॥१८॥ अहं शूर्पणखी नाम राक्षसी कामरूपिणी ॥ अ
रण्यं विचरामीदमेका सर्वभयंकरा ॥१९॥ रावणो नाम मे भ्राता राक्षसो राक्षसाधिपः ॥ सोयं विश्रवसः पुत्रो यदि ते श्रोत्रमाग
तः ॥२०॥ प्रवृद्धनिद्रस्तु सदा कुंभकर्णो महाबलः ॥ विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ॥२१॥ प्रख्यातवीर्यौ च रणे भ्रातरौ खर
दूषणौ ॥ तानहं समतिक्रांता राम त्वा पूर्वदर्शनात् ॥ समुपेतास्मि भावेन भर्त्तारं पुरुषोत्तमं ॥२२॥ अहं प्रभावसंपन्ना स्वच्छंदब
लगामिनी ॥ चिराय भव मे भर्त्ता सीतया किं करिष्यसि ॥२३॥ विकृता च विरूपा च न चेयं सदृशी तव ॥ अहमेवानुरूपा ते जाया रू
पेण पश्य मां ॥२४॥ इमां विरूपामसतीं करालीं निर्णतोदरीं ॥ अनेन ते सह भ्रात्रा भक्षयिष्यामि मानुषीं ॥२५॥ ततः पर्वतशृंगाणि
वनानि विविधानि च ॥ पश्यन्सह मया कांत दंडकान्विचरिष्यसि ॥२६॥ इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणः ॥ इदं वच
नमारेभे वक्तुं वाक्यविशारदः ॥२७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आ० सप्तदशः सर्गः ॥१७॥ तां तु शूर्पणखीं रामः कामपा
शावपाशितां ॥ स्वेच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥१॥ कृतदारोस्मि भवति भार्येयं दयिता मम ॥ त्वद्विधानां तु नारी

॥रा०आ०॥ णांसुदुःखार्हा सपत्नता॥२॥अनुजस्त्वेषमे भ्राता शीलवान् प्रियदर्शनः॥श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान्॥३॥अपूर्वः
॥२०॥ भार्यया चार्थी तरुणः प्रियदर्शनः॥अनुरूपश्च ते भर्त्ता रूपस्यास्य भविष्यति॥४॥एनं भज विशालाक्षि भर्त्तारं भ्रातरं मम॥असपत्ना
वरारोहे मेरुमर्कप्रभा यथा॥५॥इति रामेण सा प्रोक्ता राक्षसी काममोहिता॥विसृज्य सहसा रामं ततो लक्ष्मणमब्रवीत्॥६॥
अस्य रूपस्य ते युक्ता भार्याहं वरवर्णिनी॥मया सह सुखं सर्वान् दंडकान् विचरिष्यसि॥७॥एवमुक्तस्तु सौमित्री राक्षस्या वा
क्यकोविदः॥ततः शूर्पणखां स्मित्वा लक्ष्मणो युक्तमब्रवीत्॥८॥कथं दासस्य मे दासी भार्या भवितुमर्हसि सोहमार्येण पर
वान् भ्रात्रा कमलवर्णिनि॥९॥समृद्धार्थस्य सिद्धार्था मुदिता वरवर्णिनी॥आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी॥१०॥एनां
विरूपामसतीं करालां निर्णतोदरीं॥भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति॥११॥को हि रूपमिदं दृष्ट्वा संत्यज्य वरवर्णिनि॥
मानुषेषु वरारोहे रतिं कुर्याद्विचक्षणः॥१२॥इति सा लक्ष्मणेनोक्ता कराली निर्णतोदरी॥मन्यते तद्वचः पथ्यं परिहासाविचक्ष
णा॥१३॥सा रामं पर्णशालायामुपविष्टं परंतपं॥सीतया सह दुर्द्धर्षमब्रवीत् काममोहिता॥१४॥इमां विरूपामसतीं करालां निर्ण
तोदरीं॥वृद्धां भार्यामवष्टभ्य मां त्वं न बहुमन्यसे॥१५॥अद्येमां भक्षयिष्यामि पश्यतस्तव मानुषीं॥त्वया सह चरिष्यामि निःसपत्ना ॥राम॥
यथासुखं॥१६॥इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा॥अभ्यधावत् सुसंक्रुद्धा महोल्का रोहिणीमिव॥१७॥तां मृत्युपाशप्रति ॥२०॥

मामापतंतीमहावलः॥निगृह्यरामःकुपितस्ततोलक्ष्मणमब्रवीत्॥१९॥क्रूरैरनार्यैःसौमित्रेपरिहासःकथंचन॥नकार्यःपश्य
वैदेहींकथंचित्सौम्यजीवतीं॥२०॥इमांविरूपामसतीमतिमत्तांमहोदरीं॥राक्षसींपुरुषव्याघ्रविरूपयितुमर्हसि॥२०॥इत्युक्तो
लक्ष्मणस्तस्याःक्रुद्धोरामस्यपश्यतः॥उद्धृत्यखड्गंचिच्छेदकर्णनासंमहावलः॥२१॥निकृत्तकर्णनासातुविस्वरंसाविनद्यच॥
यथागतंप्रदुद्रावघोराशूर्पणखावनं॥२२॥साविरूपामहानादाराक्षसीशोणितोक्षिता॥ननादविविधान्नादान्यथाप्रावृषि
तोयदः॥२३॥साविक्षरंतीरुधिरंबहुधाघोरदर्शना॥प्रगृह्यबाहूगर्जंतीप्रविवेशमहावनं॥२४॥ततस्तुसाराक्षससंघसंवृतंख
रंजनस्थानगतंविरूपिता॥उपेत्यतंभ्रातरमुग्रदर्शनंपपातभूमौगगनाद्यथाशनिः॥२५॥ततःसभार्यंभयमोहमूर्छितासल
क्ष्मणंराघवमागतंवनं॥विरूपणंचात्मनिशोणितोक्षिताशशंससर्वंभगिनीखरस्यसा॥२६॥इत्यार्षेश्रीरामायणेवाल्मीकी
येआरण्यकांडेअष्टादशःसर्गः॥१८॥तांतथापतितांदृष्ट्वाविरूपांशोणितोक्षितां॥भगिनींक्रोधसंतप्तःखरःपप्रच्छराक्षसः
॥१॥उत्तिष्ठतावदाख्याहिप्रमोहंजहिसंभ्रमं॥यस्त्वामेवंसमासाद्यपीतवान्विषमुत्तमं॥२॥बलविक्रमसंपन्नाकामगाकामरू
पिणी॥इमामवस्थांनीतात्वंकेनांतकसमागता॥३॥देवगंधर्वभूतानामृषीणांचमहात्मनां॥व्यक्तमाख्याहिकेनत्वमेवंरूपा
विरूपिता॥४॥कःकृष्णसर्पमासीनमाशीविषमनागसं॥तुदत्यभिसमापन्नमंगुल्यग्रेणलीलया॥५॥कालपाशंसमासज्यकंठे

॥रा०आ०॥ मोहान्नबुद्ध्यते॥कोयमेवंमहावीर्य्यस्त्वांविरूपांचकारह॥६॥नहिपश्याम्यहंलोकेयःकुर्य्यान्ममविप्रियं॥अमरेषुसहस्रा
॥२१॥ क्षंमहेंद्रंपाकशासनं॥७॥अद्याहंमार्गणैःप्राणानादास्येजीवितांतकैः॥सलिलेक्षीरमासक्तंनिष्पिबन्निवसारसः॥८॥निहतस्यम
यासंख्येशरसंकृत्तमर्मणः॥सफेनंरुधिरंरक्तंमेदिनीकस्यपास्यति॥९॥कस्यपत्ररथाःकायान्मांसमुत्कृत्यसंगताः॥प्रहृष्टा
भक्षयिष्यंतिनिहतस्यमयारणे॥१०॥तंनदेवानगंधर्वानपिशाचानराक्षसाः॥मयापकृष्टंकृपणंशक्तास्त्रातुंमहाहवे॥११॥
उपलभ्यततःसंज्ञांतन्मेशंसितुमर्हसि॥येनत्वंदुर्विनीतेनवनेविक्रम्यनिर्जिता॥१२॥इतिभ्रातुर्वचःश्रुत्वाक्रुद्धस्यचविशे
षतः॥ततःशूर्पणखीवाक्यंसवाष्पमिदमब्रवीत्॥१३॥तरुणौरूपसंपन्नौसुकुमारौमहाबलौ॥पुंडरीकविशालाक्षौचीरकृष्णा
जिनांबरौ॥१४॥फलमूलाशिनौदांतौतापसौधर्मचारिणौ॥पुत्रौदशरथस्यास्तांभ्रातरौरामलक्ष्मणौ॥१५॥गंधर्वराजप्रतिमौपार्थि
वव्यंजनान्वितौ॥देवौवामानुषौवातौनतर्कयितुमुत्सहे॥१६॥तरुणीरूपसंपन्नासर्वाभरणभूषिता॥दृष्टातत्रमयानारीतयोर्म
ध्येसुमध्यमा॥१७॥ताभ्यामुभाभ्यांसंभूयप्रमदामधिकृत्यतां॥इमामवस्थांनीताहंयथानार्य्यसतीतथा॥१८॥तस्याश्चानृजुवृत्ता ॥राम॥
यास्तयोश्चहतयोरहं॥सफेनंपातुमिच्छामिरुधिरंरणमूर्द्धनि॥१९॥एषमेप्रथमःकामःकृतस्तत्रत्वयाभवेत्॥तस्यास्तयोश्चरु
धिरंपिबेयमहमाहवे॥२०॥इतितस्यांब्रुवाणायांचतुर्दशमहाबलान्॥व्यादिदेशखरःक्रुद्धोराक्षसानंतकोपमान्॥२१॥मानु ॥२१॥

षौ शस्त्रसंपन्नौ चीरकृष्णाजिनांबरौ ॥ प्रविष्टौ दंडकारण्यं घोरं प्रमदया सह ॥ २२ ॥ तौ हत्वा तां च दुर्वृत्तामुपावर्तितुमर्हथ ॥ इयं
च भगिनी तेषां रुधिरं मम पास्यति ॥ २३ ॥ मनोरथोयमिष्टोस्या भगिन्या मम राक्षसाः ॥ शीघ्रं संपाद्यतां गत्वा तौ प्रमथ्य स्वतेजसा ॥
२४ ॥ इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश ॥ तत्र जग्मुस्तया सार्द्धं घना वातेरिता यथा ॥ २५ ॥ ततस्तु ते राघवमुग्रतेजसं तथा
सुतीक्ष्णप्रहराश्च राक्षसाः ॥ न शेकुरेनं सहसा प्रमर्दितुं वनद्विपा दीप्तमिवाग्निमुत्थितं ॥ २६ ॥ इत्यार्षे श्रीरामायणे वाल्मी
कीये आरण्यकांडे एकोनविंशः सर्गः ॥ १९ ॥ ततः शूर्पणखी घोरा राघवाश्रममागता ॥ रक्षसामाचचक्षे तौ भ्रातरौ सह सीतया ॥
१ ॥ ते रामं पर्णशालायामुपविष्टं महाबलं ॥ ददृशुः सीतया सार्द्धं लक्ष्मणेनापि सेवितं ॥ २ ॥ तान् दृष्ट्वा राघवः श्रीमानागतांतां च रा
क्षसीं ॥ अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसं ॥ ३ ॥ मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनंतरः ॥ इमानस्या वधिष्यामि पदवीमागता
निह ॥ ४ ॥ वाक्यमेतत्ततः श्रुत्वा रामस्य विदितात्मनः ॥ तथेति लक्ष्मणो वाक्यं रामस्य प्रत्यपूजयत् ॥ ५ ॥ राघवोपि महच्चापं चामीक
रविभूषितं ॥ चकार सज्जं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६ ॥ पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ ॥ प्रविष्टौ सीतया सार्द्धं दु
का२ श्चरं दंडकावनं ॥ ७ ॥ फलमूलाशनौ दांतौ तापसौ धर्मचारिणौ ॥ वसंतौ दंडकारण्ये किमर्थमुपहिंसथ ॥ युष्मान् पापात्मनो हंतुं वि
प्रकारान्महावने ॥ ऋषीणां तु नियोगेन संप्राप्तः सशरायुधः ॥ ८ ॥ तिष्ठतैवात्र संतुष्टा नोपसर्पितुमर्हथ ॥ यदि प्राणैरिहार्थो वा नि

॥रा०आ० वर्त्तध्वंनिशाचराः॥१०॥तस्यतद्वचनंश्रुत्वाराक्षसास्तेचतुर्दश।ऊचुर्वाचंसुसंक्रुद्धाब्रह्मघ्नाःशूलपाणयः॥११॥संरक्तनयनाघोरा
॥२२॥ रामंरक्तान्तलोचनं।परुषामधुराभाषंहृष्टंदृष्टपराक्रमं।क्रोधमुत्पाद्यनोभर्तुःखरस्यतुमहात्मनः।त्वमेवहास्यसेप्राणान्
रामास्माभिर्हतोयुधि॥१३॥काहितेशक्तिरेकस्यबहूनांरणमूर्द्धनि।अस्माकमग्रतःस्थातुंकिंपुनर्योद्धुमाहवे॥१४॥एभिर्बाहुप्र
विनिर्मुक्तैःपरिघैःशूलपट्टिसैः।प्राणांस्त्यक्ष्यसिवीर्यंचधनुश्चकरपीडितं॥१५॥इत्येवमुक्त्वासंरब्धाराक्षसास्तेचतुर्दश।अंतरि
क्षेमहोल्कानांबभूवुस्तुल्यदर्शनाः॥१६॥उद्यतायुधनिस्त्रिंशाराममेवाभिदुद्रुवुः।चिक्षिपुस्तानिशूलानिराघवंप्रतिदुर्ज्जयं॥१७
तानिशूलानिकाकुत्स्थःसमस्तानिचतुर्दश।तावद्भिरेवचिच्छेदशरैःकांचनभूषणैः॥१८॥अभिपत्यततोवेगाच्चिक्षिपुस्तेनिशा
चराः।परिघान्पट्टिशान्शूलान्निस्त्रिंशान्हेमभूषितान्॥१९॥तावद्भिरेवचिच्छेदसमस्तान्सवरायुधान्।चतुर्दशभिरत्यग्रैःश
रैःकांचनभूषणैः॥२०॥ततःपश्यन्महातेजानाराचान्सूर्यसन्निभान्।जग्राहपरमक्रुद्धश्चतुर्दशशिलाशितान्॥२१॥गृहीत्वाध
नुरायम्यलक्ष्यानुद्दिश्यराक्षसान्।मुमोचराघवोबाणान्वज्रानिवशतक्रतुः॥२२॥रुक्मपुंखाश्चविशिखाःप्रदीप्ताहेमभूषणाः
तेभित्वारक्षसांवेगाद्वक्षांसिरुधिराप्लुताः॥२३॥विनिष्पेतुस्तदाभूमौवल्मीकादिवपन्नगाः।तेभिन्नहृदयाभूमौछिन्नमूलाइवद्रु ॥राम॥
द्रुमाः॥२४॥निपेतुःशोणिताक्तांगाविकृताविगतासवः।राक्षसान्पतितान्दृष्ट्वाराक्षसीक्रोधमूर्च्छिता॥२५॥परिश्रान्तापुनस्तत्र्य ॥२२॥

स्त्रजङ्ग्रेरवस्वनान॥ तानदंतीमहानादं जवाच्छूर्पणखीपुनः॥२६॥ जगामतत्रसंभ्रांताखरोयत्रमहाबलः॥ उपगम्यखरंसातुकिं
चित्संशुष्कशोणिता॥२७॥ पपातपुनरेवार्त्तासनिर्यासेववल्लरी॥२७॥ भ्रातुःसमीपेशोकार्त्तासमर्जनिनदंमहत्॥२८॥ भूमौशया
नादुःखार्तालब्धसंज्ञाचिरात्पुनः॥२८॥ सस्वरंमुमुचेबाष्पंविवर्णवदनातदा॥२९॥ निपातितान्प्रेक्ष्यरणेतुराक्षसान्प्रधाविता
शूर्पणखीपुनःपुनः॥ वधंचतेषांनिखिलेनरक्षसांन्यशंससर्वंभगिनीखरस्यसा॥३०॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेआर
ण्यकांडेविंशतितमःसर्गः॥२०॥ सपुनःपतितांदृष्ट्वाक्रोधाच्छूर्पणखींखरः॥ उवाचव्यक्तयावाचातामनर्थार्थमागतां॥१॥ मया
त्विदानींशूरास्तेराक्षसाःपिशिताशनाः॥ त्वत्प्रियार्थंविनिर्दिष्टाःकिमर्थंरुद्यतेपुनः॥२॥ भक्ताश्चैवानुरक्ताश्चहिताश्चममनित्य
शः॥ हन्यमानानहन्यंतेनचकुर्युर्वचोमम॥३॥ किमेतच्छ्रोतुमिच्छामिकारणंयत्कृतेपुनः॥ हानाथेतिविनर्दंतीसर्पवच्चेष्टसेक्षि
तौ॥ अनाथवद्विलपसिकिंनुनाथेमयिस्थिते॥४॥ उत्तिष्ठोत्तिष्ठमाभैस्त्वंवैक्लव्यंत्यज्यतामिति॥५॥ इत्येवमुक्तादुर्द्धर्षाखरेणपरि
सांत्विता॥ विमृज्यनयनेसास्रेखरंभ्रातरमब्रवीत्॥६॥ अस्मीदानीमहंप्राप्ताहतश्रवणनासिका॥ शोणितौघपरिक्लिन्नात्वया॥
चपरिसांत्विता॥७॥ प्रेषिताश्चत्वयाशूराराक्षसास्तेचतुर्दश॥ निहंतुंराघवंघोरंमत्प्रियार्थंसलक्ष्मणं॥८॥ तेतुरामेणसामर्षाःशूलप
ट्टिशपाणयः॥ समरेनिहताःसर्वेसायकैर्मर्मभेदिभिः॥९॥ तान्भूमौपतितान्दृष्ट्वाक्षणेनैवमहाजवान्॥ रामस्यचमहत्कर्ममहांस्त्रा

॥रा०आ०॥ सोभवन्मम॥१०॥सास्मिभीताभयोद्विग्नाविषण्णाचनिशाचर॥शरणंत्वांपुनःप्राप्तासर्वतोभयदर्शिनी॥११॥विषादनक्राध्युषि
॥२३॥ तेपरित्रासोर्मिमालिनि॥किंमांनत्रायसेमग्नांविपुलेशोकसागरे॥१२॥एतेविनिहताभूमौरामेणनिशितैःशरैः॥येपिमेपदवी
प्राप्ताराक्षसाःपिशिताशनाः॥१३॥यदितेमय्यनुक्रोशोयदिरक्षस्सुतेषुच॥रामेणयदितेशक्तिस्तेजोवास्तिनिशाचर॥१४॥दंडका
रण्यनिलयंजहिराक्षसकंटकं॥यदिरामंममामित्रमद्यत्वंनवधिष्यसि॥१५॥तवाहमग्रतःप्राणांस्त्यक्ष्यामिनिरपत्रपा॥बुद्ध्या
हमनुपश्यामिनत्वंरामस्यसंयुगे॥१६॥स्थातुंप्रतिमुखेशक्तःसचापस्यमहारणे॥शूरमानीनशूरस्त्वंमिथ्यारोपितविक्रमः॥
१७॥मनुष्यौयन्नशक्नोषिहंतुंतौरामलक्ष्मणौ॥निःसत्वस्याल्पवीर्यस्यवासस्तेकीदृशस्त्विह॥१८॥अपयाहिजनस्थानात्त्वरि
तःसहबांधवैः॥रामतेजोभिभूतोसित्वंक्षिप्रंविनशिष्यसि॥१९॥सहितेजःसमायुक्तोरामोदशरथात्मजः॥भ्राताचास्यमहावीर्योये
नचास्मिविरूपिता॥२०॥एवंविलप्यबहुशोराक्षसीप्रततोदरी॥भ्रातुःसमीपेशोकार्त्तानष्टसंज्ञाबभूवसा॥कराभ्यामुदरंहत्वारु
रोदभृशदुःखिता॥२१॥इत्यार्षेश्रीरामायणेआरण्यकांडेएकविंशःसर्गः॥२१॥एवमाधर्षितःशूरःशूर्पणख्याखरस्तदा॥उवाच
रक्षसांमध्येखरःखरतरंवचः॥१॥तवावमानप्रभवःक्रोधोयमतुलोमम॥नशक्यतेधारयितुंलवणांभइवोल्बणं॥२॥नरामं ॥राम॥
गणयेवीर्यान्मानुषंक्षीणजीवितं॥आत्मदुश्चरितैःप्राणान्हतोयोद्यविमोक्ष्यते॥३॥बाष्पःसंह्रियतामेषःसंभ्रमश्चविमुच्यतां ॥२३॥

अहंरामंसहभ्रात्रानयामियमसादनं॥४॥वीरस्यनिहतस्याद्यमंदप्राणस्यभूतले।रामस्यरुधिरंरक्तमुष्णंपास्यसिकांक्षितं॥५॥
प्रहृष्टावचनंश्रुत्वाखरस्यवदनाच्च्युतं।प्रशशंसपुनर्मौर्ख्यात्भ्रातरंरक्षसांवरं॥६॥तयापरुषितःपूर्वंपुनरेवप्रशंसितः॥अ
ब्रवीत्दूषणंनामखरःसेनापतिंतदा॥७॥चतुर्दशसहस्राणिममचित्तानुवर्त्तिनां।रक्षसांभीमवेगानांसमरेष्वनिवर्त्तिनां॥८
नीलजीमूतवर्णानांघोराणांकामरूपिणां।तेषांशार्दूलदर्पाणांमहास्यानांमहात्मनां॥९॥लोकहिंसाविहाराणांबलिनामु
ग्रतेजसां॥सर्वोद्योगमुदग्रानांरक्षसांसौम्यकारय॥१०॥उपस्थापयमेक्षिप्रंरथंसौम्यधनूंषिच।शरांश्चचित्रान्खड्गांश्चश
क्तीश्चविविधाःशिताः॥११॥अग्रेनिर्यातुमिच्छामिपौलस्त्यानांमहात्मनां।वधार्थंदुर्विनीतस्यरामस्यरणमूर्द्धनि॥१२॥इतित
स्यब्रुवाणस्यसूर्यवर्णमहारथं॥सदश्वैःशबलैर्युक्तमाचचक्षेथदूषणः॥१३॥तंमेरुशिखराकारंतप्तकांचनभूषणं।हेमचक्र
मसंबाधंवैडूर्यमयकूबरं॥१४॥मत्स्यैःपुष्पैर्द्रुमैःशैलैश्चंद्रसूर्यैश्चकांचनैः॥मंगलैःपक्षिसंघैश्चताराभिश्चसमावृतं॥१५॥ध्वज
निस्त्रिंशसंपन्नंकिंकिणीभिर्विभूषितं।सदश्वयुक्तंसोमर्षादारुरोहरथंखरः॥१६॥निशाम्यतुरथस्थंतंराक्षसाभीमविक्रमाः
तस्थुस्तेपरिवार्यैनंदूषणंचमहाबलं॥१७॥खरस्तुतान्महेष्वासान्घोरवर्मायुधध्वजान्॥निर्यातेत्यब्रवीद्दृष्टोरथस्थःसर्वरा
क्षसान्॥१८॥ततस्तद्रक्षसांसैन्यंघोरचर्मायुधध्वजं॥निर्जगामजनस्थानात्खरचित्तानुवर्त्तिनं॥१९॥मुद्गरैःपट्टिशैःशूलैःसुतीक्ष्णै

॥रा०आ० श्चपरश्वधैः॥ खड्गैश्चक्रैश्च हस्तस्थैर्भ्राजमानैः सतोमरैः॥२०॥ शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः। गदासिमुसलैर्वज्रैर्गृ
॥२४॥ हीतैर्भीमदर्शनैः॥२१॥ राक्षसानां सुघोराणां सहस्राणि चतुर्दश॥ निर्यातानि जनस्थानात्खरचित्तानुवर्तिनां॥२२॥ तांस्तु निर्धाव
तो दृष्ट्वा राक्षसान्भीमदर्शनान्॥ खरस्यापि रथः किंचिज्जगाम तदनंतरं॥२३॥ ततस्तांछबलानश्वान्तप्तकांचनभूषणान्॥ ख
रस्य मतमाज्ञाय सारथिः समचोदयत्॥२४॥ संचोदितो रथः शीघ्रं खरस्य रिपुघातिनः। शब्देनापूरयामास दिशश्च प्रदिशस्त
था॥२५॥ प्रवृद्धमन्युस्तु खरः खरस्वनो रिपोर्वधार्थं त्वरितो यथांतकः। अचूचुदत्सारथिमुन्नदन्पुनर्महाबलो मेघइवाश्मवर्ष
वान्॥२६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे द्वाविंशः सर्गः॥२२॥ तत्प्रयातं बलं घोरमशिवं शोणितोदकं॥ अभ्यव
र्षन्महामेघस्तुमुलो गर्दभारुणः॥१॥ निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः॥ समे पुष्पचिते देशे राजमार्गे यदृच्छया॥२॥ श्यामं
रुधिरपर्यंतं बभूव परिवेषणं॥ अलातचक्रप्रतिमं प्रतिगृह्य दिवाकरं॥३॥ ततो ध्वजमुपागम्य हेमदंडं समुच्छ्रितं॥ समाक्रम्य
महाकायस्तस्थौ गृध्रः सुदारुणः॥४॥ जनस्थानसमीपे च समाक्रम्य खरस्वनाः॥ विस्वरान्विविधांश्चक्रुर्मांसादा मृगपक्षिणः॥
५॥ व्याजह्रुश्च प्रदीप्तायां दिशि वै भैरवस्वनं॥ अशिवा यातुधानानां शिवा घोरा महास्वनाः॥६॥ प्रभिन्नगिरिसंकाशाः तोयशोणि ॥राम॥
तधारिणः। आकाशं तदनाकाशं चक्रुर्भीमा बलाहकाः॥७॥ बभूव तिमिरं घोरमुद्धतं रोमहर्षणं॥ दिशो वा विदिशो वापि न व्यक्तं सं ॥२४॥

चकाशिरे॥८॥ क्षतजार्द्रसुवर्णाभा संध्याकालं विनाबभौ। खरस्याभिमुखा नेदुस्तदा घोरा मृगाः खगाः॥९॥ काकगोमायुगृध्रा
श्च चुक्रुशुर्भयशंसिनः॥ नित्याशिवकरा युद्धे शिवा घोरनिदर्शनाः॥१०॥ नेदुर्बलस्याभिमुखा ज्वालोद्गारिभिराननैः। कबंधाः प
रिघाभासो दृश्यंते भास्करांतिके॥११॥ जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः। प्रवाति मारुतः शीघ्रं निःप्रभोभूद्दिवाकरः॥१२॥ उत्पे
तुश्च विना रात्रिं ताराः खद्योतसन्निभाः। संलीनमीनविहगा नलिन्यः शुष्कपंकजाः॥१३॥ तस्मिन्क्षणे बभूवुश्च विना पुष्पैः फलै
र्द्रुमाः॥ उत्पेतुश्च विना वातं रेणुर्जलधरारुणः॥१४॥ चीचीकूचीति वाश्यंत्यो बभूवुस्तत्र सारिकाः॥ उल्काश्चापि सनिर्घोषा।
निपेतुर्घोरदर्शनाः॥१५॥ प्रचचाल मही चापि सशैलवनकानना। खरस्य च रथस्थस्य नर्दमानस्य धीमतः॥१६॥ प्राकंपत भुजः
सव्यः स्वरश्चास्यावसज्यत॥ सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः॥१७॥ ललाटे च रुजा जाता न च मोहान्न्यवर्तत॥ तान्समी
क्ष्य महोत्पातानुत्थितान्रोमहर्षणान्॥१८॥ अब्रवीद्राक्षसान्सर्वान्प्रहसन्वाहिनीपतिः। महोत्पातानिमान्सर्वानुत्थितान्
घोरदर्शनान्॥१९॥ न चिंतयाम्यहं वीर्याद्बलवान्दुर्बलानिव। ताराअपि शरैस्तीक्ष्णैः पातयेयं नभस्तलात्॥२०॥ मृत्युं मरणधर्मेण सं
क्रुद्धो योजयाम्यहं। राघवं तं बलोत्सिक्तं भ्रातरं चापि लक्ष्मणं॥२१॥ अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे। यन्निमित्तं तु रामस्य।
लक्ष्मणस्य विपर्ययः॥२२॥ सकामा भगिनी मेस्तु पीत्वेयं शोणितं तयोः। न क्वचित्प्राप्तपूर्वं स्तु संयुगेषु पराजयः॥२३॥ युष्माकमेतत्प्रत्य

॥ रा०आ०॥ सेनानृतंकथयाम्यहं।देवराजमपिक्रुद्धोमत्तैरावतयायिनं॥२५॥वज्रहस्तंरणेहन्यांकिंपुनस्तौकुमानुषौ।सातस्यगर्जितंश्रुत्वारा
॥ २५॥ क्षसस्यमहाचमूः॥२६॥प्रहर्षमतुलंलेभेमृत्युपाशावपाशिता॥रथेनतुखरोवेगादुग्रसैन्यैर्विनिःसृतः॥२७॥तंदृष्ट्वानिःसृतंभूमौरा
क्षसाश्चविनिःसृताः।श्येनगामीपृथुग्रीवोयज्ञशत्रुर्विहंगमः॥२८॥दुर्जयःकरवीराक्षःपरुषःकालकार्मुकः।मेघमालीमहामा
लीसर्पास्योरुधिराशनः॥२९॥द्वादशैतेमहावीर्याःप्रतस्थुरभितःखरं॥महाकपालःस्थूलाक्षःप्रमाथीत्रिशिरास्तथा॥३०॥चत्वार
एतेसेनाग्र्याःदूषणंपृष्ठतोन्वयुः।साभीमवेगासमराभिकामासुदारुणाराक्षसवीरसेना।तौराजपुत्रौसहसाभ्युपेतामाला
ग्रहाणामिवचंद्रसूर्यौ॥३१॥इत्यार्षेरामायणेवाल्मीकीयेआरण्यकांडेत्रयोविंशःसर्गः॥२३॥आश्रमंप्रतियातेतुखरेखरपरा
क्रमे।तावेवौत्पातिकान्रामःसहभ्रात्राददर्शह॥१॥तानुत्पातान्महाघोरान्रामोदृष्ट्वात्यमर्षणः।प्रजानामहितान्दृष्ट्वालक्ष्म
णंवाक्यमब्रवीत्॥२॥इमान्पश्यमहाबाहोसर्वभूतापहारिणः।समुत्थितान्महोत्पातान्संहर्तुंसर्वराक्षसान्॥३॥अमीरुधिर
धारास्तुविसृजंतःखराःखगाः।व्योम्निमेघाविनर्दंतेपरुषागर्दभारुणाः॥४॥सधूमाश्चशराःसर्वेममयुद्धाभिनंदिताः।रुक्मपृ
ष्ठानिचापानिचेष्टंतेपिचलक्ष्मणः॥५॥यादृशाइहकूजंतिपक्षिणोवनचारिणः।अग्रतोनोऽभयंप्राप्तंसंशयोजीवितस्यच॥६॥स ॥राम॥
संप्रहारःसुमहान्भविष्यतिनसंशयः।अयमाख्यातिमेबाहुःस्फुरमाणोमुहुर्मुहुः॥७॥सन्निकर्षेतुनःशूरःजयंशत्रोःपराजयं॥सु ॥२५॥

प्रभंचप्रसन्नंचतववक्त्रंहिलक्ष्यते॥८॥उद्यतानांहियुद्धार्थंयेषांभवतिलक्ष्मण॥निःप्रभंवदनंतेषांभवत्यायुःपरिक्षये॥९॥र
क्षसांनर्दतांघोरःश्रूयतेहिमहाध्वनिः॥आहतानांचभेरीणांराक्षसैःक्रूरकर्मभिः॥१०॥अनागतविधानंतुकर्त्तव्यंशुभमिच्छ
ता॥आपदंशंकमानेनपुरुषेणविपश्चिता॥११॥तस्माद्गृहीत्वावैदेहींशरपाणिर्धनुर्धरः॥गुहामाश्रयशैलस्यदुर्गांपादपसंकु
लां॥१२॥प्रतिकूलितुमिच्छामिनहिवाक्यमिदंत्वया॥शापितोममपादाभ्यांगम्यतांवत्समाचिरं॥१३॥त्वंहिशूरश्चबलवान्ह
न्यादेतान्नसंशयः॥स्वयंनिहंतुमिच्छामिसर्वानेवनिशाचरान्॥१४॥एवमुक्तस्तुरामेणलक्ष्मणःसहसीतया॥शरानादायचापं
चगुहांदुर्गांसमाश्रयत्॥१५॥तस्मिन्प्रविष्टेतुगुहांलक्ष्मणेसहसीतया॥हंतनिर्युक्तमित्युक्त्वारामःकवचमाविशत्॥१६॥सते
नाग्निनिकाशेनकवचेनविभूषितः॥बभूवरामस्तिमिरेमहानग्निरिवोत्थितः॥१७॥सचापमुद्यम्यमहच्छरानादायवीर्यवान्॥
बभूवावस्थितस्तत्रज्यास्वनैःपूरयन्दिशः॥१८॥ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः॥समेयुश्चारणेस्तत्रयुद्धदर्शनकांक्ष
या॥१९॥ऋषयश्चमहात्मानोलोकेब्रह्मर्षिसत्तमाः॥समेत्यचोचुःसहितास्तेन्योन्यंपुण्यकर्मणः॥२०॥स्वस्तिगोब्राह्मणेभ्यस्तुलो
कानांयेहिसंगताः॥जयतांराघवोयुद्धेपौलस्त्यान्रजनीचरान्॥२१॥चक्रहस्तोयथायुद्धेसर्वानसुरपुंगवान्॥एतच्चान्यच्चबहवो
ब्रुवाणाःपरमर्षयः॥२२॥जातकौतूहलास्तत्रविमानस्थाश्चदेवताः॥ददृशुर्वाहिनीतेषांराक्षसानांगतायुषां॥२३॥एवमुक्त्वापुनः

॥रा॰आ॰ श्रोतुराममालोक्यचापरे।ऊचुःपरमसंत्रस्ताःगुह्यकाश्चपरस्परं॥२४॥चतुर्दशसहस्राणिरक्षसांभीमकर्मणां।एकश्चरामोधर्मा

॥२६॥ त्माकथंयुद्धंभविष्यति॥२५॥इतिराजर्षयःसिद्धाःसगणाश्चद्विजर्षभाः।जातकौतूहलास्तस्थुर्विमानस्थाश्चदेवता॥२६॥आवि

ष्टंतेजसारामंसंग्रामशिरसिस्थितं।दृष्ट्वासर्वाणिभूतानिभयाद्विव्यथिरेतदा॥२७॥रूपमप्रतिमंतस्यरामस्याक्लिष्टकर्मणः।बभू

वरूपंक्रुद्धस्यरुद्रस्येवपिनाकिनः॥२८॥इतिसंभाष्यमाणेतुदेवगंधर्वचारणैः।ततोगंभीरनिर्ह्रादंघोरवर्मायुधध्वजं॥२९॥अनी

कंयातुधानानांसमंतात्प्रत्यदृश्यत।वीरालापान्विसृजतामन्योन्यमभिगर्जतां॥३०॥चापानिविस्फारयतांगर्जतांचाप्यभी

क्ष्णशः।विप्रहृष्टस्वनानांचदुंदुभीश्चाभिनिघ्नतां॥३१॥तेषांसुविपुलःशब्दःपूरयामाससतद्वनं।तेनशब्देनवित्रस्ताःश्वापदावन

चारिणः॥३२॥दुद्रुवुर्यत्रनिःशब्दाःपृष्ठतोनावलोकयन्।तच्चानीकंमहावेगंरामंसमनुवर्तत॥३३॥धृतनानाप्रहरणंगंभी

रंसागरोपमं।रामोपिचालयन्चक्षुःसर्वतोरणपंडितः॥३४॥ददर्शखरसैन्यंतद्युद्धाभिमुखमुद्यतं।वितत्यचधनुर्भीमंतूण्या

श्चोद्धृत्यसायकान्॥३५॥क्रोधमाहारयत्तीव्रंवधार्थंसर्वरक्षसां।दुःप्रेक्ष्यश्चाभवत्क्रुद्धोयुगांताग्निरिवज्वलन्॥३६॥तंदृष्ट्वा

तेजसाविष्टंप्राद्रवन्वनदेवता।तस्यक्रुद्धस्यरूपंतुरामस्यददृशेतदा॥३७॥दक्षस्येवक्रतुंहंतुंक्रुद्धस्येवपिनाकिनः।नलका ॥राम॥

र्मुकैराभरणैर्ध्वजैश्चतैर्वाजिभिश्चाग्निसमानवर्णैः।बभूवसैन्यंपिशिताशनानांसूर्योदयेनीलमिवाभ्रराजितः॥३८॥इत्यार्षे ॥२६॥

श्रीरामायणेवाल्मीकीयेआरण्यकांडेचतुर्विंशःसर्गः॥२४॥अवष्टब्धधनुंरामंक्रुद्धंचरिपुघातिनं।ददर्शाश्रममागम्यखरः।
सहपुरःसरैः॥१॥तंदृष्ट्वासगुणं चापमुद्यम्यखरनिस्वनः।रामस्याभिमुखंसूतंचोद्यतामित्यचोदयत्॥२॥सखरस्याज्ञया
सूतस्तुरगान्समचोदयत्।यत्ररामोमहाबाहुरेकोधुन्वन्धनुःस्थितः॥३॥तंतुनिष्पतितंदृष्ट्वासर्वेतेरजनीचराः।मुंचमान
महानादंसचिवाःपर्यवारयन्॥४॥सतेषांयातुधानानांमध्येरथगतःखरः।बभूवमध्येताराणांलोहितांगइवोदितः॥५॥ततः
शरसहस्रेणराममप्रतिमौजसं।अर्दयित्वामहानादंननादसमरेखरः॥६॥ततस्तंभीमधन्वानंक्रुद्धाःसर्वेनिशाचराः।रामं
नानाविधैःशस्त्रैरभ्यवर्षंतदुर्जयं॥७॥मुद्गरैरायसैःशूलैःप्रासैःखड्गैःपरश्वधैः।राक्षसाःसमरेरामंनिर्जघ्नूरोषतत्पराः॥८॥ते
बलाहकसंकाशामहाकायामहाबलाः॥अभ्यधावंतकाकुत्स्थंरथैर्वाजिभिरेवच॥९॥गजैःपर्वतकूटाभैरामंयुद्धेजिघांस
वः॥तेरामेशरवर्षाणिव्यसृजन्राक्षसांगणाः॥१०॥शैलेंद्रमिवधाराभिर्वर्षमाणामहाघनाः॥सर्वैःपरिवृतोरामोराक्षसैःक्रूरद
र्शनैः॥११॥घोररूपैर्महादेवोवृतःपारषदांगणैः॥तानिमुक्तानिशस्त्राणियातुधानैःसराघवः॥१२॥प्रतिजग्राहविशिखैर्नद्योघा
निवसागरः॥सतैःप्रहरणैर्घोरैर्भिन्नगात्रोनविव्यथे॥१३॥रामःप्रदीप्तैर्बहुभिर्वज्रैरिवमहाबलः॥सविद्धःक्षतजादिग्धःसर्व
गात्रेषुराघवः॥१४॥बभूवरामःसंध्याभ्रैर्दिवाकरइवावृतः।विषेदुर्देवगंधर्वाःसिद्धाश्चपरमर्षयः॥१५॥एकंसहस्रैर्बहुभिस्तदाद

॥रा०आ०॥ स्यासमावृतं ततो रामः सुसंक्रुद्धो मंडलीकृतकार्मुकः ॥१६॥ ससर्ज निशितान्बाणाञ्छतशोऽथ सहस्रशः ॥ दुरावारान्दुर्विष
॥२७॥ हान्कालदंडोपमान्रणे ॥१७॥ मुमोच लीलया रामः कंकपत्रान जिह्मगान् ॥ ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ॥१८॥ आददू
रक्षसां प्राणान्पाशाः कालकृता इव ॥ भित्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ॥१९॥ अंतरिक्षगता रेजुर्दीप्ताग्निसमतेजसः ॥
असंख्येयास्तु रामस्य सायकाश्चापमंडलात् ॥२०॥ विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः ॥ तैर्धनूंषि ध्वजाग्राणि चर्माणि कव
चानि च ॥२१॥ बाहून्सहस्ताभरणानूरून्करिकरोपमान् ॥ चिच्छेद रामः समरे शतशोऽथ सहस्रशः ॥२२॥ हयान्कांचनसन्ना
हान्रथयुक्तान्ससारथीन् ॥ गजांश्च सगजारोहान्सहयान्सादिनस्तदा २३ पदातीन्समरे हत्वा ह्यनयद्यमसादनं ॥ चिच्छि
दुर्विभिदुश्चैव रामबाणा गुणाच्च्युताः ॥२४॥ ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ भीममार्तस्वरं चक्रुः छिद्यमाना निशा
चराः ॥२५॥ तत्सैन्यं निशितैर्बाणैरर्दितं मर्मभेदिभिः ॥ न रामेण सुखं लेभे शुष्कं वनमिवाग्निना ॥२६॥ केचिद्भीमबलाः शूराः शूलांश्चैव
परश्वधान् ॥ रामस्याभिमुखं स्थित्वा चिक्षिपुः परमायुधान् ॥२७॥ तानि बाणैर्महाबाहुः शस्त्राण्यावार्य राघवः ॥ जहार समरे प्राणा
न्चिच्छेद च शिरोधराः ॥२८॥ ते छिन्नशिरसः पेतुश्छिन्नवर्मशरासनाः ॥ सुपर्णपक्षविक्षिप्ता जगत्यां पादपा यथा ॥२९॥ अवशिष्टाश्च ॥राम॥
ये तत्र विषण्णाश्च निशाचराः ॥ खरमेवाभ्यधावंतः शरणार्थं शरार्दिताः ॥३०॥ तान्सर्वान्धनुरादाय समाश्वास्य च दूषणः ॥ अभ्यधावत । ॥२७॥

काकुत्स्थंक्रुद्धोरुद्रमिवांतकः।३१।निहतास्तुपुनःसर्वेदूषणाश्रयसंश्रयाः।राममेवाभ्यधावंतसालतालशिलायुधाः॥३२॥शू
लमुद्गरहस्ताश्चपाशहस्तामहाबलाः।सृजंतःशरवर्षाणिशस्त्रवर्षाणिसंयुगे॥३३॥द्रुमवर्षाणिमुंचंतःशिलावर्षाणिराक्षसा
तद्बभूवाद्भुतंयुद्धंतुमुलंरोमहर्षणं॥३४॥रामस्यास्यमहाघोरंपुनस्तेषांचरक्षसां।तेसमंतादभिक्रुद्धाराघवंपुनरर्दयन्॥
३५॥तैश्चसर्वादिशोदृष्ट्वाप्रदिशश्चसमावृताः।राक्षसैरुद्यतप्रासैःशरवर्षाणिवर्षिभिः॥३६॥सकृत्वाभैरवंनादमस्त्रंपरम
भास्वरं॥संयोजयतगांधर्वंराक्षसेषुमहाबलः॥३७॥ततःशरसहस्राणिनिर्ययुश्चापमंडलात्॥सर्वादशदिशोबाणैमापूर्यंत
समागजे॥३८॥नाददानंशरान्घोरान्नमुंचंतंशरोत्तमान्॥विकर्षमाणंपश्यंतिराक्षसास्तेशरार्दिताः।३९।शरांधकारमाक
शमावृणोत्सदिवाकरं॥बभूवावस्थितोरामोप्रवर्षन्निशितान्शरान्॥४०॥युगपत्पतमानैश्चयुगपच्चहितैःशरैः।युगपत्पति
तैश्चैवविस्तीर्णावसुधाभवत्॥४१॥निहताःपतिताःक्षीणाःछिन्नाभिन्नाविदारिताः।तत्रतत्रस्मदृश्यंतेराक्षसास्तेसहस्रशः॥
४२॥सोष्णीषैरुत्तमांगैश्चसांगदैर्बाहुभिस्तथा।ऊरुभिर्जानुभिश्छिन्नैर्नानारूपैर्विभूषणैः॥४३॥हयैश्चद्विपमुख्यैश्चरथैर्भिन्नै
रनेकशः॥चामरैर्व्यजनैःछत्रैर्ध्वजैर्नानाविधैरपि॥४४॥रामस्यबाणाभिहतैर्विछिन्नैःशूलपट्टिशैः॥खड्गैःखंडीकृतैःप्रासैर्विकी
र्णैश्चपरस्वधैः॥४५॥चूर्णिताभिःशिलाभिश्चशरैश्छिन्नैरनेकशः॥विछिन्नैस्तोमरैर्भूमिर्विस्तीर्णाभूद्भयंकराः॥४६॥तान्दृष्ट्वानिह

तान् संरब्धे राक्षसान् परमातुरान्॥ न तत्र सहितुं शक्ता रामं परपुरंजयं॥४७॥ बलावशेषं तु निरस्तमाहवे खराधिकं राक्षस
दुर्बलं बलं॥ जघान रामः स्थिरधर्मपौरुषो धनुर्बलाद् प्रतिवारणैः शरैः॥४८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे पंच
विंशः सर्गः॥२५॥ दूषणस्तु स्वकं सैन्यं हन्यमानं विलोक्य च संदिदेश महाबाहुर्भीमवेगान्दुरासदान्॥१॥ राक्षसान् पंच साहस्रा
न् समरेष्व निवर्तिनः॥ ते शूलैः पट्टिसैः खड्गैः शिलावर्षैर्द्रुमैरपि॥२॥ शरवर्षैरविच्छिन्नं ववर्षुस्तं समंततः॥ तद्द्रुमाणां शिलानां च
वर्षं प्राणहरं महत्॥३॥ प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः॥ प्रतिगृह्य च तद्वर्षं निमीलितइव र्षभः॥४॥ रामः क्रोधं परं
लेभे वधार्थं सर्वरक्षसां॥ ततः क्रोधसमाविष्टः प्रदीप्तइव तेजसा॥५॥ शरैरभ्यहनत्तूर्णं सर्वतः सहदूषणं॥ ततः सेनापतिः क्रुद्धो
दूषणः शत्रुदूषणः॥६॥ शरैरशनिकल्पैस्तं राघवं समवाकिरत्॥ ततो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः॥७॥ चिच्छेद समरे वीरश्च
तुर्भिश्चतुरो हयान्॥ हत्वा चाश्वान् शरैस्तीक्ष्णैरर्धचंद्रेण सारथेः॥८॥ शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि॥ सच्छिन्नधन्वा विर
थो हताश्वो हतसारथिः॥९॥ जग्राह गिरिशृंगाभं परिघं रोमहर्षणं॥ वेष्टितं कांचनैः पट्टैर्देवसैन्याभिमर्दनं॥१०॥ आयसैः शंकुभिस्ती
क्ष्णैः कीर्णं परवसोक्षितं॥ वज्राशनिसमस्पर्शं परगोपुरदारणं॥११॥ तं महोरगसंकाशं प्रगृह्य परिघं रणे॥ दूषणोऽभ्यपतद्रामं क्रूर
कर्मा निशाचरः॥१२॥ तस्याभिपतमानस्य दूषणस्य स राघवः॥ द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ॥१३॥ भ्रष्टस्तस्य महा

कायःपपातरणमूर्द्धनि। परिघःछिन्नहस्तस्यशक्रध्वजइवायतः॥१४॥सकराभ्यांविकीर्णाभ्यांपपातभुविदूषणः। विषा
णाभ्यांविशीर्णाभ्यांमनस्वीवमहागजः॥१५॥दृष्ट्वातंपतितंभूमौदूषणंनिहतंरणे। साधुसाध्विति काकुत्स्थंसर्वभूतान्यपूजय
न्॥१६॥एतस्मिन्नंतरेक्रुद्धास्त्रयःसेनाग्रयायिनः। सहंत्याभ्यद्रवन्रामंमृत्युपाशावपाशिताः॥१७॥महाकपालःस्थूलाक्षःप्रमा
थीचपरस्वधं। हस्तेवापतनस्तांस्तुराघवःसायकैःशितैः॥१९॥तीक्ष्णाग्रैःप्रतिजग्राहसंप्राप्तानतिथीनिव। महाकपालस्यशि
रश्चिच्छेदरघुनंदनः॥२०॥असंख्येयेस्तुवाणौघैःप्रममाथप्रमाथिनं स्थूलाक्षस्याक्षिणीतीक्ष्णैःपूरयामाससायकैः॥२१॥सप
पातहतोभूमौविटपीवमहाद्रुमः। दूषणस्यानुगान्पंचसहस्रान्कुपितःक्षणात्॥२२॥हत्वातुपंचसाहस्रानन्यद्यमसादनं॥
दूषणंनिहतंदृष्ट्वातस्यचैवपदानुगान्॥२३॥मादिदेशखरःक्रुद्धःसेनाध्यक्षान्महाबलान्॥अयंविनिहतःशेतेदूषणःसपदा
नुगः॥२४॥महत्यासेनयासार्द्धंयुद्ध्वारामंकुमानुषं॥शस्त्रैर्नानाविधाकारैर्हनध्वंसर्वराक्षसाः॥२५॥एवमुक्त्वाखरःक्रुद्धोराममे
वाभिदुद्रुवे॥२५॥श्येनगामीपृथुग्रीवोयज्ञशत्रुर्विहंगमः॥दुर्ज्जयःकरवीराक्षःपरुषःकालकार्मुकः॥२६॥हेममालीमहामा
लीसर्पास्योरुधिराशनः॥द्वादशैतेमहावीर्यावलाध्यक्षाःससैनिकाः॥२७॥राममेवाभ्यधावंतविसृजंतःशरोत्तमान्॥ततःपा
वकसंकाशैर्हेमवज्रविभूषितैः॥२८॥जघानशेषंतेजस्वीतस्यसैन्यस्यसायकैः। तेरुक्मपुंखाविशिखाःसधूमाइवपावकाः

॥रा०आ०॥ ॥२९॥

॥२९॥ निजघ्नुस्तानि रक्षांसि वज्रादिव महासुरान् ॥ रक्षसां तु शतं रामः शरेणैकेन कर्णिना ॥ ३० ॥ सहस्रं तु सहस्रेण जघान रणमूर्द्धनि
तैर्भिन्नवर्म्माभरणाश्छिन्नभिन्नशरासनाः ॥ ३१ ॥ निपेतुः शोणितादिग्धा धरण्यां रजनीचराः ॥ तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षि
तैः ॥ ३२ ॥ आस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव ॥ तत्क्षणे तु महाघोरं वनं निहतराक्षसं ॥ ३३ ॥ वभूव निरयप्रख्यं मांसशोणि
तकर्दमं ॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ॥ ३४ ॥ हतान्येकेन रामेण मानुषेण पदातिना ॥ तस्य सैन्यस्य सर्वस्य खरः
शेषो महारथः ॥ ३५ ॥ राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ शेषा हता महावीर्या राक्षसा रणमूर्द्धनि ॥ ३६ ॥ घोरा दुर्विषहाः
सर्वे लक्ष्मणस्याग्रजेन ते ॥ ३७ ॥ ततस्तु तद्भीमबलं महाहवे समीक्ष्य रामेण हतं बलीयसा ॥ रथेन रामं महता खरस्ततः समास
सादेन्द्र इवोद्यताशनिः ॥ ३८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे षड्विंशः सर्गः ॥ २६ ॥ खरं तु रामाभिमुखं प्रयांतं वाहि
नीपतिं राक्षसस्त्रिशिरा नाम संनिपत्येदमब्रवीत् ॥ १ ॥ मां नियोजय संग्रामे संनिवर्त्तस्व साहसात् ॥ पश्य रामं महावाहुं संयुगे
विनिपातितं ॥ २ ॥ प्रतिजानामि ते सत्यमायुधं चाहमालभे ॥ यथा रामं वधिष्यामि वधार्थं सर्वरक्षसां ॥ ३ ॥ अहं वास्य रणे मृत्युरेषा
वा समरे मम ॥ विनिवर्त्य रणोत्साहान्मुहूर्तं प्राश्निको भव ॥ ४ ॥ प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि ॥ मयि वा निहते रामं संयु ॥राम॥
गाय प्रयास्यसि ॥ ५ ॥ खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः ॥ गच्छ युद्ध्येत्यनुज्ञातो राघवाभिमुखो ययौ ॥ ६ ॥ त्रिशिराश्च रथेने ॥२९॥

वाजियुक्तेनभास्वता॥अभ्यद्रवद्रणेरामंत्रिशृंगइवपर्वतः॥७॥शरधारासमूहान्सःमहामेघइवोत्सृजन्॥व्यसृजन्भैरवंनादं
जलार्द्रस्येवदुंदुभेः॥८॥आगच्छंतंत्रिशिरसंराक्षसंप्रेक्ष्यराघवः॥धनुषाप्रतिजग्राहविधुन्वन्सायकान्छितान्॥९॥ससंप्र
हारस्तुमुलोरामत्रिशिरसोर्महान्॥संबभूवातिबलिनोःसिंहकुंजरयोरिव॥१०॥ततस्त्रिशिरसाबाणैर्ललाटेताडितस्त्रिभिः
अमर्षःकुपितोरामःसंरब्धइदमब्रवीत्॥११॥अहोविक्रमशूरस्यराक्षसस्येदृशंबलं॥पुष्पैरिवशरैर्योहंललाटेस्मिपरि
क्षतः॥१२॥ममापिप्रतिगृह्णीष्वशरांश्चापगुणच्युतान्॥एवमुक्तःसुसंक्रुद्धःशरानाशीविषोपमान्॥१३॥त्रिशिरोवक्षसिक्रु
द्धोनिजघानचतुर्दश॥चतुर्भिस्तुरगानस्यशरैःसन्नतपर्वभिः॥१४॥न्यपातयततेजस्वीचतुरस्तस्यवाजिनः॥अष्टभिःसायकैः
सूतंरथोपस्थेन्यपातयत्॥१५॥रामश्चिच्छेदबाणेनध्वजंचास्यसमुच्छ्रितं॥ततोहतरथात्तस्मादुत्पतंतंनिशाचरं॥१६॥चिच्छेद
रामस्तंबाणैर्हृदयेनाभवज्जडः॥सायकैश्चाप्रमेयात्मासामर्षात्तस्यरक्षसः॥१७॥शिरांस्यपातयत्त्रीणिवेगवद्भिस्त्रिभिःशरैः॥
सभूमौशोणितोद्गारीरामबाणाभिपीडितः॥१८॥न्यपतत्पतितैःपूर्वंस्वशिरोभिर्निशाचरः॥हतशेषास्ततोभग्नाराक्षसाःखरसं
श्रयाः॥१९॥द्रवंतिस्मनतिष्ठंतिव्याघ्रत्रस्तामृगाइव॥तान्खरोद्रवतोदृष्ट्वानिवर्त्यरुषितःस्वयं॥राममेवाभिदुद्रावराहुश्चंद्रम
संतथा॥२०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेसप्तविंशसर्गः॥२७॥निहतंदूषणंदृष्ट्वारणेत्रिशिरसासह॥खरस्या

॥रा०आ०॥ प्यभवत्त्रासोदृष्ट्वारामस्यविक्रमं॥१॥दृष्ट्वासराक्षसंसैन्यमविषह्यंमहाबलः।हतमेकेनरामेणदूषणंत्रिशिरावपि॥२॥तद्बलं
॥३०॥ हतभूयिष्ठंविमनाःप्रेक्ष्यराक्षसः।आससादखरोरामंनमुचिर्वासवंयथा॥३॥विकृष्यबलवच्चापंनाराचान्रक्तभोजनान्।खर
श्चिक्षेपरामायक्रुद्धानाशीविषानिव॥४॥ज्यांविधून्वन्सुबहुशःशिक्षयास्त्राणिदर्शयन्।चचारसमरेमार्गान्शरैरथगतःख
रः॥५॥ससर्वाश्चदिशोबाणैःप्रदिशश्चमहारथः।पूरयामासतंदृष्ट्वारामोपिसुमहद्धनुः॥६॥ससायकैर्दुर्विषहैःसस्फुलिंगैरिवा
ग्निभिः।नभश्चकाराविवरंपर्जन्यइववृष्टिभिः॥७॥तद्बभूवशितैर्बाणैःखररामविसर्जितैः।पर्याकाशमनाकाशंसर्वतःशर
संकुलं॥८॥शरजालावृतःसूर्योनतदासंप्रकाशते।अन्योन्यवधसंरंभादुभयोःसंप्रयुध्यतोः॥९॥ततोनालीकनाराचैस्ती
क्ष्णाग्रैश्चविकर्णिभिः।आजघानरणेरामंतोत्रैरिवमहाद्विपं॥१०॥तंरथस्थंधनुष्पाणिंराक्षसंपर्यवस्थितं ददृशुःसर्वभूतानि
पाशहस्तमिवांतकं॥११॥हंतारंतस्यसैन्यस्यपौरुषेपर्यवस्थितं।परिश्रांतंमहासत्वंमेनेरामंखरस्तदा॥१२॥तंसिंहमिवविक्रांतं
सिंहविक्रांतगामिनं।दृष्ट्वानोद्विजतेरामःसिंहःक्षुद्रमृगंयथा॥१३॥ततःसूर्यनिकाशेनरथेनमहताखरः।आससादरणेरामंप
तंगइवपावकं॥१४॥ततोस्यसशरंचापंमुष्टिदेशेमहात्मनः।खरश्चिच्छेदरामस्यदर्शयन्पाणिलाघवं॥१५॥सपुनस्त्वपरान्सप्त ॥राम॥
शरानादायमर्मणि।निजघानरणेक्रुद्धःशक्राशनिसमप्रभान्॥१६॥ततःशरसहस्रेणराममप्रतिमौजसं।अर्दयित्वामहानादंन ॥३०॥

नादसमरे खरः ॥१७॥ ततस्तत्प्रहतं बाणैः खरमुक्तैः सुपर्वभिः । पपात कवचं भूमौ रामस्यादित्यवर्चसः ॥१८॥ स शरैरर्पितः क्रुद्धः स
र्वगात्रेषु राघवः ॥ रराज समरे रामो विधूमोऽग्निरिव ज्वलन् ॥१९॥ ततो गंभीरनिर्ह्रादं रामः शत्रुनिवर्हणः । चकारांताय स रिपोः स
ज्यमन्यन्महद्धनुः ॥२०॥ सुमहद्वैष्णवं यत्तदतिसृष्टं महर्षिणा । वरं तद्धनुरायम्य खरं समभिधावत ॥२१॥ ततः कनकपुंखैस्तु
शरैः सन्नतपर्वभिः ॥ चिच्छेद रामः संक्रुद्धः खरस्य समरे ध्वजं ॥२२॥ स दर्शनीयो बहुधा विच्छिन्नः कांचनो ध्वजः ॥ जगाम धरणीं
सूर्यो देवतानामिवाज्ञया ॥२३॥ तं चतुर्भिः खरः क्रुद्धो रामं गात्रेषु मार्गणैः । विव्याध युधि मर्मज्ञो मातंगमिव तोमरैः ॥२४॥ स रामो ब
हुभिर्बाणैः खरकार्मुकनिःसृतैः । विद्धो रुधिरदिग्धांगो बभूव रुषितो भृशं ॥२५॥ स धनुर्धन्विनां श्रेष्ठः प्रगृह्य परमाहवे ॥ मुमो
च परमेष्वासः षट् शरानभिलक्षितान् ॥२६॥ शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्पयत ॥ त्रिभिश्चंद्रार्द्धवक्त्रैश्च वक्षस्यभिज
घान ह ॥२७॥ ततः पश्चान्महातेजा नाराचान्भास्करोपमान् ॥ जिघांसू राक्षसं क्रुद्धस्त्रयोदश शिलाशितान् ॥२८॥ ततोऽस्य युगमे
केन चतुर्भिः शबलान्हयान् ॥ षष्ठेन च शिरः संख्ये खरस्य रथसारथेः ॥२९॥ त्रिभिस्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ॥ द्वाद
शेन तु बाणेन खरस्य सशरं धनुः ॥३०॥ छित्वा वज्रनिकाशेन राघवः प्रहसन्निव ॥ त्रयोदशेनेंद्रसमो बिभेद समरे खरं ॥३१॥ प्रभ
ग्नधन्वा विरथो हताश्वो हतसारथिः ॥ गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥३२॥ तत्कर्म रामस्य महारथस्य समेत्य देवाश्च

॥रा०आ० महर्षयश्च ॥ अपूजयन्प्रांजलयः प्रहृष्टास्ते विमानाग्रगताः समेता ॥ ३३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे ऽष्टा
॥२१॥ विंशतितमः ॥ २८ ॥ खरं तु विरथं रामो गदापाणिमवस्थितं ॥ मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥ गजाश्वरथसंबाधे व
ले महति तिष्ठता ॥ कृतं सुदारुणं कर्म सर्वलोकजुगुप्सितं ॥ २ ॥ उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ॥ त्रयाणामपि लोका
नामीश्वरोपि न तिष्ठति ॥ ३ ॥ कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर ॥ तीक्ष्णं सर्वजनो हंति सर्पं दुष्टमिवागतं ॥ ४ ॥ लोभात्पापानि
कुर्वाणः कामाद्वा यो न बुध्यते ॥ भ्रष्टः पश्यति तस्यांतं ब्राह्मणी करकादिव ॥ ५ ॥ वसंतो दंडकारण्ये तापसान्धर्मचारिणः ॥ कि
न्नु हत्वा महाभागान्फलं प्राप्स्यसि राक्षस ॥ ६ ॥ न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः ॥ ऐश्वर्यं प्राप्य तिष्ठंति शीर्णमूला इव
द्रुमाः ॥ ७ ॥ अवश्यं लभते कर्ता फलं पापस्य कर्मणः ॥ घोरं पर्यागते काले द्रुमः पुष्पमिवार्तवं ॥ ८ ॥ न चिरात्प्राप्यते लोके पापानां क
र्मणां फलं ॥ सविषाणमिवान्नानां भुक्तानां क्षणदाचर ॥ ९ ॥ पापमाचरतां घोरं लोकस्याप्रियमिच्छतां ॥ अहमासादितो राज्ञा प्रा
णान्हंतुं निशाचर ॥ १० ॥ अद्य हि त्वा मया मुक्ताः शराः कांचनभूषणाः ॥ विदार्यातिपतिष्यंति वल्मीकमिव पन्नगाः ॥ ११ ॥ ये त्वया दंडका
रण्ये भक्षिता धर्मचारिणः ॥ तानद्य निहतः संख्ये ससैन्योनुगमिष्यसि ॥ १२ ॥ अद्य त्वां निहतं बाणैः पश्यंतु परमर्षयः ॥ निरयस्थं वि ॥राम॥
मानस्था ये त्वया निहताः पुरा ॥ १३ ॥ प्रहरस्व यथाकामं कुरु यत्नं कुलाधम ॥ अद्य ते पातयिष्यामि शिरस्तालफलं यथा ॥ १४ ॥ एव ॥२१॥

मुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः॥ प्रत्युवाच ततो रामं प्रहसन् क्रोधमूर्छितः॥१५॥ प्राकृतान् राक्षसान् हत्वा युद्धे दशरथात्मज
आत्मना कथमात्मानमप्रशस्यं प्रशंससि॥१६॥ विक्रांता बलवंतो वा ये भवंति नरर्षभाः। कथयंति न ते किंचित्तेजसा स्वेन गर्विताः
॥१७॥ प्राकृतास्त्वकृतात्मानो लोके क्षत्रियपांसनाः॥ निरर्थकं विकत्थंते यथा राम विकत्थसे॥१८॥ कुलं व्यपदिशन् वीरः समरे कोभि
धास्यति॥ मृत्युकाले तु संप्राप्ते स्वयमप्रस्तवे स्तवं॥१९॥ सर्वथैव लघुत्वं ते कत्थनेन विदर्शितं॥ सुवर्णप्रतिरूपेण तप्तेनेव कुशा
ग्निना॥२०॥ न तु मामिह तिष्ठंतं पश्यसि त्वं गदाधरं॥ धराधरमिवाकंप्यं पर्वतं धातुभिश्चितं॥२१॥ पर्याप्तोहं गदापाणिर्हंतुं प्राणान् र
णे तव॥ त्रयाणामपि लोकानां पाशहस्तमिवांतकः॥२२॥ कामं बह्वपि वक्तव्यं त्वयि वक्ष्यामि न त्वहं॥ अस्तं गच्छेद्धि सविता युद्धवि
घ्नस्ततो भवेत्॥ चतुर्दश सहस्राणि राक्षसानां हतानि ते॥ त्वद्विनाशात्करोम्यद्य तेषामश्रुप्रमार्जनं॥२३॥ ततो रुधिरधाराभिस्त्वच्छरीर
विमर्दनात्॥ करिष्यामि बलिं भूमौ त्वां हत्वा सर्वरक्षसां॥२४॥ इत्युक्त्वा परमक्रुद्धः तां गदां कनकांकितां॥ खरश्चिक्षेप रामाय प्रदीप्ता
मशनिं यथा॥२५॥ खरबाहुप्र मुक्ता सा प्रदीप्ता महती गदा॥ भस्म वृक्षांश्च गुल्मांश्च कृत्वागात्तत्समीपतः॥२६॥ तामापतंतीं ज्वलितां
मृत्युपाशोपमां गदां॥ अंतरिक्षगतां रामश्चिच्छेद बहुधा शरैः॥२७॥ सा विशीर्णा शरैर्दग्धा पपात धरणीतले॥ गदा मंत्रौषधबलैर्व्याली
व विनिपातिता॥२८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे एकोनत्रिंशः सर्गः॥२९॥ भित्वा तु तां गदां बाणै राघवो धर्मवत्सलः

॥रा०आ० स्मयमानःखरंवाक्यंसंरब्धमिदमब्रवीत्॥१॥एतत्तेबलसर्वस्वंदर्शितंराक्षसाधम।शक्तिहीनतरोमत्तोवृथात्वमवगर्जसि॥२॥ए
॥३२॥ षाबाणविनिर्भिन्नागदाभूमितलंगता।अभिधानप्रगल्भस्यतवर्द्धप्रत्ययघातिनी॥३॥यत्त्वयोक्तंविनष्टानामिदमश्रुप्रमार्जनं
राक्षसानांकरोमीतिमिथ्यातदपितेवचः॥४॥नीचस्यक्षुद्रशीलस्यमिथ्यावृत्तस्यराक्षस।प्राणानपहरिष्यामिगरुत्मानमृतंयथा
॥५॥अद्यतेभिन्नकंठस्यफेनबुद्बुदभूषितं।विदारितस्यमद्बाणैर्महीपास्यतिशोणितं॥६॥पांसुगुंठितसर्वांगःस्रस्तभुजद्वयःस्व
प्स्यसेगांसमाश्लिष्यदुर्लभांप्रमदामिव॥७॥प्रवृद्धनिद्रेशयितेत्वयिराक्षसपांसने।भविष्यंत्यशरण्यानांशरण्यादंडकाइमे॥८॥
जनस्थानेहतस्थानेतवराक्षसमच्छरैः।निर्भयाविचरिष्यंतिसर्वतोमुनयोवने॥९॥अद्यविप्रसरिष्यंतिराक्षस्योहतबांधवाः
बाष्पार्द्रवदनादीनाभयादन्यभयावहाः॥१०॥अद्यशोकरसज्ञास्ताभविष्यंतिनिरर्थकाः।अनुरूपकुलाःपत्न्योयासांत्वंपतिरीदृ
शः॥११॥नृशंसशीलक्षुद्रात्मन्नित्यंब्राह्मणकंटक।यत्कृतेशंकितैरग्नौमुनिभिःपात्यतेहविः॥१२॥तमेवमभिसंरब्धंब्रुवाणंराघवंर
णे।खरोनिर्भर्त्सयामाससरोषात्खरतरस्वनः॥१३॥दृढंखल्ववलिप्तोसिभयेष्वपिचनिर्भयः।वाच्यावाच्यंततोहित्वंमृत्युवश्योनबुध्यसे
॥१४॥कालपाशपरिक्षिप्ताभवंतिपुरुषाहिये।कार्याकार्यंनजानंतितेनिरस्तषडिंद्रियाः॥१५॥एवमुक्त्वाततोरामंसंरुध्यभ्रुकुटिंततः ॥राम॥
सददर्शमहासालमविदूरेनिशाचरः॥१६॥रणेप्रहरणस्यार्थेसर्वतोह्यवलोकयन्।सतमुत्पाटयामाससंदश्यदशनच्छदं॥१७॥ ॥३२॥

तंसमुत्क्षिप्यवाहुभ्यांविनर्द्यमहावलः।राममुद्दिश्यचिक्षेपहतस्त्वमितिचाब्रवीत्।१८तमापतंतंवाणौघैश्छित्वारामःप्र
तापवान्।रोषमाहारयत्तीव्रंनिहंतुंसमरेखरं।१९जातस्वेदस्ततोरामोरोषाद्रक्तांतलोचनः।निर्बिभेदसहस्रेणवाणानांसमरे
खरं।२०।तस्यवाणांतरेरक्तंवहुसुस्रावफेनिलं।गिरेःप्रस्रवणस्येवतोयधारापरिस्रवः।२१विह्वलःसकृतोवाणैःखरोरा
मेणसंयुगे।मत्तोरुधिरगंधेनतमेवाभ्यपतद्द्रुतं।२२तमापतंतंसंप्रेक्ष्यकृतास्त्रोरुधिराप्लुतं।अपासर्पत्प्रतिपदंकिंचि
त्वरितविक्रमः।२३।ततःपावकसंकाशंवधायसमरेशरं।खरस्यरामोजग्राहब्रह्मदंडमिवापरं।२४।सतुदत्तंमघवतासु
रराजेनधीमता।संदधेचसधर्मात्मामुमोचचखरंप्रति।२५समुक्तोमहावाणोनिर्घातसमनिस्वनः।रामेणधनुरायम्य
खरस्योरसिचापतत्।२६।सपपातखरोभूमौदह्यमानःशराग्निना।रुद्रेणेवविनिर्दग्धःश्वेतारण्येयथांतकः।२७।सवृत्रइ
ववज्रेणफेनेननमुचिर्यथा।वलोयथाशनिहतोनिपपातहतःखरः।२८।एतस्मिन्नंतरेदेवाश्चारणैःसहसंगताः।दुंदुभींश्चा
भिनिघ्नंतःपुष्पवर्षसमंततः।२९।रामस्योपरिसंहृष्टाववर्षुर्विस्मितास्तदा।अर्द्धाधिमुहूर्त्तेनरामेणनिशितैःशरैः।३०।चतुर्दश
सहस्राणिरक्षसांकामरूपिणां।खरदूषणमुख्यानांनिहतानिमहामृधे।३१।अहोवतमहत्कर्मरामस्यविदितात्मनः।अहोवी
र्यमहोदार्क्ष्यंविष्णोरिवहिदृश्यते।३२।इत्येवमुक्तातेसर्वेययुर्देवायथागतं।ततोराजर्षयःसर्वेसंगतापरमर्षयः।३३।सभा

 ज्यमुदितारामंसागस्त्याइदमब्रुवन्।एतदर्थंमहातेजामहेंद्रःपाकशासनः॥३४शरभंगाश्रमंपुण्यमाजगामपुरंदरः॥आनी
 तस्त्वमिमंदेशंमुपायेनमहर्षिभिः॥३५॥एषांवधार्थंशत्रूणांरक्षसांपापकर्मणां।तदिदंन्नःकृतंकार्यंत्वयादशरथात्मज॥३६॥स्व
धर्मंप्रचरिष्यंतिदंडकेषुमहर्षयः॥एतस्मिन्नंतरेवीरोलक्ष्मणःसहसीतया॥३७॥गिरिदुर्गाद्विनिष्क्रम्यसंविवेशाश्रमंसु
खं॥ततोरामस्तुविजयीपूज्यमानोमहर्षिभिः॥३८॥प्रविवेशाश्रमंवीरोलक्ष्मणेनाभिवादितः॥तंदृष्ट्वाशत्रुहंतारंमहर्षीणांसु
खावहं॥३९॥वभूवहृष्टावैदेहीभर्त्तारंपरिषस्वजे॥मुदापरमयायुक्तादृष्ट्वारक्षोगणान्हतान्॥४०॥रामंचैवाव्ययंदृष्ट्वातु
तोषजनकात्मजा।ततस्तुतंराक्षससंघमर्द्दनंसभाज्यमानंमुदितैर्महर्षिभिः।पुनःपरिष्वज्यशशिप्रभाननावभूवहृष्टाज
नकात्मजातदा॥४२॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेत्रिंशःसर्गः॥३०॥ त्वरमाणस्ततोगत्वाजनस्थानादकंप
नः।प्रविश्यलंकांवेगेनरावणंवाक्यमब्रवीत्॥१॥जनस्थानस्थिताराजन्राक्षसाबहवोहताः।खरश्चनिहतःसंख्येकथंचि
दहमागतः॥२॥एवमुक्तोदशग्रीवःक्रुद्धःसंरक्तलोचनः॥अकंपनमुवाचेदंनिर्दहन्निवतेजसा॥३॥केनरम्यंजनस्थानंहतं
ममपरासुना॥कोद्यसर्वेषुलोकेषुगतिंनाधिगमिष्यति॥४॥नहिमेविप्रियंकृत्वाशक्यंमघवतासुखं॥प्राप्तुंवैश्रवणेनापि 
नयमेननविष्णुना॥५॥कालस्यचाप्यहंकालोदहेयमपिपावकं॥मृत्युंमरणधर्मेणसंयोजयितुमुत्सहे॥६॥वातस्यतरसा 

वेगंनिहंतुमहमुत्सहे।दहेयंवास्वयंक्रुद्धस्तेजसादित्यपावकौ॥७॥तथाक्रुद्धंदशग्रीवंकृतांजलिरकंपनः।भयात्संदिग्धया
वाचारावणंयाचतेभयं॥८॥दशग्रीवोऽभयंतस्मैप्रददौरक्षसांवरः।सविस्रब्धोऽब्रवीद्वाक्यंअसंदिग्धमकंपनः॥९॥पुत्रोद
शरथस्यास्तिसिंहसंहननोयुवा॥रामोनाममहास्कंधोवृत्तायतमहाभुजः॥१०॥श्यामःपृथुयशाःश्रीमानतुल्यबलविक्रमः
हतंतेनजनस्थानंखरश्चसहदूषणः॥११॥अकंपनवचःश्रुत्वारावणोराक्षसाधिपः॥नागेंद्रइवनिश्वस्यइदंवचनमब्रवी
त्॥१२॥ससुरेंद्रेणसंयुक्तोरामःसर्वामरैःसह॥उपयातोजनस्थानंब्रूहिकच्चिदकंपन॥१३॥रावणस्यपुनर्वाक्यंनिशम्यतद
कंपनः॥आचचक्षेबलंतस्यविक्रमंचमहात्मनः॥१४॥रामोनाममहातेजाःश्रेष्ठःसर्वधनुष्मतां॥दिव्यास्त्रगुणसंपन्नःपुरंद
रसमोयुधि॥१५॥तस्यानुरूपोबलवान्रक्ताक्षोदुंदुभिस्वनः।कनीयान्लक्ष्मणोनामभ्राताशशिनिभाननः॥१६॥सतेनसहसंयुक्तः
पावकेनानिलोयथा॥श्रीमान्राजवरस्तेनजनस्थानंनिपातितं॥१७॥नैवदेवामहात्मानोनात्रकार्याविचारणा॥शरारामेणतत्सृ
ष्टारुक्मपुंखाःपतत्रिणः॥१८॥सर्पाःपंचाननाभूत्वाभक्षयंतिस्मराक्षसान्॥येनयेनचगच्छंतिराक्षसाभयकर्षिताः॥१९॥तेनतेन
स्मपश्यंतिराममेवाग्रतःस्थितं॥इत्थंविनाशितंतेनजनस्थानंतवानघ॥२०॥अकंपनवचःश्रुत्वारावणोवाक्यमब्रवीत्।ज
नस्थानंगमिष्यामिहंतुंरामंसलक्ष्मणं॥२१॥अथैवमुक्तेवचनेप्रोवाचेदमकंपनः॥शृणुराजन्यथावृत्तंरामस्यबलपौरुषं॥२२

॥रा०आ०॥ असाध्यःकुपितोरामोविक्रमेणमहायशाः॥आपगायाःसुपूर्णायावेगंपरिहरेच्छरैः॥२३॥सतारग्रहनक्षत्रंनभश्चाप्यवसादये
॥३४॥ त्॥असौरामस्तुसीदंतींश्रीमानभ्युद्धरेन्महीं॥२४॥भित्वावेलांसमुद्रस्यलोकानाप्लावयेदिमान्॥वेगंवापिसमुद्रस्यवायुंवाविध
मेच्छरैः॥२५॥संहृत्यवापुनर्लोकान्विक्रमेणमहायशाः॥शक्तःसपुरुषव्याघ्रःस्रष्टुंपुनरपिप्रजाः॥२६॥नहिरामोदशग्रीवशक्यो
जेतुंत्वयायुधि॥रक्षसांवापिलोकेनस्वर्गःपापजनैरिव॥२७॥नतंवध्यमहंमन्येसर्वैर्देवासुरैरपि॥अयंतस्यवधोपायस्तन्ममै
कमनाःशृणु॥२८॥भार्यातस्योत्तमालोकेसीतानामसुमध्यमा॥श्यामासमविभक्तांगीस्त्रीरत्नंरत्नभूषिता॥२९॥नैवदेवीनगं
धर्वीनाप्सरानापिदानवी॥तुल्यासीमंतिनीतस्यामानुषीषुकुतोभवेत्॥३०॥तस्यापहरभार्यांतांप्रमथ्यतुमहावने॥सीतयार
हितःकामीरामोहास्यतिजीवितं॥३१॥अरोचयततद्वाक्यंरावणोराक्षसाधिपः॥चिंतयित्वामहाबाहुरकंपनमुवाचह॥३२॥बाढं
काल्यंगमिष्यामिएकःसारथिनासह॥आनेष्यामिचवैदेहीमिमांहृष्टोमहापुरीं॥३३॥अथैवमुक्त्वाप्रययौखरयुक्तेनरावणः॥
रथेनादित्यवर्णेनदिशःसर्वाःप्रकाशयन्॥३४॥सरथोराक्षसेंद्रस्यनक्षत्रपथगोमहान्॥सत्वर्यमाणःशुशुभेजलदेचंद्रमा
इव॥३५॥समारीचाश्रमंगच्छन्ताटकेयमुपागमत्॥मारीचेनार्चितोराजाभक्ष्यभोज्यैरमानुषैः॥३६॥तंस्वयंपूजयित्वातुआसने ॥राम॥
नोदकेनच॥अर्थोपहितयावाचामारीचोवाक्यमब्रवीत्॥३७॥कच्चित्सकुशलंराजन्लोकानांराक्षसाधिप आशंकेनाथजाने ॥३४॥

त्वांयतस्तूर्णमिहागतः॥३८॥एवमुक्तोमहातेजामारीचेनसरावणः।ततपश्चादिदंवाक्यमब्रवीद्वाक्यकोविदः॥३९॥आरक्षे
मेहतस्तातरामेणाक्लिष्टकर्मणा।जनस्थानमवध्यंतत्सर्वंयुधिनिपातितं॥४०॥तस्यमेकुरुसाचिव्यंतस्यभार्यापहारणे॥रा
क्षसेंद्रवचःश्रुत्वामारीचोवाक्यमब्रवीत्॥४१॥आख्याताकेनसासीतामित्ररूपेणशत्रुणा।त्वयाराक्षसशार्दूलकोनेनंदति
नंदितः॥४२॥सीतामिहानयस्वेतिकोब्रवीतिब्रवीहिमे॥रक्षोलोकस्यकःशृंगंछेत्तुमिछतिसांप्रतं॥४३॥प्रोत्साहयतियश्चत्वां
सचशत्रुर्नसंशयः।आशीविषमुखाद्दंष्ट्रामुद्धर्त्तुंचेछतित्वया॥४४॥कर्मणानेनकेनासिकापथंप्रतिपादितः।सुखसुप्तस्यते
राजन्प्रहृतंकेनमूर्द्धनि॥४५॥विशुद्धवंशाभिजनाग्रहस्तस्तेजोमदःसंस्थितदोर्विषाणः।उद्वीक्षितुंरावणनेहयुक्तःससंयुगे
राघवगंधहस्ती॥४६॥असौरणांतस्थितिसंधिवालोविदग्धरक्षोमृगहानृसिंहः।सुप्तस्त्वयावोधयितुंनयुक्तःशरांगपूर्णोनि
स्त्रिंतासिदंष्ट्रः।४७।चापापहारेभुजवेगपंकेशरोर्मिमालेसुमहाहवौघे।नरामपातालमुखेऽतिघोरेप्रस्कंदितुंराक्षसराजयु
क्तं॥४८॥प्रसीदलंकेश्वरराक्षसेंद्रलंकांप्रसन्नोभवसाधुगछ।त्वंस्वेषुदारेषुरमस्वनित्यंरामःसभार्योरमतांवनेषु॥४९॥इत्यार्षे
श्रीरामायणेवाल्मीकीयेआरण्यकांडेएकत्रिंशःसर्गः॥३१॥एवमुक्तोदशग्रीवोमारीचेनसरावणः।न्यवर्त्ततपुरींलंकांप्रविवेश
गृहोत्तमं॥१॥ततःशूर्पणखादृष्ट्वासहस्राणिचतुर्दश।हतान्येकेनरामेणरक्षसांभीमकर्मणां॥२॥दूषणंचहतंचैवखरंत्रिशिर

॥रा०आ०॥ सामहा हृष्ट्वापुनर्महानादंननादजलदोपमा॥३॥साहृष्ट्वाकर्मरामस्यकृतमन्यैःसुदुष्करं॥जगामपरमोद्विग्नालंकांरावणपालि
॥३५॥ तां॥४॥साददर्शविमानाग्रेरावणंदीप्ततेजसं॥उपोपविष्टंसचिवैर्मरुद्भिरिववासवं॥५॥आसीनंसूर्यसंकाशेकांचनेपरमासने
रुक्मवेदिगतंप्राज्यंज्वलंतमिवपावकं॥६॥देवगंधर्वभूतानांऋषीणांचमहात्मनां॥अजेयंसमरेशूरंव्यात्ताननमिवांतकं॥
७॥देवासुरविमर्देषुवज्राशनिकृतव्रणं॥ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसं॥८॥विंशद्भुजंदशग्रीवंदर्शनीयपरिच्छदं
विशालवक्षसंवीरंराजलक्षणशोभितं॥९॥स्निग्धवैडूर्यसंकाशंतप्तकांचनकुंडलं॥सुभुजंशुक्लदशनंमहास्यंपर्वतोपमं॥
१०॥विष्णुचक्रनिपातैश्चशतशोदेवसंयुगे॥अन्यैःशस्त्रप्रहारैश्चमहायुद्धेषुताडितं॥११॥आहतांगंसमस्तैश्चदेवप्रहरणैस्त
था॥अक्षोभ्याणांसमुद्राणांक्षोभणंक्षिप्रकारिणं॥१२॥क्षेप्तारंपर्वताग्राणांसुराणांचप्रमर्दनं॥उच्छेत्तारंचधर्माणांपरदारा
भिमर्शनं॥१३॥सर्वदिव्यास्त्रयोक्तारंयज्ञविघ्नकरंसदा॥पुरीभोगवतींगत्वापराजित्यचवासुकिं॥१४॥तक्षकस्यप्रियांभा
र्यांपराजित्यजहाररयः॥कैलासंपर्वतंगत्वाविजित्यनरवाहनं॥१५॥विमानंपुष्पकंतस्यकामगंवैजहाररयः॥वनंचैत्ररथं
दिव्यंनलिनींनंदनंवनं॥१६॥विनाशयतियःक्रोधाद्देवोद्यानानिवीर्यवान्॥चंद्रसूर्यौमहाभागावुत्तिष्ठंतौपरंतपो॥१७॥नि राम
वारयतिबाहुभ्यांयःशैलशिखरोपमः॥दशवर्षसहस्राणितपस्तप्त्वामहद्वने॥१८॥पुरास्वयंभुवेधीरःशिरांसुपजहारयः ३५

देवदानवगंधर्वपिशाचपतगोरगैः॥१९॥ अभयं यस्य संग्रामे मृत्युतो मानुषादृते। मंत्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः
॥२०॥ हविर्धानेषु यः सोममुपहंति महाबलः। आप्तयज्ञहरं दुष्टं ब्रह्मघ्नं दुष्टचारिणं॥२१॥ कर्कशं निरनुक्रोशं प्रजानामहिते
रतं। रावणं सर्वलोकानां सर्वभूतभयावहं॥२२॥ राक्षसी भ्रातरं क्रूरं सा ददर्श महाबलं। तं दिव्यवस्त्राभरणं दिव्यमाल्योपशो
भितं॥२३॥ आसने सूपविष्टं तं कालकालमिवोद्यतं। राक्षसेंद्रं महाभागं पौलस्त्यकुलनंदनं॥२४॥ अभिगम्याब्रवीद्वाक्यं राक्षसी भ
यविह्वला। रावणं शत्रुहंतारं मंत्रिभिः परिवारितं॥२५॥ तमब्रवीद्दीप्तविशाललोचनं प्रदर्शयित्वा भयशोकमोहिता। सुदारु
णं वाक्यमभीतचारिणी महात्मना सूर्पणखी विरूपिता॥२६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आ० त्रिंशः सर्गः॥३२॥ ततः सू
र्पणखी दीना रावणं लोकरावणं। अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत्॥१॥ प्रमत्तः कामभोगेषु स्वैरवृत्तो निरंकुशः। समु
त्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे॥२॥ सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिं। लुब्धं न बहुमन्यंते श्मशानाग्निमिव प्रजाः॥३॥
स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः। स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति॥४॥ अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपं॥
वर्जयंति नरा दूरान्नदीपंकमिव द्विपाः॥५॥ ये न रक्षंति विषयमस्वाधीना नराधिपाः। ते न वृध्या प्रकाशंते सागरे गिरयो यथा
॥६॥ आत्मवद्भिर्विगृह्य त्वं देवगंधर्वदानवैः। अयुक्तचारश्चपलः कथं राजा भविष्यसि॥७॥ त्वं तु बालस्वभावश्च बुद्धिहीनश्च रा

॥रा०अ०॥ क्षसः॥ज्ञातव्यं तं न जानीषे कथं राजा भविष्यसि॥८॥येषां चारश्च कोशश्च नयश्च जयतां वरः॥अस्वाधीना नरेंद्राणां प्राकृतैस्ते जनैः
॥३३॥ समाः॥९॥यस्मात् पश्यंति दूरस्थान् सर्वानर्थान्नराधिपाः॥चारेण तस्मादुच्यंते राजानो दीर्घचक्षुषः॥१०॥अयुक्तचारं मन्ये त्वां प्राकृ
तैः सचिवैर्युतं॥स्वजनं च जनस्थानं हतं यो नावबुध्यसे॥११॥चतुर्दश सहस्राणि रक्षसां कामरूपिणां॥हतान्येकेन रामेण खरश्च
सहदूषणः॥१२॥ऋषीणामभयं दत्तं कृतक्षेमाश्च दंडकाः॥धर्षितं च जनस्थानं रामेणाक्लिष्टकर्मणा॥१३॥त्वं तु लुब्धः प्रमत्तश्च
पराधीनश्च रावण॥विषये स्वे समुत्पन्नं भयं यो नावबुध्यसे॥१४॥तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठं॥व्यसने नाभिधावंति
सर्वभूतानि पार्थिवं॥१५॥अतिमानिनमग्राह्यमात्मसंभावितं नरं॥क्रोधनं व्यसने हंति स्वजनोपि नराधिपं॥१६॥नानुतिष्ठति का
र्याणि भयेषु न बिभेति च॥क्षिप्रं राज्याच्च्युतो दीनस्तृणैस्तुल्यो भविष्यति॥१७॥शुष्ककाष्ठैर्भवेत्कार्यं लोष्टैरपि च पांशुभिः॥न तु स्थाना
त्परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः॥१८॥उपभुक्तं यथा वासः स्रजो वा मृदिता यथा॥एवं राज्यात्परिभ्रष्टः समर्थोऽपि निरर्थकः॥१९॥
अप्रमत्तश्च यो राजा सर्वज्ञो विजितेंद्रियः॥कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरं॥२०॥नयनाभ्यां प्रसुप्तोपि जागर्ति नयचक्षुषा॥
व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः॥२१॥त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः॥यस्य ते विदितश्चारै रक्षसां सुमहान्वधः॥ ॥राम॥
२२ [redacted] परावमंता विषयेषु संगवान्न देशकालप्रविभागतत्त्ववित्॥अयुक्तबुद्धिर्गुणदो ॥३३॥

षनिश्चयेविपन्नराज्योनुचरैर्विवास्यते॥२३॥इतिस्वदोषान्परिकीर्तितस्तयासमीक्ष्यबुध्याक्षणदाचरेश्वरः॥धनेनदर्पेणब
लेनचान्वितोविचिंतयामासचिरेणरावणः॥२४॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेत्रयस्त्रिंशःसर्गः॥३३॥ ततः
शूर्पणखांघोरांब्रुवतींपरुषंवचः॥अमात्यमध्येसंक्रुद्धःपरिपप्रच्छराक्षसः॥१॥कश्चरामःकथंवीर्यःकिंरूपःकिंपराक्रमः॥किम
र्थंदंडकारण्यंप्रविष्टश्चसुदुश्चरं॥२॥आयुधंकिंचरामस्यविहतायेनराक्षसाः॥खरश्चनिहतःसंख्येदूषणस्त्रिशिरास्तथा॥३॥
तत्त्वंब्रूहिमनोज्ञांगीकेनत्वंचविरूपिता॥इत्युक्ताराक्षसेंद्रेणराक्षसीक्रोधमूर्छिता॥४॥ततोरामंयथान्यायमाख्यातुमुपचक्र
मे॥दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनांबरः॥५॥कंदर्पसमरूपश्चरामोदशरथात्मजः॥शक्रचापनिभंचापंविकृष्यकनकां
कितं॥६॥दीप्तान्क्षिपतिनाराचान्सर्पानिवमहाविषान्॥७॥नाददानंशरान्घोरान्नमुंचंतंमहाबलं॥नकार्मुकंविकर्षंतंरामं
पश्यामिसंयुगे॥८॥हन्यमानंतुतत्सैन्यंपश्यामिशरवृष्टिभिः॥इंद्रेणेवोत्तमंसस्यमाहतंत्वश्मवृष्टिभिः॥९॥रक्षसांभीमवीर्याणां
सहस्राणिचतुर्दश॥निहतानिशरैस्तीक्ष्णैस्तेनैकेनपदातिना॥१०॥अर्द्धाधिकमुहूर्त्तेनखरश्चसहदूषणः॥ऋषीणामभयंदत्तं
कृतक्षेमाश्चदंडकाः॥११॥एकाकथंचिन्मुक्ताहंपरिभूयमहात्मना॥स्त्रीवधंशंकमानेनरामेणविदितात्मना॥१२॥भ्राताचास्य
महातेजागुणतस्तुल्यविक्रमः॥अनुरक्तश्च [redacted] भक्तश्चलक्ष्मणोनामवीर्यवान्॥१३॥अमर्षीदुर्जयोजेताविक्रांतोबुद्धिमान्च

॥रा० आ० ली॥रामस्यदक्षिणेवाहुर्नित्यंप्राणोवहिश्चरः॥१४॥रामस्यतुविशालाक्षीपूर्णेंदुसदृशानना॥धर्मपत्नीप्रियानित्यंभर्त्तुःप्रियहि
॥३१॥ तेरता॥१५॥सासुकेशीसुनासोरुःसुरूपाचयशस्विनी॥देवतेववनस्यास्यराजतेश्रीरिवापरा॥१६॥तप्तकांचनवर्णाभारक्ततुंग
नखीशुभा॥सीतानामवरारोहावैदेहीतनुमध्यमा॥१७॥नैवदेवीनगंधर्वीनयक्षीनचकिंनरी॥तथारूपामयानारीऽदृष्टपूर्वा
महीतले॥१८॥यस्यसीताभवेद्भार्यायंचहृष्टापरिष्वजेत्॥अतिजीवेत्ससर्वेषुदेवेष्विवपुरंदरः॥१९॥सासुशीलावपुःश्लाघ्यारू
पेणाप्रतिदर्शना॥तवानुरूपाभार्यासात्वंचतस्यास्तथापतिः॥२०॥तांतुविस्तीर्णजघनांपीनश्रोणिपयोधरां॥भार्यार्थेतुतवा
नेतुमुद्यताहंवराननां॥२१॥विरूपितास्मिक्रूरेणलक्ष्मणेनमहात्मना॥तांतुदृष्ट्वाद्यवैदेहींपूर्णचंद्रनिभाननां॥२२॥मन्मथ
स्यशराणांचत्वंविधेयोभविष्यसि॥यदितस्यामभिप्रायोभार्यार्थेतवजायते॥२३॥शीघ्रमुद्ध्रियतांपादोजयार्थमिहदक्षिणः
कुरुप्रियंतथातेषांरक्षसांराक्षसेश्वर॥२४॥वधात्तस्यनृशंसस्यरामस्यवनवासिनः॥तंशरैर्निशितैर्हत्वालक्ष्मणंचमहारथं
॥२५॥हतनाथांसुखंसीतांयथावदुपभोक्ष्यसे॥रोचतेयदितेवाक्यंममैतद्राक्षसेश्वर॥२६॥क्रियतांनिर्विशंकेनवचनंममराव
ण॥विज्ञायेत्वात्मशक्तिंचक्रियतामवलावला॥२७॥सीतातनवद्यांगीभार्यार्थेराक्षसेश्वर॥२८॥निशम्यरामेणशरैरजिह्मगैर्ह ॥राम॥
तान्जनस्थानगतान्निशाचरान्खरंचवुद्ध्वानिहतंचदूषणंत्वमद्यकृत्यंप्रतिपत्तुमर्हसि॥२९॥इत्यार्षेश्रीरामायणेवाल्मी ॥३१॥

कीये आरण्यकांडे चतुस्त्रिंशः सर्गः ॥३४॥ ततः शूर्पणखावाक्यं तच्छ्रुत्वा रोमहर्षणं ॥ सचिवानभ्यनुज्ञाय कार्यं बुद्ध्वा जगाम ह ॥१॥
तत्कार्यमनुगम्याथ यथावदुपलभ्य च ॥ दोषाणां च गुणानां च संप्रधार्य बलाबलं ॥२॥ इति कर्त्तव्यमित्येव कृत्वा निश्चयमात्म
नः ॥ स्थिरबुद्धिस्ततो रम्यां यानशालामुपागमत् ॥३॥ यानशालां ततो गत्वा प्रच्छन्नं राक्षसाधिपः ॥ सूतं संचोदयामास रथः सं
युज्यतामिति ॥४॥ एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः ॥ रथं संयोजयामास तस्याभिमतमुत्तमं ॥५॥ कांचनं रथमास्थाय
कामगं रत्नभूषितं ॥ पिशाचवदनैर्युक्तं खरैः कांचनभूषणैः ॥६॥ मेघप्रतिमनादेन स तेन धनदानुजः ॥ राक्षसाधिपतिः श्री
मान् ययौ नदनदीपतिं ॥७॥ स श्वेतबालव्यजनः श्वेतच्छत्रो दशाननः ॥ स्निग्धवैडूर्यसंकाशस्तप्तकांचनभूषणः ॥८॥ दशास्यो
विंशतिभुजो दर्शनीयपरिच्छदः ॥ त्रिदशारिर्मुनींद्रघ्नो दशशृंग इवाद्रिराट् ॥९॥ कामगं रथमास्थाय शुशुभे राक्षसाधिपः ॥ विद्यु
न्मंडलवान्मेघः सबलाक इवांबरे ॥१०॥ सशैलं सागरानूपं वीर्यवानवलोकयन् ॥ नानापुष्पफलैर्वृक्षैः अनुकीर्णं सहस्रशः ॥
११॥ शीतमंगलतोयाभिः पद्मिनीभिः समंततः ॥ विशालैराश्रमपदैर्वेदिमद्भिर्विराजितं ॥१२॥ कदल्याढकिसंबाधं नारिकेलोप
शोभितं ॥ सालैस्तालैस्तमालैश्च पुष्पितैस्तरुभिर्वृतं ॥१३॥ अत्यंतनियताहारैः शोभितं परमर्षिभिः ॥ नागैः सुपर्णैर्गंधर्वैः किन्नरैः
श्च सहस्रशः ॥१४॥ जितकामैश्च सिद्धैश्च चारणैरुपशोभितं ॥ अजैर्वैखानसैर्माषैर्वालखिल्यैर्मरीचिपैः ॥१५॥ दिव्याभरणमाल्या

॥रा०आ० भिःदिव्यरूपाभिराहृतं।क्रीडाविधिरतज्ञाभिरप्सरोभिःसहस्रशः।१६।सेवितंदेवपत्नीभिःश्रीमतीभिःश्रियावृतं देवदानवसंघै
॥३८॥ श्चचरितंत्वमृताशिभिः।१७।हंसक्रौंचप्लवाकीर्णंसारसैःसंप्रणादितं।वैडूर्यप्रस्तरंदिव्यंस्निग्धंसागरतेजसा।१८।पांडुराणिवि
शालानिदिव्यमाल्ययुतानिच।तूर्यगीताभिजुष्टानिमानानिसमंततः।१९।तपसाजितलोकानांकामगान्यभिसंपतन्।गंधर्वा
प्सरसश्चैवददर्शधनदानुजः।२०।निर्यासरससमूलानांचंदनानांसहस्रशः।वनानिपश्यन्सौम्यानिघ्राणतृप्तिकराणिच।
२१।अगरूणांचमुख्यानांवनान्युपवनानिच अंकोलानांचमुख्यानांपलाशानांसुगंधिनां।२२।पुष्पाणिचतमालस्यगुल्मा
निमरिचस्यच।मुक्तानांचसमूहानिःशुष्यमाणानितीरतः २३ शंखानांप्रस्करंचैवप्रवालानिचयंतथा।कांचनानिचशैला
निराजतानिचसर्वशः।२४।प्रस्रवाणिमनोज्ञानिप्रसन्नान्यद्भुतानिच।धनधान्योपपन्नानिस्त्रीरत्नैरावृतानिच।२५।हस्त्यश्व
रथगाढानिनगराण्यवलोकयन्।तंसमंसर्वतःस्निग्धंमृदुसंस्पर्शमारुतं।२६।अनूपंसिंधुराजस्यददर्शत्रिदिवोपमं।तत्राप
श्यत्समेघाभंन्यग्रोधंमुनिभिर्वृतं।२७।समंताद्यस्यताःशाखाःशतयोजनमायताः।यस्यहस्तिनमादायमहाकायंचकच्छ
पं।२८।भक्षार्थंगरुडःशाखामाजगाममहाबलः।तस्यतांसहसाशाखांभारेणपतगोत्तमः।२९।सुपर्णःपर्णबहुलांबभंजाथम ॥राम॥
हाबलः।तत्रवैखानसामाषावालखिल्यामरीचिपाः।३०।अंजावभूवुर्धूम्राश्चसंगताःपरमर्षयः।तेषांदयार्थंगरुडस्तांशाखां ॥३८॥

शतयोजनं॥३१॥जगामादायवेगेनतौचौभौगजकच्छपौ॥एकपादेनधर्मात्माभक्षयित्वातदामिषं॥३२॥निषादविषयंहत्वाशा
खयापतगोत्तमः॥प्रहर्षमतुलंलेभेमोक्षयित्वामहामुनीन्॥३३॥सतेनैवप्रहर्षेणद्विगुणीकृतविक्रमः॥अमृतानयनार्थंवैच
कारमतिमान्मतिं॥३४॥अयोजालानिनिर्मथ्यभित्वारत्नगृहंवरं॥महेंद्रभवनाद्गुप्तमाजहारामृतंततः॥३५॥तंमहर्षिगणैर्जुष्टंसु
पर्णकृतलक्षणं॥नाम्नासुभद्रंन्यग्रोधंददर्शधनदानुजः॥३६॥तंतुगत्वापरंपारंसमुद्रस्यनदीपतेः॥ददर्शाश्रममेकांतेपुण्येर
म्येवनांतरे॥३७॥तत्रकृष्णाजिनधरंजटामंडलधारिणं॥ददर्शनियताहारंमारीचंनामराक्षसं॥३८॥सरावणःसमागम्यवि
धिवत्तेनरक्षसा॥मारीचेनार्चितोराजासर्वकामैरमानुषैः॥३९॥तंस्वयंपूजयित्वातुभोजनेनोदकेनच॥अर्थोपहितयावा
चामारीचोवाक्यमब्रवीत्॥४०॥कच्चित्तेकुशलंराजन्लंकायांराक्षसेश्वर॥केनैवचार्थजातेनतूर्णमेवत्वमागतः॥४१॥एवमु
क्तोमहातेजामारीचेनसरावणः॥ततःपश्चादिदंवाक्यमब्रवीद्वाक्यकोविदः॥४२॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्य
कांडेपंचत्रिंशःसर्गः॥३५॥मारीचश्रूयतांतातवचनंममभाषतः॥आर्त्तोस्मिममचार्त्तस्यभवान्हिपरमागतिः॥१॥जानीषेत्वंजनने
स्थानेभ्रातायत्रखरोमम॥दूषणश्चमहावाहुःस्वसाशूर्पणखाचमे॥२॥त्रिशिराश्चमहावाहूराक्षसःपिशिताशनः॥अन्येचबह
वःशूरालब्धलक्षानिशाचराः॥३॥वसंतिमन्नियोगेनरतिवासाश्चराक्षसाः॥वाधमानामहारण्येमुनीन्वैधर्मचारिणः॥४॥चतु

दर्शसहस्राणि रक्षसां भीमकर्मणां॥ शूराणां लब्धलक्षाणां खरचित्तानुवर्त्तिनां॥५॥ ते त्विदानीं जनस्थाने वसमाना महाबलाः
संहताः परमायत्ता रामेण सह संयुगे॥६॥ नानाप्रहरणोपेताः खरप्रमुखराक्षसाः॥ तेन संजातरोषेण रामेण रणमूर्द्धनि॥७॥ अनु
क्त्वा परुषं किंचिच्छरैर्व्यापारितं धनुः॥ चतुर्दशसहस्राणि रक्षसामुग्रतेजसां॥८॥ निहतानि शरैर्दीप्तैर्मानुषेण पदातिना॥
खरश्च निहतः संख्ये दूषणश्च निपातितः॥९॥ हत्वा त्रिशिरसं चैव निर्भया दंडकाः कृताः॥ पित्रा निरस्तः क्रुद्धेन सभार्यः क्षी
णजीवितः॥१०॥ स हंता तस्य सैन्यस्य रामः क्षत्रियपांसनः॥ अशीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेंद्रियः॥११॥ त्यक्तधर्मस्त्वध
र्मात्मा भूतानामहिते रतः॥ येन वैरं विनारण्ये सत्वमाश्रित्य केवलं॥१२॥ कर्णनासापहारेण भगिनी मे विरूपिता॥ तस्य भार्या जनस्था
नात्सीतां सुरसुतोपमां॥१३॥ आनयिष्यामि विक्रम्य सहायस्तत्र मे भव॥ त्वया ह्यहं सहायेन पार्श्वस्थेन महाबल॥१४॥ भ्रातृभिश्च सुरा
न्युद्धे समग्रान्नाभिचिंतये॥ तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस॥१५॥ वीर्ये युद्धे च दर्पे च न ह्यस्ति सदृशस्तव॥ उपायज्ञो महांछू
रः सर्वमायाविशारदः॥१६॥ एतदर्थमहं प्राप्तस्त्वत्सकाशं निशाचर॥ शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम॥१७॥ सौवर्णस्त्वं मृगो
भूत्वा चित्रो रजतबिंदुभिः॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर॥१८॥ त्वां तु निःसंशयं दृष्ट्वा सीता च मृगरूपिणं॥ गृह्यतामिति भर्त्ता ॥राम॥
रं लक्ष्मणं चाभिधास्यति॥१९॥ ततस्तयोरपाये तु शून्ये सीतां यथासुखं॥ निराबाधो हरिष्यामि राहुश्चंद्रप्रभामिव॥२०॥ ततः पश्चात्सुखं रा ॥३९॥

मेभार्याहरणकर्षिते॥विस्रब्धंप्रहरिष्यामिकृतार्थेनांतरात्मना॥२१॥तस्यरामकथांश्रुत्वामारीचस्यमहात्मनः।शुष्कंसमभवद्व
क्त्रंपरित्रस्तोबभूवह॥२२॥ओष्ठौपरिलिहन्शुष्कौनेत्रैरनिमिषैरिव॥मृतभूतइवार्तस्तुरावणंसमुदैक्षत॥२३॥सराक्षसस्त्र
विषण्णचेतामहावनेरामपराक्रमज्ञः।कृतांजलिस्तत्वमुवाचवाक्यंहितंचतस्मैहितमात्मनश्च॥२४॥इत्यार्षेश्रीरामायणेवाल्मी
कीयेआरण्यकांडेषट्त्रिंशःसर्गः॥३६॥तच्छ्रुत्वाराक्षसेंद्रस्यवाक्यंवाक्यविशारदः।प्रत्युवाचमहातेजामारीचोराक्षसेश्वरं॥१॥
सुलभाःपुरुषाराजन्सततंप्रियवादिनः।अप्रियस्यचपथ्यस्यवक्ताश्रोताचदुर्लभः॥२॥ननूनंबुद्ध्यसेरामंमहावीर्यगुणोन्नतं॥
अयुक्तचारश्चपलोमहेंद्रवरुणोपमं॥३॥अपिस्वस्तिभवेत्तातसर्वेषामपिरक्षसां॥अपिरामोनसंक्रुद्धःकुर्याल्लोकमराक्षसं॥
४॥अपितेजीवितांतायनोत्पन्नाजनकात्मजा॥अपिसीतानिमित्तंतेनभवेद्व्यसनंमहत्॥५॥अपित्वामीश्वरंप्राप्यकामवृत्तंनि
रंकुशं॥नविनश्येत्पुरीलंकात्वयासहसराक्षसा॥६॥त्वद्विधःकामवृत्तोहिदुःशीलःपापमंत्रितः।आत्मानंस्वजनंराष्ट्रंसराजाहं
तिदुर्मतिः॥७॥नसपित्रापरित्यक्तोनामर्यादःकथंचन॥नलुब्धोनचदुःशीलोनचक्षत्रियपांसनः॥८॥नचधर्मगुणैर्हीनःकौशल्या
नंदवर्द्धनः॥नतीक्ष्णोनचभूतानांसर्वेषांचहितेरतः॥९॥वंचितंपितरंदृष्ट्वाकैकेयासत्यवादिनं॥करिष्यामीतिधर्मात्माततःप्र
व्राजितोवनं॥१०॥कैकेय्याःप्रियकामार्थंपितुर्दशरथस्यच॥हित्वाराज्यंचभोगांश्चप्रविष्टोदंडकावनं॥११॥नरामःकर्कशस्तातना

विद्वान्साजितेंद्रि[illegible]यः॥अनृतंदुःश्रुतंचैवनैवत्वंवक्तुमर्हसि॥१२॥धर्मोविग्रहवान्रामःसाधुःसत्यपराक्रमः॥राजासर्वस्यलोकस्यदे
वानामिववासवः॥१३॥कथंनुतस्यवैदेहींरक्षितांस्वेनतेजसा॥इच्छसिप्रसभंहर्तुंप्रभामिवविवस्वतः॥१४॥शरार्चिषमनाधृष्यं
चापखड्गेंधनंरणे॥रामाग्निंसहसाधृष्यंचापखड्गेंधनंरणे॥रामाग्निंसहसादीप्तंनप्रवेष्टुंत्वमर्हसि॥१५॥धनुर्व्यादितदीप्तास्यंश
रार्चिषममर्षणं॥खड्गचापधरंवीरंशत्रुसेनापहारिणं॥१६॥राज्यंसुखंचसंत्यज्यजीवितंचेष्टमात्मनः॥नात्यासादयितुंतातरामां
तकमिहार्हसि॥१७॥अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा॥नत्वंसमर्थस्तांहर्तुंरामचापाश्रयांवने॥१८॥तस्यसानरसिंहस्य
सिंहोरस्कस्यभामिनी॥प्राणेभ्योपिप्रियतराभार्यानित्यमनुव्रता॥१९॥नसाधर्षयितुंशक्यामैथिलीजनकात्मजा॥दीप्तस्येवहुता
शस्यशिखासीतासुमध्यमा॥२०॥किमुद्यमंव्यर्थमिमंकृत्वातेराक्षसेश्वर॥दृष्टश्चेत्तुरणेतेनतदंतंतवजीवितं॥२१॥जीवितंचसुखं
चैवराज्यंचैवसुदुर्लभं॥सर्वैश्चसचिवैःसार्द्धंविभीषणपुरस्कृतैः॥२२॥मंत्रयित्वातुधर्मिष्ठंकृत्वानिश्चयमात्मनः॥दोषाणांचगुणा
नांचसंप्रधार्यवलावलं॥२३॥आत्मनश्चवलंज्ञात्वाराघवस्यचतत्वतः॥हितंहितवनिश्चित्यक्षमंत्वंकर्तुमर्हसि॥२४॥अहंतुमन्ये
तवनक्षमंरणंसमागमंकोशलराजसूनुना॥इदंहिभूयःशृणुवाक्यमुत्तमंक्षमंचयुक्तंचनिशाचराधिप॥२५॥इत्यार्षेश्रीरा ॥राम॥
मायणेवाल्मीकीयेआरण्यकांडेसप्तत्रिंशःसर्गः॥३७॥कदाचिदप्यहंवीर्यात्पर्यटन्पृथिवीमिमां॥वलंनागसहस्रस्यधारयन् ॥४०॥

पर्वतोपमः॥१॥नीलजीमूतसंकाशस्तप्तकांचनकुंडलः॥भयंलोकस्यजनयन्किरीटीपरिघायुधः॥२॥अचरन्दंडकारण्यमृषिमां
सानिभक्षयन्॥विश्वामित्रोथधर्मात्मामद्वित्रस्तोमहामुनिः॥३॥स्वयंगत्वादशरथंनरेंद्रमिदमब्रवीत्॥अयंरक्षतुमांरामःप
र्वकालेसमाहितः॥४॥मारीचान्मेभयंघोरंसमुत्पन्नंनरेश्वर॥इत्येवमुक्तोधर्मात्माराजादशरथस्तदा॥५॥प्रत्युवाचमहाभागंवि
श्वामित्रंमहामुनिं॥बालोद्वादशवर्षोयमकृतास्त्रश्चराघवः॥६॥कामंतुममयत्सैन्यंमयासगमिष्यति॥बलेनचतुरंगेणस्व
यमेत्यनिशाचरं॥७॥विधमिष्येमुनिश्रेष्ठशत्रूंस्तवयथेप्सितं॥इत्येवमुक्तःसमुनीराजानंपुनरब्रवीत्॥८॥रामान्नान्यद्बलंलो
केपर्याप्तंतस्यरक्षसः॥देवतानामपिभवान्समरेष्वभिपालकः॥९॥आसीतवकृतंकर्मत्रिलोकविदितंनृप॥काममस्तुममश्री
मान्पद्मपत्रनिभेक्षणः॥बालोप्येषमहातेजाःसमर्थस्तस्यनिग्रहे॥गमिष्येराममादायस्वस्तितेस्तुपरंतप॥१२॥इत्येवमुक्त्वासमु
निस्तमादायनृपात्मजं॥जगामपरमप्रीतोविश्वामित्रस्वमाश्रमं॥तंतदादंडकारण्येयज्ञमुद्दिश्यदीक्षितं॥बभूवावस्थितोरामः
सज्यंविस्फारयन्धनुः॥१३॥अजातव्यंजनश्रीमान्बालःश्यामःशुभेक्षणः॥एकवस्त्रधरोधन्वीशिखीकनकमालया॥१४॥शोभ
यन्दंडकारण्यंदीप्तेनस्वेनतेजसा॥अदृश्यततदारामोबालचंद्रइवोदितः॥१५॥ततोऽहंमेघसंकाशस्तप्तकांचनकुंडलः॥ब
लीदत्तवरोदर्पादागतोस्मितदाश्रमं॥१६॥तेनदृष्टःप्रविष्टोहंसहसैवोद्यतायुधः॥मांतुदृष्ट्वाधनुःसज्यमसंभ्रांतश्चकारसः॥१७

 अवज्ञानादहंमोहाद्बालोयमितिराघवः॥ विश्वामित्रस्यतांवेदिमभ्यधावंकृतज्वरः॥१८॥ तेनमुक्तस्तदाबाणःशितःशत्रुनिबर्ह
 णः॥ तेनाहंताडितःक्षिप्तःसमुद्रेशतयोजने॥१९॥ नेच्छतातातमांहंतुंतदावीरेणरक्षितः॥ रामस्यशरवेगेननिरस्तोहमचेतनः॥२०
पातितोहंतदातेनगंभीरेसागरांभसि॥ प्राप्यसंज्ञांचिरात्तातलंकांप्रतिगतःपुरीं॥२१॥ एवमस्मितदामुक्तःसनाभिस्तुनिपा
तितः॥ अकृतास्त्रेनरामेणबालेनाक्लिष्टकर्मणा॥२२॥ तन्मयावार्यमाणस्तुयदिरामेणविग्रहं॥ करिष्यस्यापदंघोरांक्षिप्रंप्रा
प्यनशिष्यसि॥२३॥ क्रीडारतिविधिज्ञानांसमाजोत्सवशालिनां॥ रक्षसांचैवसंतापंअनर्थंचाहरिष्यसि॥२४॥ हर्म्यप्रासादसं
बाधांनानारत्नविभूषितां॥ द्रक्ष्यसित्वंपुरींलंकांविनष्टांमैथिलीकृते॥२५॥ अकुर्वंतोपिपापानिशुचयःपापसंश्रयात्॥ पर
पापैर्विनश्यंतिमत्स्यानागह्रदेयथा॥२६॥ दिव्यचंदनलिप्तांगान्दिव्याभरणभूषितान्॥ द्रक्ष्यस्यभिहतान्भूमौतवदोषात्तुराक्ष
सान्॥२७॥ हृतदारान्सदारांश्चदशविद्रवतोदिशः॥ हतशेषानशरणान्द्रक्ष्यसित्वंनिशाचरान्॥२८॥ शरजालपरिक्षिप्तामग्नि
ज्वालासमावृतां॥ प्रदग्धभवनांलंकांद्रक्ष्यसित्वंनसंशयः॥२९॥ परदाराभिमर्शात्तुनान्यत्पापतरंमहत्॥ प्रमदानांसहस्राणित
वराजन्परिग्रहः॥३०॥ भवस्वदारनिरतःस्वकुलंकुलरक्षसां॥ मानंवृद्धिंचराज्यंचजीवितंचेष्टमात्मनः॥३१॥ सीताहेतोःसमग्रा 
णिविद्रविष्यंतिभीतवत्॥ आत्मनश्चदशग्रीवपुरस्यांतःपुरस्यच॥३२॥ रक्षसांचविनाशायमैथिलीमानयिष्यसि॥ मानाशयत्वं 

राज्यंचजीवितंचेष्टमात्मनः॥३३॥ कलत्राणिचसौम्यानिमित्रवर्गंतथैवच। यदीच्छसिचिरंभोक्तुमाकृथारामविप्रियं॥३४॥ नि
वार्यमाणःसुहृदामयाभृशंप्रसह्यसीतांयदिधर्षयिष्यसि॥ गमिष्यसिक्षीणवलःसवांधवोयमक्षयंरामशरात्तजीवितः॥३५
इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेअष्टत्रिंशः सर्गः॥३८॥ एवमस्मितदामुक्तःकथंचित्तेनसंयुगे। इदानीमपियद्वृत्तं
तच्छृणुष्वयदुत्तरं॥१॥ राक्षसाभ्यांसमेताभ्यामनिर्विण्णस्तथाकृतः। सहितोमृगरूपाभ्यांप्रविष्टोदंडकावनं॥२॥ दीप्तजिह्वोमहादंष्ट्र
स्तीक्ष्णशृंगोमहावलः॥ व्यचरंदंडकारण्यंमांसानिभक्षयन्॥३॥ अग्निहोत्रेषुतीर्थेषुचैत्यवृक्षेषुरावण। अत्यंतघोरोव्य
चरंतापसांस्तान्प्रधर्षयन्॥४॥ निहत्यदंडकारण्येतापसान्धर्मचारिणः॥ रुधिराणिपिवंस्तेषांतथामांसानिभक्षयन्॥५॥
ऋषिमांसाशनःक्रूरस्त्रासयन्वनगोचरान्॥ तदारुधिरमत्तोहंव्यचरंदंडकावने।६। तथाहंदंडकारण्येव्यचरन्धर्मदूषकः॥
आसादयंतथारामंतापसंधर्मसंश्रितं॥७॥ वैदेहींचमहाभागांलक्ष्मणंचमहावलं॥ तापसंनियताहारंसर्वभूतहितेरतं॥८॥ सो
हंवनगतंरामंपरिभूयमहावलं॥ तापसोऽयमितिज्ञात्वापूर्ववैरमनुस्मरन्॥ अभ्यधावंसुसंक्रुद्धस्तीक्ष्णशृंगोमृगाकृतिः॥ जि
घांसुरकृतप्रज्ञस्तंप्रहारमनुस्मरन्॥१०॥ तेनमुक्तास्त्रयोवाणाःशिताःशत्रुनिवर्हणाः। विकृष्यवलवच्चापंसुपर्णानिलनि
स्वनाः॥११॥ तेवाणावज्रसंकाशाःसुघोरारक्तभोजनाः। आजग्मुःसहिताःसर्वेत्रयःसंनतपर्वणः॥१२॥ पराक्रमज्ञोरामस्यशठोदृ

॥रा० आ०॥ ष्टभयःपुरा॥समुद्भ्रांतस्ततोमुक्तस्तावुभौराक्षसौहतौ॥१३॥शरेणमुक्तोरामस्यकथंचित्प्राप्यजीवितं॥इहप्रव्राजितोमुक्तस्ता
॥४२॥ पसोहंसमाहितः॥१४॥वृक्षेवृक्षेहिपश्यामिचीरकृष्णाजिनांबरं॥गृहीतधनुषंरामंपाशहस्तमिवांतकं॥१५॥अपिरामसहस्रा
णिभीतःपश्यामिरावण॥राममभूतमिदंसर्वमरण्यंप्रतिभातिमे॥१६॥राममेवहिपश्यामिरहस्येराक्षसेश्वर॥दृष्ट्वास्वप्नगतं
राममुद्भ्रमामिविचेतनः॥१७॥रकारादीनिनामानिरामत्रस्तस्यरावण॥रत्नानिचरथाश्चैवत्रासंसंजनयंतिमे॥१८॥अहंतस्य
प्रभावज्ञोनयुद्धंतेनतेक्षमं॥बलवान्नमुचिंवापिहन्याद्धिरघुनंदनः॥१९॥रणेरामेणयुध्यस्वक्षमोवाकुरुराक्षस॥नतेरामक
थाकार्यायदिमांद्रष्टुमिच्छसि॥२०॥बहवःसाधवोलोकेयुक्तधर्ममनुष्ठिताः॥परेषामपराधेनविनष्टाःसपरिच्छदाः॥२१॥सो
ऽहंतवापराधेनविनश्येयंनिशाचर॥कुरुयत्तेक्षमंतत्वमहंत्वांनानुयामिवै॥२२॥रामश्चहिमहातेजामहासत्वोमहाबलः
अपिराक्षसलोकस्यनभवेदंतकोहिसः॥२३॥यदिशूर्पणखाहेतोर्जनस्थानगतःखरः॥अतिवृत्तोहतःपूर्वंरामेणाक्लिष्टक
र्मणा॥२४॥अत्रब्रूहियथातत्वंकोरामस्यव्यतिक्रमः॥इदंवचोबंधुहितार्थिनामयायथोच्यमानंयदिनाभिपत्स्यसे॥सबांधव
स्त्यक्ष्यसिजीवितंरणेहतोद्यरामेणशरैरजिह्मगैः॥२५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेएकोनचत्वारिंशःसर्गः ॥राम॥
३९॥मारीचेनतुतद्वाक्यंक्षमंयुक्तंचरावणः॥उक्तोनप्रतिजग्राहमर्तुकामइवौषधं॥१॥तंपथ्यहितवक्तारंमारीचंराक्षसा ॥४२॥

धिपः । अब्रवीत्परुषं वाक्यमयुक्तं कालचोदितः ॥२॥ यत्किलैतदयुक्तार्थं मारीच मयि कथ्यसे । वाक्यं निष्फलमत्यर्थं बीजमुप्त
मिवोषरे ॥३॥ त्वद्वाक्यैर्न तु मां शक्यं भेत्तुं रामस्य संयुगे । पापशीलस्य मूर्खस्य मानुषस्य विशेषतः ॥४॥ यस्त्यक्त्वा सुहृदो राज्यं मा
तरं पितरं तथा । स्त्रीवाक्यं प्राकृतं कृत्वा वनमेकपदे गतः ॥५॥ अवश्यं तु मया तस्य संयुगे खरघातिनः । प्राणैः प्रियतरा सीता हृ
र्तव्या तव सन्निधौ ॥६॥ एवं मे निश्चिता बुद्धिर्मारीच हृदि वर्तते । न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥७॥ दोषं गुणं वा संपृष्टस्त्व
मेवं वक्तुमर्हसि । अपायं वाप्युपायं वा कार्यस्यास्य विनिश्चये ॥८॥ संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता । उद्यताञ्जलिना राज्ञे
य इच्छेद्भूतिमात्मनः ॥९॥ वाक्यमप्रतिकूलं तु मृदुपूर्वं शुभं हितं । उपचारेण युक्तं च वक्तव्यो वसुधाधिपः ॥१०॥ सोपमर्दं तु यद्वाक्यं
मया वाहितमुच्यते । नाभिनंदेत तद्राजा मानार्हो मानवर्जितं ॥११॥ पंच रूपाणि राजानो धारयंत्यमितौजसः । अग्नेरिंद्रस्य सोमस्य
यमस्य वरुणस्य वा ॥१२॥ औष्ण्यं तथा विक्रमं च सौम्यं दंडं प्रसन्नतां । धारयंति महात्मानो राजानः क्षणदाचर ॥१३॥ तस्मात्सर्वास्व
स्थासु मान्याः पूज्याश्च पार्थिवाः । त्वं तु धर्ममविज्ञाय केवलं मोहमास्थितः ॥१४॥ अभ्यागतं मां दौरात्म्यात्परुषं वदसीदृशं । गुणदो
षौ न पृच्छामि क्षमं चात्मनि राक्षस ॥१५॥ मयोक्तं त्वयि चेतावत्त्वां प्रत्यमितविक्रम । अस्मिंस्तु तद्भवान्कृत्ये साहाय्यं कर्तुमर्हसि ॥१६॥
शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम । सौवर्णस्त्वं मृगो भूत्वा चित्रो रजविंदुभिः ॥१७॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे च

॥रा०आ०॥
॥४३॥

रा॥प्रलोभयित्वावैदेहींयथेष्टंगंतुमर्हसि॥१८॥त्वांहिमायामृगंदृष्ट्वाकांचनंजातविस्मया।आनयैनमितिःक्षिप्रंरामंवक्ष्यतिमै
थिली॥१९॥अपक्रांतेचकाकुत्स्थेदूरंगत्वाप्युदाहर।हासीतेलक्ष्मणइतिरामवाक्यानुरूपकं॥२०॥तद्दृष्ट्वारामपदवींसीतयाप्रति
चोदितः॥अनुगच्छतिसंभ्रांतःसौमित्रिरपिसौहृदात्॥२१॥अपक्रांतेचकाकुत्स्थेलक्ष्मणेचयथासुखं।आनयिष्यामिवैदेहींस
हस्राक्षःशचीमिव॥२२॥एवंकृत्वात्विदंकार्यंयथेष्टंगच्छराक्षस।राज्यस्यार्द्धंप्रयच्छामिमारीचतवसुव्रत॥२३॥गच्छसौम्यशिवंमा
र्गंकार्यस्यास्यविवृद्धये।अहंत्वानुगमिष्यामिसरथोदंडकावनं॥२४॥प्राप्यसीतामयुद्धेनवंचयित्वातुराघवौ।लंकांप्रतिगमि
ष्यामिकृतकार्यःसहत्वया॥२५॥नचेत्करोषिमारीचहन्मित्वामहमद्यवै।एतत्कार्यमवश्यंमेबलादपिकरिष्यसि॥२६॥राज्ञोहि
प्रतिकूलस्थोनजातुसुखमेधते।आसाद्यतंजीवितसंशयस्तेमृत्युर्ध्रुवोह्यद्यमयाविरुध्यतः।एतद्यथावत्परिगृह्यबुध्यायद
त्रपथ्यंकुरुतत्तथात्वं॥२७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेचत्वारिंशःसर्गः॥४०॥आज्ञप्तोराजवद्वाक्यंप्रतिकूलं
निशाचरः।अब्रवीत्परुषंवाक्यंमारीचोराक्षसाधिपं॥१॥केनायमुपदिष्टस्तेविनाशःपापकर्मणा।सपुत्रस्यसराष्ट्रस्यसामात्यस्य
निशाचर॥२॥कस्त्वयासुखिनाराजन्नाभिनंदतिनिंदितः।केनेदमुपदिष्टंतेमृत्युद्वारमुपायतः।शत्रवस्तवसुव्यक्तंहीनवीर्या ॥४३॥
निशाचराः।इच्छंतित्वांविनश्यंतमुपरुद्धंबलीयसा॥४॥केनेदमुपदिष्टंतेक्षुद्रेणाहितवादिना।यस्त्वामिच्छतिनश्यंतंस्वकृतेननिशा ॥राम॥

ते

चरा॥७॥ वध्याः खलु न वध्यंते सचिवास्तव रावण। ये त्वामुत्पथमारूढं न निगृह्णंति सर्वशः॥८॥ अमात्यैः कामवृत्तो हि राजा कुपथमा
श्रितः॥ निग्राह्यः सर्वथा सद्भिः न निग्राह्यो निगृह्यसे॥९॥ धर्ममर्थं च कामं च यशश्च जयतां वर। स्वामिप्रसादात्सचिवाः प्राप्नुवंति नि
शाचर॥१०॥ विपर्यये तु तत्सर्वं व्यर्थं भवति रावण। व्यसनं स्वामिवैगुण्यात्प्राप्नुवंतीतरे जनाः॥११॥ राजमूलो हि धर्मश्च यशश्च जयतां वर
तस्मात्सर्वास्ववस्थासु रक्षितव्यो नराधिपः॥१२॥ राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर। न चातिप्रतिकूलेन नाविनीतेन राक्षस
॥१३॥ ये तीक्ष्णमंत्राः सचिवा भज्यंते सह तेन वै॥ विषमे तुरगाः शीघ्रं मंदसारथयो यथा॥१४॥ बहवः साधवो लोके युक्तधर्ममनुष्ठिताः॥
परेषामपराधेन विनष्टाः सपरिच्छदाः॥१५॥ स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण॥ रक्ष्यमाणा न वर्द्धंते मृगा गोमायुना यथा॥१६॥
अवश्यं विनशिष्यंति सर्वे रावण राक्षसाः॥ येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेंद्रियः॥१७॥ तदिदं काकतालीयं घोरमासादितं मया॥
अत्र किं शोचनीयस्त्वं ससैन्यो विनशिष्यसि॥१८॥ मां निहत्य तु रामोसावचिरात्त्वां वधिष्यति॥ अनेन कृतकृत्योस्मि म्रियेयदरिणाह
तः॥१९॥ दर्शनादेव रामस्य हतं मामुपधारय॥ आत्मानं च हतं विद्धि हत्वा सीतां सबांधवं॥२०॥ आनयिष्यसि चेत्सीतामाश्रमात्सहि
तो मया॥ नैव त्वमसि नाहं ते नैव लंका न राक्षसाः॥२१॥ निवार्यमाणस्तु मया हितैषिणा न मृष्यसे वाक्यमिदं निशाचर। परेतकल्पा
हि गतायुषो नरा हितं न गृह्णंति सुहृद्भिरीरितं॥२२॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे एकचत्वारिंशः सर्गः॥४१॥ एवमु

॥रा०आ०॥ क्त्वातुपरुषंमारीचोरावणंतदा।गच्छावेत्यब्रवीद्दीनोभयाद्रात्रिंचरप्रभोः॥१॥प्रहृष्टस्त्वभवत्तेनवचनेनसराक्षसः।परिष्वज्यसुसंश्लि
॥४४॥ ष्टमिदंवचनमब्रवीत्॥२॥एतच्छौंडीर्यमुक्तंतेमच्छंदादिवभाषितं।इदानीमसिमारीचपूर्वमन्योहिराक्षसः॥३॥आरुह्यतामयं
शीघ्रंखगोरत्नविभूषितः।मयासहरथोयुक्तःपिशाचवदनैःखरैः॥४॥प्रलोभयित्वावैदेहींयथेष्टंगंतुमर्हसि।तांशून्येप्रसभंसीतां
मानयिष्यामिमैथिलीं॥५॥ततोरावणमारीचौविमानमिवतंरथं।आरुह्यययतुःशीघ्रंतस्मादाश्रममंडलात्॥६॥तथैवतत्रपश्यं
तौपत्तनानिवनानिच।गिरींश्चसरितश्चैवराष्ट्राणिनगराणिच॥७॥समेत्यदंडकारण्यंराघवस्याश्रमंततः।ददर्शसहमारीचोरा
वणोराक्षसाधिपः॥८॥अवतीर्यरथात्तस्मात्तथाकांचनभूषणात्।हस्तेगृहीत्वामारीचंरावणोवाक्यमब्रवीत्॥९॥एतद्रामाश्र
मपदंदृश्यतेकदलीवृतं।क्रियतांतत्सखेशीघ्रंयदर्थंवयमागताः॥१०॥रावणस्यवचःश्रुत्वामारीचोराक्षसस्तदा।मृगोभूत्वाश्र
मद्वारेरामस्यविचचारह॥११॥सतुरूपंसमास्थायमहदद्भुतदर्शनं।मणिप्रवरशृंगाग्रःसितासितमुखाकृतिः॥१२॥रक्तपद्मोत्पल
मुखःइंद्रनीलोत्पलश्रवः।किंचिदभ्युन्नतग्रीवइंद्रनीलनिभोदरः॥१३॥मधूकनिभपार्श्वश्चपद्मकिंजल्कसन्निभः।वैडूर्यसंकाशखु
रस्तनुजंघःसुसंहतः॥१४॥इंद्रायुधसवर्णेनपुच्छेनोर्द्ध्वविराजितः।मनोहरस्निग्धवर्णोरत्नैर्नानाविधैर्वृतः॥१५॥क्षणेनराक्षसोजातो ॥राम॥
मृगःपरमशोभनः।वनंप्रज्वलयन्रम्यंरामाश्रमपदंचतत्॥१६॥मनोहरंदर्शनीयंरूपंकृत्वासराक्षसः।प्रलोभनार्थंवैदेह्यानाना ॥४४॥

धातुविचित्रितं॥१७॥विचरन्गच्छतेसम्यक्शाड्वलानिसमंततः।रौप्यैर्बिंदुशतैश्चित्रोभूत्वाचप्रियदर्शनः॥१८॥विटपीनांकिसलया
न्भंक्त्वादन्विचचारह॥कदलीगृहकंगत्वाकर्णिकारानितस्ततः॥१९॥समाश्रयन्मंदगतिःसीतासंदर्शनंतदा।रामाश्रमपदाभ्याशे
विचचारयथासुखं॥२०॥राजीव[illegible]चित्रपृष्ठश्चविरराजमहामृगः।पुनर्गत्वानिवृत्तश्चविरराजमृगोत्तमः॥२१॥गत्वामुहूर्तंत्वरया
पुनःप्रतिनिवर्तते॥विक्रीडंश्चपुनर्भूमौपुनरेवनिषीदति॥२२॥आश्रमद्वारमागम्यमृगयूथानिगच्छति।मृगयूथैरनुगतःपुन
रेवनिवर्तते॥२३॥सीतादर्शनमाकांक्षन्राक्षसोमृगतांगतः॥परिभ्रमतिचित्राणिमंडलानिविनिष्पतन्॥२४॥समीपेमृगयूथ
स्यविस्मितानिविशेषतः॥समुद्वीक्ष्यचतंसर्वेमृगाह्यन्येवनेचराः॥२५॥उपगम्यसमाघ्रायविद्रवंतिदिशोदश॥राक्षसःसोपितान्व
न्यान्मृगान्मृगवधेरतः॥२६॥प्रच्छादनार्थंभावस्यनभक्षयतिसंस्पृशन्॥तस्मिन्नेवततःकालेवैदेहीशुभलोचना॥२७॥कुसुमाप
चयेव्यग्रापादपानभिवर्तते॥कर्णिकारानशोकांश्चचूतांश्चमदिरेक्षणा॥२८॥कुसुमान्यपचिन्वंतीचचाररुचिरानना॥अनर्हा
रण्यवासस्यसातंरत्नमयंमृगं॥२९॥मुक्तामणिविचित्रांगंददर्शपरमांगना॥सातंरुचिरदंतोष्ठीरूप्यधातुतनूरुहं॥३०॥विस्मयो
त्फुल्लनयनासस्नेहंसमुदैक्षत॥सचतांरामदयितांपश्यन्मायामयोमृगः॥३१॥विचचारपदंतत्रदीपयन्निवतद्वनं॥अदृष्टपूर्वं
दृष्ट्वातंनानारत्नमयंमृगं।विस्मयंपरमंसीताजगामजनकात्मजा॥३२॥इत्यार्षेश्रीरामायणेवाल्मी॰आ॰द्विचत्वारिंशःसर्गः॥४२॥

सातंसंप्रेक्ष्यसुश्रोणीकुसुमानिविचिन्वती।हेमराजतवर्णाभ्यांपार्श्वाभ्यामुपशोभितं॥१॥प्रहृष्टाचानवद्यांगीमृष्टहाटकवर्णिनी
भर्त्तारमपिचाक्रंदल्लक्ष्मणंचैवसायुधं॥२॥तयाहूतौनरव्याघ्रौवैदेह्यारामलक्ष्मणौ॥वीक्ष्यमाणौतुतंदेशंतदाददृशतुर्मृगं
३॥शंकमानस्तुतंदृष्ट्वालक्ष्मणोराममब्रवीत्।तमेवैनमहंमन्येमारीचंराक्षसंमृगं॥४॥अनेननिहताराजन्राजानःकाम
रूपिणा॥५॥अस्यमायाविदोमायामृगरूपमिदंकृतं॥भानुमत्पुरुषव्याघ्रगंधर्वपुरसन्निभं॥६॥मृगोह्येवंविधोरत्नवि
चित्रोनास्तिराघव॥जगत्यांजगतीनाथमायैषाहिनसंशयः॥७॥एवंब्रुवाणंकाकुत्स्थंपरिवार्यःशुचिस्मिता।उवाचसीता
संहृष्टामृगेणहृतचेतना॥८॥आर्यपुत्राभिरामोसौमृगोहरतिमन्मनः॥आनयैनंमहाबाहोक्रीडार्थंनोभविष्यति॥९॥इहा
श्रमपदेस्माकंवहवःपुण्यदर्शनाः।मृगाश्चरंतिसहिताश्चमराःसृमरास्तथा॥१०॥ऋक्षाःपृषतसंघाश्चवानराःकिंनरास्त
था।विचरंतिमहाबाहोरूपश्रेष्ठामहाबलाः॥११॥नचास्यसदृशोराजन्दृष्टपूर्वोमृगःपुरा।तेजसाक्षमयादीप्त्यायथायंमृग
सत्तमः॥१२॥नानावर्णविचित्रांगोरत्नविंदुसमाचितः।द्योतयन्वनमव्यग्रःशोभतेशशिसन्निभः॥१३॥अहोरूपमहोल
क्ष्मीःस्वरसंपच्चशोभना।मृगोऽद्भुतोविचित्रोसौहृदयंहरतीवमे॥१४॥यदिग्रहणमभ्येतिजीवन्नेवमृगस्तव।आश्चर्य्यभूतंभ
वतिविस्मयंजनयिष्यति॥१५॥समाप्तवनवासानांराज्यस्थानंचनःपुनः।अंतःपुरविभूषार्थोमृगएषभविष्यति॥१६॥भरतस्या

र्यपुत्रस्यस्वश्रूणांममचप्रभो॥मृगरूपमिदंव्यक्तंविस्मयंजनयिष्यति॥१७॥जीवन्नयदितेभ्येतिग्रहणंमृगसत्तमः।अजिनंनर
शार्दूलरुचिरंमेभविष्यति॥१८॥निहतस्यास्यसत्वस्यजांबूनदमयेत्वचि।शष्पब्रस्यांविनीतायामिच्छाम्यहमुपासितुं॥१९
कामवृत्तमिदंरौद्रंस्त्रीणामसदृशंमतं॥वपुषात्वस्यसत्वस्यविस्मयोजनितोमम॥२०॥तेनकांचनरोम्णातुमणिप्रवरशृं
गिणा॥तरुणादित्यवर्णेननक्षत्रपथवर्चसा॥२१॥एवंसीतावचःश्रुत्वादृष्ट्वाचमृगमद्भुतं॥वभूवराघवस्यापिमनोविस्म
यमागतं॥२२॥लोभितस्तेनरूपेणसीतयाचप्रचोदितः।उवाचराघवोहृष्टोभ्रातरंलक्ष्मणंवचः॥२३॥पश्यलक्ष्मणवैदेह्याःस्पृ
हांममगतामिमां॥रूपश्रेष्ठतयाह्येषमृगोद्यनभविष्यति॥२४नवनेनंदनोद्देशेनचैत्ररथसंश्रये॥कुतःपृथिव्यांसौमित्रे
योस्यकश्चित्समोमृगः॥२५॥प्रतिलोमानुलोमाश्चरुचिरारोमराजयः।शोभंतेमृगमाश्रित्यचित्राःकनकविंदुभिः॥२६॥पश्यास्य
जृंभमाणस्यदीप्तामग्निशिखोपमां।जिह्वांमुखान्निःसरंतींमेघादिवशतह्रदां॥२७॥महद्वालार्कसुमुखःशंखमुक्तानिभोदरः॥क
स्यनामानिरूप्योसौनमनोलोभयेन्मृगः॥२८॥कस्यरूपमिदंदृष्ट्वाजांबूनदमयप्रभं॥नानारत्नमयंदिव्यंनमनोविस्मयंव्रजे
त्॥२९॥मांसहेतोरपिमृगान्विहारार्थंचधन्विनः।घ्नंतिलक्ष्मणराजानोमृगयायांमहावने॥३०॥धनानिव्यवसायेनविचीयंतेम
हावने॥धातवोविविधाश्चापिमणिरत्नसुवर्णिनः॥३१॥तत्सारमखिलंनृणांधनंनिचयवर्द्धनं॥मनसाचिंतितंसर्वंयथाशुक्र

स्य लक्ष्मण ॥३२॥ अथः येनार्थं कृत्येन संव्रजत्यविचारयन्। तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याश्च लक्ष्मण ॥३३॥ एतस्य मृगरत्नस्य परा
र्द्ध्ये कांचनत्वचि। उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥३४॥ न कादली न प्रियकी न प्रवेणी न चाविकी। भवेदेतस्य सदृशी स्पर्श
नेनेति मे मतिः ॥३५॥ एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः। उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥३६॥ यदि वायं तथा
यन्मां भवेद्वदसि लक्ष्मण। मायैषा राक्षसस्येति कर्त्तव्योऽस्य वधो मया ॥३७॥ एतेन हि नृशंसेन मारीचेनाकृतात्मना। वने विचर
ता पूर्वं हिंसिता मुनिपुंगवाः ॥३८॥ उत्थाय बहवो येन मृगयायां नराधिपाः। निहताः परमेष्वासास्तस्माद्वध्यस्त्वयं मृगः ॥३९॥ पुर
स्तादिह वातापिः परिभूय तपस्विनः। उदरस्थो द्विजान् हंति स्वगर्भोऽश्वतरीमिव ॥४०॥ स कदाचिच्चिराल्लोभादाससाद महामु
निं। अगस्त्यं तेजसा युक्तं भक्षस्तस्य बभूव सः ॥४१॥ समुत्थाने च तद्रूपं कर्त्तुकामं समीक्ष्य तं। उत्स्मयित्वा तु भगवान् वातापिमिदम
ब्रवीत् ॥४२॥ त्वयाविगण्य वातापे परिभूताश्च तेजसा। जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥४३॥ एवं तु न भवेद्रक्षो वातापि
रिव लक्ष्मण। मद्विधं योऽतिमन्येत धर्मनित्यं जितेंद्रियं ॥४४॥ भवेद्धतोऽयं वातापिरगस्त्येनेव मा गतः। इह त्वं भव सन्नद्धो यंत्रितो
रक्ष मैथिलीं ॥४५॥ अस्यामायत्तमस्माकं यत्कृत्यं रघुनंदन। अहमेनं वधिष्यामि गृहीष्याम्यपि वा मृगं ॥४६॥ यावद्गच्छामि सौ
मित्रे मृगमानयितुं द्रुतं। पश्य लक्ष्मण वैदेहीं मृगत्वचि गतस्पृहां ॥४७॥ त्वचा प्रधानया ह्येष मृगोऽद्य न भविष्यति। अप्रमत्ते

नतेभागंआश्रमस्थेनसीतया॥४८॥यावत्एषनमेकेनसायकेननिहन्म्यहं॥हत्वैतच्चर्मआदायशीघ्रमेष्यामिलक्ष्मण॥४९
प्रदक्षिणेनातिबलेनपक्षिणाजटायुषाबुद्धिमताचलक्ष्मण॥भवाप्रमत्तःपरिगृह्यमैथिलींप्रतिक्षणंसर्वतएवशंकि
तः॥५०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेत्रिचत्वारिंशःसर्गः॥४३॥तथातुतंसमादिश्यभ्रातरंरघुनंदनः॥१बबंध
सिंमहातेजाजांबूनदमयत्सरुं॥ततस्त्रिविनतंचापंआदायात्मविभूषणं॥आबध्यचकलापौद्वौजगामोदग्रविक्रमः॥२
तंवंचयानंराजेंद्रमापतंतंनिरीक्ष्यवै॥बभूवांतर्हितस्त्रासासातुनःसंदृशनेभवत॥३॥बद्धासिर्द्धनुरादायप्रदुद्रावयतोमृ
गः॥तंस्मपश्यतिरूपेणद्योतयंतमिवाग्रतः॥४॥अवेक्ष्यावेक्ष्यधावंतंधनुःपाणिंमहावने॥अतिवृत्तमिषोःपातात्लोभयानं
कदाचन॥५॥शंकितंतुसमुद्भ्रांतमुत्पतंतमिवांबरे॥दृश्यमानमदृश्यंचवनोद्देशेषुकुत्रचित्॥६॥छिन्नाभ्रैरिवसंवीतंशारदंचं
द्रमंडलं॥मुहूर्तादेवददृशेमुहुर्दूरात्प्रकाशते॥७॥दर्शनादर्शनेनैवसोपकर्षतराघवं॥सदूरमाश्रमस्यास्यमारीचोमृगतां
गतः॥८॥आसीत्क्रुद्धस्तुकाकुत्स्थोविवशस्तेनमोहितः॥अथावतस्थेसुश्रांतंछायामाश्रित्यशाद्वले॥९॥सतमुन्मादयामासमृग
रूपोनिशाचरः॥मृगैःपरिवृतोवन्यैरदूरात्प्रत्यदृश्यत॥१०॥गृहीतुकामंदृष्ट्वैवपुनरेवाभ्यधावत॥तत्क्षणादेवसंत्रासात्पुनरंतर्हि
तोभवत्॥११॥पुनरेवततोदूराद्वृक्षखंडाद्विनिसृतः॥दृष्ट्वारामोमहातेजास्तंहंतुंकृतनिश्चयः॥१२॥भूयस्तुशरमुत्कृष्यकुपि

॥रा०आ०॥ तस्तत्रराघवः।सूर्यरश्मिप्रतिकाशंज्वलंतमरिमर्दनं॥१३॥संधायसुदृढेचापेविकृष्यबलवद्बली।तमेवमृगमुद्दिश्यज्वलंतमि
॥४७॥ वपन्नगं॥१४॥मुमोचज्वलितंदीप्तमस्त्रंब्रह्मविनिर्मितं॥सदृशंमृगरूपस्यविनिर्भिद्यशरोत्तमः॥१५॥मारीचस्यैवहृदयंविभेदा
शनिसन्निभः॥तालमात्रमथोत्पत्यन्यपतत्सशरातुरः॥१६॥व्यनदद्भैरवंनादंधरण्यामल्पजीवितः।म्रियमाणस्तुमारीचोजहौ
तांकृत्रिमांतनुं॥१७॥स्मृत्वातद्वचनंरक्षोदध्यौकेनचलक्ष्मणं।इहप्रस्थापयेत्सीतातांशून्येरावणोहरेत्॥१८॥सतद्वचनमाज्ञा
यचकाराशुततःस्वरं।सदृशंराघवस्यैवहासीतेलक्ष्मणेतिच॥१९॥तेननमर्मणिनिर्विद्धःशरेणानुपमेनहि।मृगरूपंतुतत्त्यक्त्वा
राक्षसंरूपमात्मनः॥२०॥चक्रेससुमहाकायोमारीचोजीवितंत्यजन्॥ततोविचित्रकेयूरःसर्वाभरणभूषितः।हेममालीम
हादंष्ट्रोराक्षसोभूच्छराहतः।तंदृष्ट्वापतितंभूमौराक्षसंघोरदर्शनं॥२२॥रामोरुधिरसिक्तांगंचेष्टमानंमहीतले।जगाममनसा
सीतांलक्ष्मणस्यवचःस्मरन्॥२३॥मारीचस्यतुमायैषापूर्वोक्तालक्ष्मणेनतु।तत्तथाह्यभवच्चाद्यमारीचोयंम याहतः॥२४॥हासी
तेलक्ष्मणेत्येवमाक्रुश्यतुमहास्वनं॥ममारराक्षसःसोयंश्रुत्वासीताकथंभवेत्॥२५॥लक्ष्मणश्चमहाबाहुःकामवस्थांगमिष्यति
इतिसंचिंत्यधर्मात्मारामोहृष्टतनूरुहः॥२६॥तत्ररामःभयंतीव्रमाविवेशविषादजं॥राक्षसंमृगरूपंतंहत्वाःश्रुत्वाचतंस्वरं॥२७ ॥राम॥
निहत्यपृषतंचान्यंमांसमादायराघवः।त्वरमाणोजनस्थानंससाराभिमुखस्तदा॥२८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआ ॥४७॥

रण्यकांडे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ आर्त्तस्वरं तु तं भर्त्तुर्विज्ञाय सदृशं वने ॥ उवाच लक्ष्मणं सीता गच्छ जानीहि राघवं ॥ १ ॥ नहि
मे हृदयं स्थाने जीवितं वावतिष्ठते ॥ क्रोशतः परमार्त्तस्य श्रुतः शब्दो मया भृशं ॥ २ ॥ आक्रंदमाने तु वने भ्रातरं त्रातुमर्हसि ॥ तं
क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणं ॥ ३ ॥ रक्षसां वशमापन्नं सिंहानामिव गोवृषं ॥ न जगाम तथोक्तस्तु भ्रातुराज्ञाय शास
नं ॥ ४ ॥ तमुवाच ततस्तत्र कुपिता जनकात्मजा ॥ सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ॥ ५ ॥ यस्त्वमस्यामवस्थायां भ्रातरं ना
भिपत्स्यसे । इच्छसि त्वं विनश्यंतं रामं लक्ष्मण मत्कृते ॥ ६ ॥ लोभान्मत्कृमे ते नूनं नानुगच्छसि राघवं ॥ व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि
नास्ति ते ॥ ७ ॥ तेन तिष्ठसि विस्रब्धस्तमपश्यन्महाद्युतिं ॥ किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ॥ ८ ॥ कर्त्तव्यमिह तिष्ठंत्या य
त्प्रधानस्त्वमागतः । इति ब्रुवाणां वैदेहीं बाष्पशोकपरिप्लुतां ॥ ९ ॥ अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूमिव ॥ पन्नगासुरगंधर्वदे
वमानुषराक्षसैः ॥ १० ॥ अशक्यस्तव वैदेहि भर्त्ता जेतुं न संशयः ॥ देवि देव मनुष्येषु गंधर्वेषु पतत्रिषु ॥ ११ ॥ राक्षसेषु पिशाचेषु कि
न्नरेषु मृगेषु च ॥ दानवेषु च घोरेषु न विद्येत तु शोभने ॥ १२ ॥ यो रामं प्रतियुध्येत समरे वासवोपमं ॥ त्रिभिर्लोकैः समुद्युक्तैः सेश्वरैः
ता० ९ सामरैरपि ॥ १३ ॥ अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि ॥ न त्वामस्मिन्वने हातुमुत्सहे राघवं विना ॥ १४ ॥ अनिवार्यं बलं तस्य बलै
र्बलवतामपि ॥ हृदयं निर्वृतं तेस्तु संतापस्त्यज्यतां तव ॥ १५ ॥ आगमिष्यति ते भर्त्ता शीघ्रं हत्वा मृगोत्तमं ॥ न स तस्य स्वरो व्यक्तं मायया

॥रा०आ० केनचित्कृतः॥१६॥गंधर्वनगरप्रख्यामायासातस्यरक्षसः।न्यासभूतासिवैदेहिन्यस्तामहात्मना॥१७॥रामेणत्वंवरारोहेनत्वं
॥४८॥ त्यक्तुमिहोत्सहे॥कृतवैराश्चकल्याणिवयमेतैर्निशाचरैः॥१८॥खरस्यनिधनादेवजनस्थानवधंप्रति।राक्षसाविविधावाचो।
विसर्जंतिमहावने॥१९॥हिंसाविहारावैदेहिनचिंतयितुमर्हसि॥लक्ष्मणेनैवमुक्तातुक्रुद्धासंरक्तलोचना॥२०॥अब्रवीत्परु
षंवाक्यंलक्ष्मणंसत्यवादिनं॥अकार्यकरणारंभनृशंसकुलपांसन॥२१॥अहंतवप्रियंमन्येरामस्यव्यसनंमहत्॥रामस्यव्य
सनंदृष्ट्वातेनैतानिप्रभाषसे॥२२॥नैतत्चित्रंसपत्नेषुपापंलक्ष्मणयद्भवेत्।त्वद्विधेषुनृशंसेषुनित्यंप्रच्छन्नचारिषु॥२३॥सु
दुष्टस्त्वंवनेराममेकमेकोनुगच्छसि॥ममहेतोःप्रतिच्छन्नःप्रयुक्तोभरतेनवा॥२४॥तन्नसिध्यतिसौमित्रेतवापिभरतस्यवा॥क
थमिंदीवरश्यामंपद्मपत्रनिभेक्षणं॥२५॥उपसंश्रित्यभर्तारंकामयेऽन्यंपृथक्जनं॥समक्षंतवसौमित्रेप्राणांस्त्यक्ष्येनसंश
यः॥२६॥रामंविनाक्षणमपिनहिजीवामिभूतले॥इत्युक्तःपरुषंवाक्यंसीतयारोमहर्षणं॥२७॥अब्रवील्लक्ष्मणःसीतांप्रांजलिर्वि
जितेंद्रियः॥उत्तरंनोत्सहेवक्तुंदैवतंभवतीमम॥२८॥वाक्यमप्रतिरूपंतुनचित्रंस्त्रीषुमैथिलि॥स्वभावस्त्वेषनारीणामेषलोके
षुदृश्यते॥२९॥विमुक्तधर्माश्चपलास्तीक्ष्णाभेदकराःस्त्रियः॥नसहेहीदृशंवाक्यंवैदेहीजनकात्मजे॥३०॥श्रोत्रयोरुभयोर्मेद्य ॥राम॥
तप्तनाराचसन्निभं॥उपशृण्वंतुमेसर्वेसाक्षिभूतावनेचराः॥३१॥न्यायवादीयथावाक्यमुक्तोहंपरुषंत्वया॥धिक्त्वामद्यप्रण ॥४८॥

स्यत्वंयन्मामेवंविशंकसे॥३२॥गमिष्येयत्रकाकुत्स्थःस्वस्तितेस्तुवराननेरक्षंतुत्वांविशालाक्षिसमग्रावनदेवताः॥३३॥
निमित्तानिहिघोराणियानिप्रादुर्भवंतिमे॥अपित्वांसहरामेणपश्येयंपुनरागतः॥३४॥लक्ष्मणेनैवमुक्तासारुदंतीजनका
त्मजा॥प्रत्युवाचततोवाक्यंतीव्रंवाष्पपरिप्लुता॥३५॥गोदावरींप्रवेक्ष्यामिविनारामेणलक्ष्मण॥आबंधिष्येऽथवात्यक्ष्येविष
मेदेहमात्मनः॥३६॥पिबामिवाविषंतीक्ष्णंप्रवेक्ष्यामिहुताशनं॥नत्वहंराघवादन्यंकदापिपुरुषंस्पृशे॥३७॥इतिलक्ष्मणमु
क्त्वासीतादुःखसमन्विता॥पाणिभ्यांरुदतीदुःखादुदरंप्रजघानह॥३८॥तामार्त्तरूपांविमनारुदंतींसौमित्रिरालोक्यविशाल
नेत्रां॥आश्वासयामासनचैवभर्तुस्तंभ्रातरंकिंचिदुवाचसीता॥३९॥ततस्तुसीतामभिवाद्यलक्ष्मणःकृतांजलिःकिंचिदभिप्रण
म्य॥अन्वीक्षमाणोबहुशःसमैथिलींजगामरामस्यसमीपमात्मवान्॥४०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेपंच
चत्वारिंशःसर्गः॥४५॥तयापरुषमुक्तस्तुकुपितोराघवानुजः॥सविकांक्षन्भृशंरामंप्रतस्थेनचिरादिव॥१॥तदासाद्यदशग्रीवस्त
स्मिन्नंतरमास्थितः॥अभिचक्रामवैदेहींपरिव्राजकरूपधृक्॥२॥श्लक्ष्णकाषायसंवीतःशिखीछत्रीउपानही॥वामेचांसेवस
ज्याथशुभौयष्टिकमंडलू॥३॥परिव्राजकरूपेणवैदेहींसमुपागमत्॥तामाससादइक्षोभ्रातृभ्यांरहितांवने॥४॥रहितांचंद्रसूर्या
भ्यांसंध्यामिवमहत्तमः॥तामपश्यत्ततोबालांराजपुत्रींयशस्विनीं॥रोहिणींशशिनाहीनांग्रहवद्भृशदारुणः॥तमुग्रतेजकर्मा

णं जनस्थानगता द्रुमाः॥६॥ समीक्ष्य न प्रकंपंते न प्रवाति च मारुतः। शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षंतं रक्तलोचनं॥७॥ स्तिमितं गंतुमा
रेभे यावद्गोदावरी नदी॥ रामस्य त्वंतरं प्रेप्सुर्दशग्रीवस्तदंतरे॥८॥ उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः। अभव्यो भव्यरूपेण भर्त्ता
रमनुशोचतीं॥९॥ अभ्यवर्त्तत वैदेहीं चित्रामिव शनैश्चरः॥ स पापो भव्यरूपेण तृणैः कूप इवावृतः॥१०॥ अतिष्ठत्प्रेक्ष्य वैदेहीं रामप
त्नीं यशस्विनीं॥ शुभां रुचिरदंतोष्ठीं पूर्णचंद्रनिभाननां॥११॥ आसीनां पर्णशालायां बाष्पशोकाभिपीडितां॥ स तां पद्मपलाशाक्षीं
पीतकौशेयवासिनीं॥१२॥ अभ्यगच्छत वैदेहीं दुष्टचित्तो निशाचरः। स मन्मथशराविष्टो ब्रह्मघोषमुदीरयन्॥१३॥ अब्रवीत्प्रश्रि
तं वाक्यं रहिते राक्षसाधिपः॥ तामुत्तमां त्रिलोकानां पद्महीनामिव श्रियं॥१४॥ विभ्राजमानां वपुषा रावणः प्रशशंस ह। का त्वं
कांचनवर्णाभे पीतकौशेयवासिनी॥१५॥ कमलानां शुभां मालां पद्मिनीव च बिभ्रती॥ ह्रीः श्रीः कीर्त्तिः शुभा लक्ष्मीः अप्सरो वा वरान
ने॥१६॥ भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी॥ समाः शिखरिणः स्निग्धाः पांडुरा दशनास्तव॥१७॥ विशाले विमले नेत्रे रक्तांते कृष्णता
रके॥ विशालं जघनं पीनमुरू करिकरोपमौ॥१८॥ एतावुपचितौ वृत्तौ संहितौ संप्रगल्भितौ॥ पीनोन्नतमुखौ कांतौ स्निग्धौ तालफलो
पमौ॥१९॥ मणिप्रवेकाभरणौ रुचिरौ ते पयोधरौ। चारुस्मिते चारुदति चारुनेत्रे विलासिनि॥२०॥ मनो हरसि मे रामे नदीकूलमि
वांभसा॥ करांतमितमध्यासि सुकेशी संहतस्तनी॥२१॥ नैव देवी न गंधर्वी न यक्षी न च किंनरी॥ नैवंरूपा मया नारी दृष्टपूर्वा महीत

ले॥२२॥रूपमग्र्यं च लोकेषु सौकुमार्य्यं वयश्च ते। इह वासश्च कांतारे चित्तमुन्मादयंति मे॥२३॥सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहा
र्हसि। राक्षसानामयं वासो घोराणां कामरूपिणां॥२४॥प्रासादाग्र्याणि रम्याणि नगरोपवनानि च। संपन्नानि सुगंधीनि युक्तान्याच
रितुं त्वया॥२५॥वरं माल्यं वरं भोज्यं वरं वस्त्रं च शो(भ)ने मे। भर्त्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे॥२६॥का त्वं भवसि रुद्राणां मरुतां वा शु
चिस्मिते। वसूनां वा वरारोहे देवता प्रतिभासि मे॥२७॥नेहागच्छंति गंधर्वा न देवा न च किन्नराः। राक्षसानामिमं वासं कथं नु त्व
मिहागता॥२८॥इह शाखामृगाः सिंहा द्वीपिव्याघ्रमृगास्तथा। ऋक्षास्तरक्षवः कंकाः कथं तेभ्यो न बिभ्यसे॥२९॥मदान्वितानां
घोराणां कुंजराणां तरस्विनां। कथमेका महारण्ये न बिभेषि वरानने॥३०॥कासि कस्य कुतश्च त्वं किंनिमित्तं च दंडकान्। एका
चरसि कल्याणि घोरान्राक्षससेवितान्॥३१॥इति प्रशस्ता वैदेही रावणेन दुरात्मना। द्विजातिवेषेण हि तं दृष्ट्वा रावणमाग
तं॥३२॥सर्वैरतिथिसत्कारैः पूजयामास मैथिली। उपनीयासनं पूर्वं पाद्येनाभिनिमंत्र्य च॥३३॥अब्रवीत्सिद्धमित्येव तत्तदा तं सौ
म्यदर्शनं॥३४॥द्विजातिवेषेण समीक्ष्य मैथिली तमागतं पात्रकुसुंभधारिणं। अशक्यमुद्द्वेष्टुमपायदर्शनं न्यमंत्रयद्ब्राह्म
णवत्तमंगना॥३५॥इयं बृसी ब्राह्मण काममास्यतामिदं च पाद्यं प्रतिगृह्यतामिति। इदं च सिद्धं वनजातमुत्तमं त्वदर्थमव्य
ग्रमिहोपभुज्यतां॥३६॥निमंत्र्यमाणः प्रतिपूर्णभाषिणीं नरेंद्रपत्नीं प्रसमीक्ष्य मैथिलीं। प्रसह्य तस्या हरणे धृतं मनः समर्प

॥रा०आ०॥ यित्वात्मवधायरावणः॥३७॥ततः सुवेषंमृगयागतंपतिंसमीक्षमाणंसहलक्ष्मणंतदा॥निरीक्ष्यमाणाहरितंददर्शतन्महद्वनं
॥५०॥ नैवतुरामलक्ष्मणौ॥३८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेषट्चत्वारिंशः सर्गः॥४६॥रावणेनतुवैदेहीतदापृष्टाजिही
र्षता॥परिव्राजकरूपेणशशंसात्मानमंगना॥१॥ब्राह्मणश्चातिथिश्चैवत्यनुक्तेहिशपेतमां इतिध्यात्वामुहूर्त्तंतुसीतावचन
मब्रवीत्॥२॥दुहिताजनकस्याहंमैथिलस्यमहात्मनः॥सीतानाम्नास्मिभद्रंतेरामभार्याद्विजोत्तम॥३॥उषित्वाद्वादशसमा
इक्ष्वाकूणांनिवेशने॥भुंजानामानुषान्भोगान्सर्वकामसमृद्धिनी॥४॥तत्रत्रयोदशेवर्षेराजामंत्रयतःप्रभुः॥अभिषेचयितुं
रामंसमेतोराजमंत्रिभिः॥५॥तस्मिन्संम्रियमाणेतुराघवस्याभिषेचने॥कैकेयीनामभर्त्तारमनार्यायाचतेवरं॥६॥प्रतिगृह्यतु
कैकेयीश्वसुरंसुकृतेनवै॥ममप्रव्राजनंभर्तुर्भरतस्याभिषेचनं॥७॥द्वावयाचतभर्त्तारंसत्यसंधंनृपोत्तमं॥नाद्यभोक्ष्येनवा
स्वप्स्येनपास्येचकदाचन॥८॥एषमेजीवितस्यांतोरामोयद्यभिषिच्यते॥इतिब्रुवाणांकैकेयींश्वसुरोमेसमानदः॥९॥अया
चतार्थैरन्वर्थैर्नचयांचांचकारसा॥अत्रगायत्री॥ममभर्त्तामहातेजावयसापंचविंशकः॥१०॥अष्टादशहिवर्षाणिममजन्म
निगण्यते॥रामेतिप्रथितोलोकेगुणवान्सत्यवाक्शुचिः॥११॥विशालाक्षोमहाबाहुःसर्वभूतहितेरतः॥कामार्त्तश्चमहातेजापि ॥राम॥
तादशरथःस्वयं॥१२॥कैकेय्याःप्रियकामार्थंतंरामंनाभ्यषेचयत्॥अभिषेकायतुपितुःसमीपंराममागतं॥१३॥कैकेयीममभर्त्ता ॥५०॥

रमित्युवाचद्रुतंवचः॥नवपित्रासमाज्ञप्तंममेदंशृणुराघव॥१४॥भरतायप्रदातव्यमिदंराज्यमकंटकं॥त्वयातुखलुवस्तव्यंनववर्
षाणिपंच॥१५॥वनेप्रव्रजकाकुत्स्थपितरंमोचयानृतात्॥तथेत्युक्त्वाचतांरामःकैकेयीमकुतोभयः॥१६॥चकारवचनंतस्याममभ
र्त्तादृढव्रतः॥दद्यान्नप्रतिगृह्णीयात्सत्यंब्रूयान्नचानृतं॥एतद्ब्राह्मणरामस्यव्रतंध्रुवमनुत्तमं॥१७॥तस्यभ्रातातुद्वैमात्रोलक्ष्मणो
नामवीर्यवान्॥रामस्यपुरुषव्याघ्रःसहायःसमरेरिहा॥१८॥तद्भ्रातालक्ष्मणोनामधर्मचारीमहारथः॥अन्वगच्छद्धनुःपाणिःप्र
व्रजंतंमयासह॥१९॥जटीतापसरूपेणमयासहसहानुजः॥प्रविष्टोदंडकारण्यंधर्मनित्योदृढव्रतः॥२०॥तेवयंप्रच्युताराज्या
त्कैकेय्यास्तुकृतेत्रयः॥विचरामद्विजश्रेष्ठवनंगंभीरमोजसा॥२१॥समाश्वसमुहूर्त्तंतुशक्यंवस्तुमिहत्वया॥आगमिष्यतिमेभ
र्त्तावन्यमादायपुष्कलं॥२२॥सत्वंनामचगोत्रंचकुलंचाचक्ष्वतत्वतः॥एकश्चदंडकारण्येकिमर्थंचरसिद्विज॥२३॥एवंब्रुवंत्यां
सीतायांरामपत्न्यांमहाबलः॥प्रत्युवाचोत्तरंतीव्रंरावणोराक्षसाधिपः॥२४॥येनवित्रासितालोकाःसदेवासुरपन्नगाः॥अहंस
रावणोनामसीतेरक्षोगणेश्वरः॥२५॥त्वांतुकांचनवर्णाभांदृष्ट्वाकौशेयवासिनीं॥रतिंस्वकेषुदारेषुनाधिगच्छाम्यनिंदिते॥२६॥
बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः॥सर्वासामेवभद्रंतेममाग्रमहिषीभव॥२७॥लंकानामसमुद्रस्यमध्येममहापुरी॥
सागरेणपरिक्षिप्तानिविष्टागिरिमूर्धनि॥२८॥तत्रसीतेमयासार्द्धंवनेषुविचरिष्यसि॥नचास्यवनवासस्यस्पृहयिष्यसिभामि

नि॥२९॥पंचदास्यःसहस्राणिसर्वाभरणभूषिताः।सीतेपरिचरिष्यंतिभार्याभवसिमेयदि॥३०॥रावणेनैवमुक्तातुकुपिताजनकात्म
जा।प्रत्युवाचानवद्यांगीतमनादृत्यराक्षसं॥३१॥महागिरिमिवाकंप्यंमहेंद्रसदृशद्युतिं॥महोदधिमिवाक्षोभ्यमहंराममनुव्र
ता॥३२॥सर्वलक्षणसंपन्नंन्यग्रोधपरिमंडलं॥सत्यसंधंमहाभागमहंराममनुव्रता॥३३॥महावाहुंमहोरस्कंसिंहविक्रांतगामिनं
नृसिंहंसिंहविक्रांतमहंराममनुव्रता॥३४॥पूर्णचंद्राननंरामंराजवत्संजितेंद्रियं॥पृथुकीर्तिंमहावाहुमहंराममनुव्रता॥३५
त्वंपुनर्जंवुकःसिंहींमामिहेच्छसिदुर्लभां॥नाहंशक्यात्वयास्प्रष्टुमादित्यस्यप्रभायथा॥३६॥पादपान्कांचनान्नूनंवहून्पश्य
सिमंदभाक्।राघवस्यप्रियांभार्यामधिगंतुंत्वमिच्छसि॥३७॥क्षुधितस्यचसिंहस्यमृगशत्रोस्तरस्विनः।आशीविषस्यवदनाद्दंष्ट्रा
मादातुमिच्छसि॥३८॥मंदरंपर्वतश्रेष्ठंपाणिनाहर्तुमिच्छसि।कालकूटविषंपीत्वास्वस्तिमान्गंतुमिच्छसि॥३९॥अक्षिंसूच्याप्रमृज
सिजिह्वयालेढिचक्षुरं॥राघवस्यप्रियांभार्यामधिगंतुंत्वमिच्छसि॥४०॥अवसज्यशिलांकंठेसमुद्रंतर्तुमिच्छसि॥सूर्याचंद्रमसौचो
भौपाणिनाहर्तुमिच्छसि।योरामस्यप्रियांभार्यांप्रधर्षयितुमिच्छसि॥४१॥अयोमुखानांशूलानांअग्रेचरितुमिच्छसि।अग्निंप्रज्व
लितंदृष्ट्वावस्त्रेणाहर्तुमिच्छसि॥४२॥कल्याणवृत्तांरामस्ययोभार्यांहर्तुमिच्छसि।रामस्यसदृशींभार्यांयोभिगंतुंत्वमिच्छसि॥४३॥यदं
तरंसिंहसृगालयोर्वनेयदंतरंस्यंदनिकासमुद्रयोः।सुराग्र्यसौवीरकयोर्यदंतरंतदंतरंवैतवराघवस्य॥४४॥यदंतरंकांचनसी

स्तलोहयोर्यदंतरं चंदनवारिपंकयोः। यदंतरं हस्तिबिडालयोर्वने तदंतरं दाशरथेस्तथैव॥४५॥ यदंतरं वायसवैनतेययोर्यदं
तरं मद्गुमयूरयोरपि यदंतरं सारसगृध्रयोर्वने स्तदंतरं दाशरथेस्तथैव च॥४६॥ तस्मिन्सहस्राक्षसमप्रभावे रामे स्थिते कार्मु
कवाणपाणौ। हृतापि तेहं न जरां गमिष्यसि वज्रं यथा मक्षिकयावगीर्णं॥४७॥ इतीव तद्वाक्यमदुष्टभावा सुदुष्टमुक्ता रजनीचरं तं॥
गात्रप्रकंपाद्व्यथिता बभूव वातोद्धता सा कदलीव तन्वी॥४८॥ तां वेपमानामुपलक्ष्य सीतां स रावणो मृत्युसमप्रभावः। कुलं बलं
नाम च कर्म चात्मनः समाचचक्षे भयकारणार्थं॥४९॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे सप्तचत्वारिंशः सर्गः॥४७॥
एवं ब्रुवंत्यां सीतायां संरब्धः परुषाक्षरं। ललाटे भ्रुकुटीं कृत्वा रावणः प्रत्युवाच ह॥१॥ भ्राता वैश्रवणस्याहं सापत्न्यो वरवर्णि
नि रावणो नाम भद्रं ते दशग्रीवः प्रतापवान्॥२॥ यस्य देवाः सगंधर्वाः पिशाचाः पन्नगोरगाः। विद्रवंति भयाद्भीता मृत्योरिव स
दा प्रजाः॥३॥ येन वैश्रवणो राजा द्वैमात्रः कारणांतरे। द्वंद्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः॥४॥ मद्भयात्तं परित्यज्य स्वमधि
ष्ठानमृद्धिमत्। कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः॥५॥ यस्य तत्पुष्पकं नाम विमानं कामगं शुभं। वीर्यादावर्जितं भद्रे येन या
मि विहायसं॥६॥ मम संजातरोषस्य मुखं दृष्ट्वैव मैथिलि। विद्रवंति परित्रस्ताः सुराः शक्रपुरोगमाः॥७॥ यत्र तिष्ठाम्यहं तत्र मारुतो
वाति शंकितः। तीव्रांशुः शिशिरांशुश्च भयात्संपद्यते रविः॥८॥ निष्कंपपत्रास्तरवो नद्यश्च स्तिमितोदकाः। भवंति यत्र तत्राहं तिष्ठा

मिचचरामिच।९।ममपारेसमुद्रस्यलंकानामपुरीशुभा।संपूर्णाराक्षसैर्घोरैर्यथेंद्रस्यामरावती।१०।प्राकारेणपरिक्षिप्तापांडुरे
णविराजिता।हेमकक्ष्यापुरीरम्यावैडूर्यमयतोरणा॥११॥हस्त्यश्वरथसंबाधातूर्यनादविनादिता।शतयोजनविस्तीर्णात्रिं
शद्योजनमायता।१२।सर्वकामफलैर्वृक्षैःसंकुलोद्यानशोभिता।तत्रत्वंवसतीसीतेराजपुत्रीमयासह॥१३॥नस्मरिष्यसि
नारीणांमानुषीणांमनस्विनि॥भुंजानामानुषान्भोगान्दिव्यांश्चवरवर्णिनि॥१४॥नस्मरिष्यसिरामस्यमानुषस्यगतायुषः॥
स्थापयित्वाप्रियंपुत्रंराज्ञादशरथेनयः॥१५॥मंदवीर्यस्ततोज्येष्टःततःप्रस्थापितोवनं॥तेनकिंभ्रष्टराज्येनरामेणगतचेत
सा।१६।करिष्यसिविशालाक्षितापसेनतपस्विना।सर्वराक्षसभर्तारंकामात्स्वयमिहागतं॥१७॥नमन्मथशराविष्टंप्रत्या(
ख्यातुंत्वमर्हसि॥प्रत्याख्यायतुमांभीरुपरितापंगमिष्यसि॥१८॥चरणेनापहत्येवपुरूरवसमुर्वशी॥अंगुल्यानसमोरामोम
मयुद्धेसमानुषः॥१९॥तवभाग्येनसंप्राप्तंभजस्ववरवर्णिनि॥एवमुक्तातुवैदेहीसं[illegible]क्रुद्धारक्तलोचना॥२०॥अब्रवीत्परुषं
वाक्यंरहितेराक्षसाधिपं।कथंवैश्रवणंदेवंसर्वभूतनमस्कृतं॥२१॥भ्रातरंव्यपदिश्यत्वमशुभंकर्तुमिच्छसि।अवश्यंविनशिष्यं
तिसर्वेरावणराक्षसाः॥२२॥येषांत्वंकर्कशोराजादुर्बुद्धिरजितेंद्रियः।अपहृत्यशचींभार्यांशक्यमिंद्रस्यजीवितुं॥२३॥नतुराम
स्यभार्यांमामपनीयास्तिजीवितं॥२४॥जीवेच्चिरंवज्रधरस्यहस्ताच्छचींप्रधृष्याप्रतिरूपरूपां।नमादृशींराक्षसधर्षयित्वा

पीतामृतस्यापि तवास्ति मोक्षः॥२५॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे अष्टचत्वारिंशः सर्गः॥४८॥ सीताया वचनं श्रु-
त्वा दशग्रीवः प्रतापवान्॥ हस्ते हस्तं समाहत्य चकार सुमहद्वपुः॥१॥ स मैथिलीं पुनर्वाक्यं बभाषे वाक्यकोविदः॥ नोन्मत्तया श्रु-
तौ मन्ये मम वीर्यपराक्रमौ॥२॥ उद्वहेयं भुजाभ्यां तु मेदिनीमंबरे स्थितः॥ अपिबेयं समुद्रं च मृत्युं हन्यां रणे स्थितः॥३॥ अर्कं रुंध्यां
शरैस्तीक्ष्णैर्विनिर्भिंद्यां महीतलं॥ कामरूपिणमुन्मत्ते पश्य मां कामदं पतिं॥४॥ एवमुक्तवतस्तस्य रावणस्य शिखिप्रभे॥ क्रुद्ध-
स्य हरिपर्यंते रक्तनेत्रे बभूवतुः॥५॥ सद्यः सौम्यं परित्यज्य भिक्षुरूपं स रावणः॥ स्वरूपं कालसंकाशं भेजे वैश्रवणानुजः॥६॥ संरक्त-
नयनः श्रीमांस्तप्तकांचनकुंडलः॥ क्रोधेन महताविष्टो नीलजीमूतसन्निभः॥७॥ दशास्यः कार्मुकी बाणी बभूव क्षणदाचरः॥ स
परिव्राजकच्छद्म महाकायो विहाय तत्॥८॥ प्रतिपद्य स्वकं रूपं रावणो राक्षसाधिपः॥ संरक्तनयनः क्रोधाज्जीमूतनिचयप्र-
भः॥९॥ रक्तांबरधरस्तस्थौ स्त्रीरत्नं प्रेक्ष्य मैथिलीं॥ स तामसितकेशांतां भास्करस्य प्रभामिव॥१०॥ वसनाभरणोपेतां मैथिलीं रावणो
ऽब्रवीत्॥ त्रिषु लोकेषु विख्यातं भर्तारं तं यदीच्छसि॥११॥ मामाश्रय वरारोहे तवाहं सदृशः पतिः॥ मां भजस्व चिराय त्वं अहं श्लाघ्यस्त-
व प्रियः॥१२॥ नैवाहं तु क्वचिद्भद्रे करिष्ये तव विप्रियं॥ त्यज्यतां मानुषो भावो मयि भावः प्रणीयतां॥१३॥ राज्याच्च्युतमसिद्धार्थं रामं
परिमितायुषं॥ कैर्गुणैरनुरक्तासि मूढे पंडितमानिनि॥१४॥ यः स्त्रियो वचनाद्राज्यं विहाय ससुहृज्जनं॥ अस्मिन्व्यालानुचरिते वने

॥रा०आ०॥ वसतिदुर्मतिः॥१५॥इत्युक्त्वा मैथिलीवाक्यंप्रियार्हंप्रियवादिनी॥अभिगम्यसुदुष्टात्मारावणःकाममोहितः॥१६॥जग्राहरावणः
॥५३॥ सीतांबुधःखेरोहिणीमिव॥वामेनसीतांपद्माक्षींमूर्द्धजेषुकरेणसः॥१७॥ऊर्वोस्तुदक्षिणेनैवपरिजग्राहपाणिना॥तंदृष्ट्वागि
रिसंकाशंतीक्ष्णदंष्ट्रंमहाभुजं॥१८॥प्राद्रवन्मृत्युसंकाशंभयार्त्तावनदेवताः।सचमायामयोदिव्यःखरयुक्तःखरस्वनः॥१९॥
प्रत्यदृश्यतहेमांगोरावणस्यमहारथः।ततस्तांपरुषैर्वाक्यैस्तर्जयित्वामहास्वनः।२०।अंकेनादायवैदेहींरथमारो
हयत्तदा।सागृहीताविचुक्रोशरावणेनयशस्विनी।रामेतिसीतादुःखार्त्तारामंदूरगतंवने॥२१॥रामकामांसकामार्त्तःप
वि न्नगेंद्रवधूमिव॥विचेष्टमानामादायउत्पपाताथरावणः॥२२॥ततःसाराक्षसेंद्रेणह्रियमाणाविहायसा॥भृशंचुक्रोशमत्ते
वभ्रांतचित्तायथातुरा॥२३॥हालक्ष्मणमहाबाहोगुरुचित्तप्रसादक॥ह्रियमाणांनजानीषेरक्षसाकामरूपिणा॥२४॥जीवितं
सुखमर्थंचधर्महेतोःपरित्यजन्॥ह्रियमाणामधर्मेणमांराघवनपश्यसि॥२५॥ननुनामाविनीतानांविनेतासिपरंतप॥
कथमेवंविधंपापंनत्वंसाधिहिरावणं॥२६॥नतुसद्योविनीतस्यदृश्यतेकर्मणःफलं।कालोप्यंगीभवंतत्रसस्यानामिवपक्त
ये॥२७॥त्वंकर्मकृतवानेतत्कालोपहतचेतनः।जीवितांतकरंघोरंरामाद्व्यसनमाप्नुहि॥२८॥हंतेदानींसकामातुकैकेयीबां ॥राम॥
धवैःसह॥ह्रियेयंधर्मकामस्यधर्मपत्नीयशस्विनः॥२९॥आमंत्रयेजनस्थानेकर्णिकारांश्चपुष्पितान्॥क्षिप्रंरामायशंसध्वंसी ॥५३॥

तांहरतिरावणः॥३०॥माल्यवंतंशिखरिणंवंदेप्रस्रवणंगिरिं॥क्षिप्रंरामायशंसस्वसीतांहरतिरावण॥३१॥हंससारससंघु
ष्टांवंदेगोदावरींनदीं॥क्षिप्रंरामायशंसत्वंसीतांहरतिरावणः॥३२॥दैवतानिचयान्यस्मिन्वनेविविधपादपे॥नमस्करो
म्यहंतेभ्योभर्तुःशंसतमांहृतां॥३३॥यानिकानिचिदप्यत्रसत्वानिनिवसंत्युत॥सर्वाणिशरणंयामिमृगपक्षिगणानपि॥३४
ह्रियमाणांप्रियांभर्तुःप्राणेभ्योपिगरीयसीं॥विवशापहृतासीतारावणेनेतिशंसत॥३५॥विदित्वामांमहाबाहुरमुत्रापिम
हाबलः॥आनेष्यतिपराक्रम्यवैवस्वतहृतामपि॥३६॥सातथाकरुणावाचोविलपंतीसुदुःखिता॥वनस्पतिगतंगृध्रंददर्शा
यतलोचना॥३७॥सातमुद्वीक्ष्यसुश्रोणीरावणस्यवशानुगा॥समाक्रंदद्भयपराशद्बोपहतयागिरा॥३८॥जटायोपश्यमा
मार्यह्रियमाणामनाथवत्॥अनेनराक्षसेंद्रेणकरुणंपापकर्मणा॥३९॥नैववारयितुंशक्यस्त्वयात्वेषनिशाचरः॥सत्ववान्
जितकाशीचसायुधश्चैवदुर्मतिः॥४०॥रामायतुयथातत्वंजटायोहरणंमम॥लक्ष्मणायचतत्सर्वमाख्यातव्यमशेषतः॥४१॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेएकोनपंचाशःसर्गः॥४९॥तंशब्दमवसुप्तस्तुजटायुरथशुश्रुवे॥निरैक्षद्रावणं
क्षिप्रंवैदेहींचयशस्विनीं॥१॥ततःपर्वतसंकाशस्तीक्ष्णतुंडःखगेश्वरः॥वनस्पतिगतःश्रीमान्व्याजहारशुभांगिरं॥२॥दशग्रीवस्थि
तोधर्मेपुराणेसत्यसंश्रयः॥भ्रातस्त्वंनिंदितंकर्मकर्तुंनार्हसिसांप्रतं॥३॥जटायुर्नामनाम्नाहंगृध्रराजोमहाबलः॥राजासर्वस्यलो

कस्यमहेंद्रवरुणोपमः।लोकानांचहितेयुक्तोरामोदशरथात्मजः॥४॥तस्यैषालोकनाथस्यधर्मपत्नीयशस्विनी।सीतानामव
रारोहायांत्वंहर्त्तुमिहेछसि॥५॥कथंराजास्थितोधर्मेपरदारान्परामृशेत्॥रक्षणीयाविशेषेणराजदारामहाबल॥६॥निवर्त्त
यमतिंनीचांपरदाराभिमर्शनात्॥नतत्समाचरेद्धीरोयत्परेणविगर्हितं॥७॥यथात्मनस्तथान्येषांदारारक्षाविमर्शनात्॥
धर्ममर्थंचकामंचशिष्टाःशास्त्रेष्वनागतं॥८॥नन्ववस्यंतिराजानोधर्म्यपौलस्त्यनंदन।राजाधर्मश्चकामश्चद्रव्याणामुत्तमो
निधिः॥९॥धर्मःशुभंवाकामोवाराजमूलंप्रवर्त्तते॥पापस्वभावश्चपलःकथंत्वंरक्षसांवर॥१०॥ऐश्वर्यमभिसंप्राप्तोविमानमिव
दुष्कृती॥कामंस्वभावोयोयस्यनशक्यंपरिमार्जितुं॥११॥नहिदुष्टात्मनामार्यमावसत्यालयेचिरं॥विषयेवापुरेवातेयदारामोमह
बलः॥१२॥नापराध्यतिधर्मात्माकथंतस्यापराध्यसि॥यदिशूर्पणखीहेतोर्जनस्थानगतःखरः॥१३॥अतिवृत्तोहतःपूर्वंरामेणा।
क्लिष्टकर्मणा।तत्रब्रूहियथासत्यंकोरामस्यव्यतिक्रमः॥१४॥यस्यत्वंलोकनाथस्यहृत्वाभार्यांगमिष्यसि॥क्षिप्रंविसृजवैदेहीं
मात्वांघोरेणचक्षुषा।१५।दहेद्दहनकल्पेनवृत्रमिंद्राशनिर्यथा।सर्पमाशीविषंबध्वावस्त्रांतेनाववुध्यसे॥१६॥ग्रीवायांप्रतिमु
क्तंचकालपाशंनपश्यसि॥सभारःसौम्यभर्त्तव्योयोनरंनावसादयेत्॥१७॥तदन्नमपिभोक्तव्यंजीर्यतेयदनामयं।यत्कृत्वानभ
वेद्धर्मोनकीर्त्तिर्नयशोभुवि॥१८॥शरीरस्यभवेत्खेदःकस्तत्कर्मसमाचरेत्॥षष्टिर्वर्षसहस्राणिजातस्यममरावण॥१९॥पितृपै

ता महं राज्यं यथावदनुतिष्ठत ॥ वृद्धोहं त्वं युवा धन्वी सरथः कवची शरी ॥ २० ॥ तथाप्यादाय वैदेहीं कुशली मे गमिष्यसि ॥ न शक्तस्त्वं
बलाद्धर्तुं वैदेहीं मम पश्यतः ॥ २१ ॥ हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥ युध्यस्व यदि शूरोसि मुहूर्तं तिष्ठ रावण ॥ शयिष्य
सि हतो भूमौ यथा पूर्वं खरस्तथा ॥ असकृत्संयुगे येन निहता दैत्यदानवाः ॥ २३ ॥ न चिराच्चीरवासास्त्वां रामो युधि वधिष्यति
किं नु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ ॥ २४ ॥ क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥ न मे त्वं जीवमानस्य नयिष्यसि शुभा
मिमां ॥ २५ ॥ सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियां ॥ अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ॥ २६ ॥ जीवितेनापि रामस्य तथा दश
रथस्य च ॥ तिष्ठ तिष्ठ दशग्रीव मुहूर्तं पश्य रावण ॥ २७ ॥ वृंतादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ युद्धातिथ्यं प्रदास्यामि यथा प्राणं
निशाचर ॥ २८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे पंचाशः सर्गः ॥ ५० ॥ इत्युक्तस्य यथान्यायं रावणस्य जटायुषा ॥ क्रुद्धस्या
ग्निनिभाः सर्वे रेजुर्विंशति दृष्टयः ॥ १ ॥ संरक्तनयनः क्रोधात्तप्तकांचनकुंडलः ॥ राक्षसेंद्रोभिदुद्राव पतगेंद्रममर्षणः ॥ २ ॥ स संप्रहार
स्तुमुलस्त[illegible]योस्तस्मिन्महामृधे ॥ बभूव वातोद्धतयोर्मेघयोर्गगने यथा ॥ ३ ॥ तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा ॥ सपक्षयो
र्माल्यवतोर्महापर्वतयोरिव ॥ ४ ॥ ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलः ॥ ५ ॥ स ता
नि शरजालानि गृध्रः पत्ररथेश्वरः ॥ जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ६ ॥ तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ॥ च

॥रा० आ०॥ कारवद्रुधागात्रेव्रणान्विहगसत्तमः॥७॥ अथक्रोधाद्दशग्रीवोजग्राहदशमार्गणान्॥ मृत्युदंडनिभान्घोरान्शत्रोर्निधन
॥५५॥ कांक्षया॥८॥ सतैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः॥ बिभेदनिशितैस्तीक्ष्णैर्गृध्रंघोरैःशिलीमुखैः॥९॥ सराक्षसरथेपश्यन्जान
कींबाष्पलोचनां॥ अचिंतयित्वाबाणांस्तान्राक्षसंसमभिद्रवत्॥१०॥ ततोस्यसशरंचापंमुक्तामणिविभूषितं॥ चरणाभ्यांमहा
तेजाबभंजपतगोत्तमः॥११॥ ततोन्यद्धनुरादायरावणःक्रोधमूर्छितः॥ ववर्षशरवर्षाणिशतशोथसहस्रशः॥१२॥ शरैरावारित
स्तस्यसंयुगेपतगेश्वरः॥ कुलायमभिसंप्राप्तःपक्षीवसबभौतदा॥१३॥ सतानिशरवर्षाणिपक्षाभ्यांचविधूयह॥ चरणाभ्यांमहा
तेजाबभंजास्यमहद्धनुः॥१४॥ तच्चाग्निसदृशंदीप्तंरावणस्यशरावरं॥ पक्षाभ्यांचमहावीर्योव्यधुनोत्पतगेश्वरः॥१५॥ कांचनोरश्छ
दान्दिव्यान्पिशाचवदनान्खरान्॥ तांश्चास्यजवसंपन्नान्जघानसमरेबली॥१६॥ वरंत्रिवेणुसंपन्नंकामगंपावकार्चिषं॥ म
णिहेमविचित्रांगंबभंजचमहारथं॥१७॥ पूर्णचंद्रप्रतीकाशंछत्रंचव्यजनैःसह॥ पातयामासवेगेनग्राहिभीराक्षसैःसह॥१८॥ सा
रथेश्चास्यवेगेनतुंडेनैवमहच्छिरः॥ पुनर्व्यपाहनच्छ्रीमान्पक्षिराजोमहाबलः॥१९॥ सभग्नधन्वाविरथोहताश्वोहतसारथिः॥ अंके
नादायवैदेहींपपातभुविरावणः॥२०॥ दृष्ट्वानिपतितंभूमौरावणंभग्नवाहनं॥ साधुसाध्वितिभूतानिगृध्रराजमपूजयन्॥२१॥ प ॥राम॥
रिश्रांतंतुतंदृष्ट्वाजरयापक्षियूथपं॥ उत्पपातपुनर्हृष्टोमैथिलींगृह्यरावणः॥२२॥ तंप्रहृष्टंनिधायांकेगच्छंतंजनकात्मजां॥ गृध्रर ॥५५॥

जः समुत्पत्य रावणं समभिद्रवत् ॥२३॥ न मा वार्य्य महातेजा जटायुरिदमब्रवीत् । वज्रसंस्पर्शबाणस्य भार्य्यां रामस्य रावण ॥२४॥ अ
ल्पबुद्धे हरस्येनां वधाय खलु रक्षसां । समित्रबंधुः सामात्यः सबलः सपरिच्छदः ॥२५॥ विषपानं पिबस्येतत् पिपासित इवोदकं ॥
अनुबंधमजानंतः कर्मणामविचक्षणाः ॥२६॥ शीघ्रमेव विनश्यंति यथा त्वं विनशिष्यसि । बद्धस्त्वं कालपाशेन क्व गतस्तस्य
मोक्ष्यसे ॥२७॥ वधाय बडिशं गृह्य सामिषं जलजो यथा । न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण ॥२८॥ धर्षणं चाश्रमस्यास्य
क्षमिष्येते तु राघवौ । यथा त्वया कृतं कर्म भीरुणा लोकगर्हितं ॥२९॥ तस्कराचरितो मार्गो नैष वीरनिषेवितः । युध्यस्व यदि शूरोसि
मुहूर्तं तिष्ठ रावण ॥३०॥ शयिष्यसि हतो भूमौ यथा भ्राता खरस्तथा । परेतकाले पुरुषो यत्कर्म प्रतिपद्यते ॥३१॥ विनाशायात्मनो
धर्म्यं प्रतिपन्नोसि कर्म तत् । पापानुबंधो वै यस्य कर्मणः को नु तत्पुमान् ॥३२॥ कुर्वीत लोकाधिपतिः स्वयंभूर्भगवानपि । एवमु
क्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः ॥३३॥ निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् । तं गृहीत्वा नखैस्तीक्ष्णैर्विददार समंततः ॥३४
अधिरूढो गजारोहो यथा स्यात् दुष्टवारणं । विरराद नखैस्तुंडं तस्य पृष्ठे समर्पयत् ॥३५॥ केशांश्चोत्पाटयामास नखपक्षमुखा
युधः । स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः ॥३६॥ अमर्षस्फुरितोष्ठः सन् प्राकंपत स रावणः । संपरिष्वज्य वैदेहीं वामेनांकेन रा
वणः ॥३७॥ तलेनाभिजघानार्त्तो जटायुं क्रोधमूर्छितः । जटायुस्तमतिक्रम्य तुंडेनास्य खगाधिपः ॥३८॥ वामबाहून् दश तदा व्यपाहर

॥रा०आ०॥ दरिंदमः॥संछिन्नबाहोःसद्यैवबाहवःसहसाभवन्॥३९॥विषज्वालावलीयुक्तावल्मीकादिवपन्नगाः॥ततःक्रोधाद्दशग्रीवःसीता
॥५६॥ मुत्सृज्यवीर्यवान्॥४०॥मुष्टिभ्यांचरणाभ्यांचगृध्रराजमपोथयत्॥ततोमुहूर्तंसंग्रामोबभूवातुलवीर्ययोः॥४१॥राक्षसानांचमु
ख्यस्यपक्षिणांप्रवरस्यच॥तस्यव्यायच्छमानस्यरामस्यार्थेऽथरावणः॥४२॥पक्षौपार्श्वौचपादौचखड्गमुद्धृत्यसोछिनत्॥सछि
न्नपक्षःसहसारक्षसाघोरकर्मणा॥निपपाततनोगृध्रोधरण्यामल्पजीवितः॥तंदृष्ट्वापतितंभूमौक्षतजार्द्रंजटायुषं॥४४॥
अभ्यधावतवैदेहीस्वबंधुमिवदुःखिता॥४५॥तंनीलजीमूतनिकाशकल्पंसुपांडुरोरस्कमुदारवीर्यं॥ददर्शलंकाधिपतिः
पृथिव्यांजटायुषंशांतमिवाग्निदावं॥४६॥ततस्तुतंपत्ररथंमहीतलेनिपातितंरावणवेगमर्दितं॥पुनःपरिष्वज्यशशिप्र
भाननारुरोदसीताजनकात्मजातदा॥४७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेएकपंचाशःसर्गः॥५१॥तमल्पजीवि
तंभूमौस्फुरंतंराक्षसाधिपः॥ददर्शगृध्रंपतितंसमीपेराघवाश्रमात्॥१॥सातुताराधिपमुखीरावणेनसमीक्षतं॥गृध्रराजंवि
निहतंविललापसुदुःखिता॥२॥निमित्तंलक्षणंज्ञानंशकुनिस्वरदर्शनं॥अवश्यंसुखदुःखेषुनराणांसंप्रदृश्यते॥३॥ननू
नंरामजानीहिमहद्व्यसनमात्मनः॥धावंतिनूनंकाकुत्स्थमदर्थेमृगपक्षिणः॥४॥अयंहिपापाचारेणमांत्रातुमभिसंगतः॥ ॥राम॥
शेतेविनिहतोभूमौममाभाग्याद्विहंगमः॥५॥त्राहिमामद्यकाकुत्स्थलक्ष्मणेतिवरांगना॥सुसंत्रस्तासमाक्रंदच्छृण्वतांतुय ॥५६॥

थांतिके॥६॥तांक्लिष्टमाल्याभरणां।विलपंतीमनाथवत्॥अभ्यधावतवैदेहींरावणोराक्षसाधिपः॥७॥तांलतामिववेष्टंतीमा
लिंगंतीमहाद्रुमान्॥मुंचमुंचेतिबहुशःप्रवदन्राक्षसाधिपः॥८॥क्रोशंतींरामरामेतिरामेणरहितेवने॥जीवितांतायकेशेषुज
ग्राहांतकसन्निभः॥९॥प्रधर्षितायांवैदेह्यांबभूवसचराचरं॥जगत्सर्वममर्यादंतमसांधेनसंवृतं॥१०॥नवातिमारुतस्तत्रनि
ष्प्रभोभूद्दिवाकरः॥दृष्ट्वासीतांपरामृष्टांदेवोदिव्येनचक्षुषा॥११॥कृतंकार्यमितिश्रीमान्व्याजहारपितामहः॥प्रहृष्टाव्यथि
ताश्चासन्सर्वेतेपरमर्षयः॥१२॥दृष्ट्वासीतांपरामृष्टांदंडकारण्यवासिनः॥रावणस्यविनाशंचप्राप्तंबुद्ध्वायदृच्छया॥१३॥स
तुतांरामरामेतिरुदंतींलक्ष्मणेतिच॥जगामाकाशमादायरावणोराक्षसेश्वरः॥१४॥तप्ताभरणसर्वांगीपीतकौशेयवासिनी
रराजराजपुत्रीतुविद्युत्सौदामिनीयथा॥१५॥उद्धूतेनचवस्त्रेणतस्याःपीतेनरावणः॥अधिकंपरिबभ्राजगिरिर्दीप्तइवाग्नि
ना॥१६॥तस्याःपरमकल्याण्यास्ताम्राणिसुरभीणिच॥पद्मपत्राणिवैदेह्याअवकीर्यंतरावणं॥१७॥तस्याःकौशेयमुद्धूतमा
काशेकनकप्रभं॥बभौचादित्यरागेणताम्रमभ्रमिवातपे॥१८॥तस्यास्तद्विमलंवक्त्रमाकाशेरावणांकगं॥नरराजविना
रामंविनालमिवपंकजं॥१९॥बभूवजलदंभित्वानीलंचंद्रइवोदितः॥सुललाटंसुकेशांतंपद्मगर्भाभमव्रणं॥२०॥शुक्लैःसु
विमलैर्दंतैःप्रभावद्भिरलंकृतं॥तस्यास्तत्सुनसंवक्त्रमाकाशेरावणांकगं॥२१॥रुदितव्ययमृष्टास्त्रंचंद्रवत्प्रियदर्शं

नं॥ सुनासं चारुदंतोष्ठं आकाशे हाटकप्रभं॥ २२॥ राक्षसेंद्रसमाधूयतं तस्यास्तद्वदनं शुभं॥ शुशुभे न विना रामं दिवा चंद्र इवो
दितः॥ २३॥ सा हेमवर्णा नीलांगं मैथिली राक्षसाधिपं॥ शुशुभे कांचनी कांची नीलं गजमिवाश्रिता॥ २४॥ सा पद्मगौरी हेमाभा
रावणं जनकात्मजा॥ विद्युद्घनमिवाविश्य शुशुवे तप्तभूषणा॥ २५॥ तस्या भूषणघोषेण वैदेह्या राक्षसेश्वरः॥ वभूव विम
लो नीलः सघोष इव तोयदः॥ २६॥ उत्तमांगच्युता तस्याः पुष्पवृष्टिः समंततः॥ सीताया ह्रियमाणायाः पपात धरणीतले॥ २७॥
सा तु रावणवेगेन पुष्पवृष्टिः समंततः॥ समाधूता दशग्रीवं पुनरेवाभ्यवर्त्तत॥ २८॥ अभ्यवर्त्तत पुष्पाणां धारा वैश्रवणानु॥
जं॥ नक्षत्रमाला विमला मेरुं शृंगमिवोत्तमं॥ २९॥ चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितं॥ विद्युन्मंडलसंकाशं पपात मधुरस्व
नं॥ ३०॥ तरुप्रवालरक्ता सा नीलांगं राक्षसेश्वरं॥ प्राशोभयत वैदेही गजकक्षेव कांचनी॥ ३१॥ तां महोल्कामिवाकाशे दीप्यमानां
स्वतेजसा॥ जगामाकाशमाविश्य सीतां वैश्रवणानुजः॥ ३२॥ तस्यास्तान्यग्निवर्णानि भूषणानि महीतले॥ सघोषाण्यवकी
र्यंत क्षीणास्तारा इवांवरात्॥ ३३॥ तस्याः स्तनांतराद्भ्रष्टो हारस्ताराधिपद्युतिः॥ वैदेह्या निपतन्भाति गंगेव गगनाच्च्युता॥ ३४॥ उ
त्पातवाताभिहता नानाद्विजगणायुताः॥ मा भैरिति विधूताग्रा व्याजह्रुरिव पादपाः॥ ३५॥ नलिन्यो ध्वस्तकमलाः स्त्रस्तमीनज
लेचराः॥ सखीमिव गतोत्साहां शोचंतीह स्म मैथिलीं॥ ३६॥ समंतादभिसंपत्य सिंहव्याघ्रमृगद्विजाः॥ अन्वधावंस्तदा रोषात्सीता

छायानुगामिनः॥३७॥जलप्रपातास्रमुखाः शृंगैरुछ्रितबाहवः। सीतायां ह्रियमाणायां विक्रोशंतीव पर्वताः॥३८॥ह्रियमाणां
तु वैदेहीं दृष्ट्वा दीनो दिवाकरः। प्रविध्वस्तप्रभः श्रीमानासीत्पांडुरमंडलः॥३९॥नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता। यत्र रा
मस्य वैदेहीं सीतां हरति रावणः॥४०॥इति भूतानि सर्वाणि गणशः पर्यदेवयन्। वित्रस्तकादीनमुखा रुरुदुर्मृगपोतकाः॥४१॥उ
द्वीक्ष्योद्वीक्ष्य नयनैरस्रपातं विलक्षणाः। सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः॥४२॥विक्रोशंतीं दृढं सीतां दृष्ट्वा दुःखं तथा गतां
तां तु लक्ष्मण रामेति क्रोशंतीं मधुरस्वरां॥४३॥अवेक्ष्यमाणां बहुशो वैदेहीं धरणीतलं। सतामाकुलकेशांतां विप्रमृष्टविशेष
कां॥४४॥जहारात्मविनाशाय दशग्रीवो मनस्विनीं॥४५॥ततस्तु सा चारुदती शुचिस्मिता विनाकृता बंधुजनेन मैथिली। अपश्य
ती राघवलक्ष्मणावुभौ विवर्णवक्त्रा भयभारपीडिता॥४६॥इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे द्विपंचाशः सर्गः॥५२
खमुत्पतंतं दृष्ट्वा मैथिली जनकात्मजा। दुःखिता परमोद्विग्ना भये महति वर्तिनी॥१॥रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधि
पं। रुदती करुणं सीता ह्रियमाणेदमब्रवीत्॥२॥न व्यपत्रपसे नीच कर्मणानेन रावण। ज्ञात्वा विरहितां यो मां चोरयित्वा पला
यसे॥३॥त्वयैव नूनं दुष्टात्मन्भीरुणा हर्तुमिच्छता। ममापवाहितो भर्त्ता मृगरूपेण मायया॥४॥यो हि मामुद्यतस्त्रातुं सोप्ययं
विनिपातितः। गृध्रराजः पुराणोसौ श्वशुरस्य सखा मम॥५॥परमं खलु ते वीर्यं दृश्यते राक्षसाधम। विश्राव्य नामधेयं हि युद्धे।

नास्मिन्न् जितात्वया॥६॥ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे। स्त्रियाश्चहरणं नीच रहिते च परस्य च॥७॥कथयिष्यंति लोकेषु पु
रुषाः कर्म कुत्सितं। सुनृशंसमधर्मिष्टं तव शौंडीर्यमानिनः॥८॥धिक्ते वीर्यं च शौर्यं च यत्त्वया कथितं मम। कुलाक्रोशकरं लोके धि
क्ते चारित्रमीदृशं॥९॥किं शक्यं कर्तुमेवं हि यज्जवेनैव धावसि। मुहूर्त्तमपि तिष्टत्वं न जीवन्प्रतियास्यसि॥१०॥नहि चक्षुःपथं प्रा
प्तयोः पार्थिवपुत्रयोः॥ससैन्योपि समर्थस्त्वं मुहूर्त्तमपि जीवितुं॥११॥नत्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन। वने प्रज्वलि
तस्येव स्पर्शमग्नेर्विहंगमः॥१२॥साधु कृत्वात्मनः पथ्यं साधु मां मुंच रावण। मत्प्रधर्षणरुष्टो हि भ्रात्रा सह पतिर्मम॥१३॥विधास्य
ति विनाशाय त्वं मां यदि न मुंचसि। येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि॥१४॥व्यवसायः स ते नीच भविष्यति निरर्थकः॥नह्य
हं तमपश्यंती भर्तारं वासवोपमं॥१५॥उत्सहे शत्रुवशगा प्राणान्धारयितुं चिरं। न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे॥१६॥मृ
त्युकाले यथा मर्त्यो विपरीतानि सेवते। मुमूर्षूणां तु सर्वेषां यत्पथ्यं तन्न रोचते॥१७॥पश्यामेव हि कंठे त्वां कालपाशावपाशि
तं। यथा चास्मिन्भयस्थाने न बिभेषि निशाचर॥१८॥व्यक्तं हिरण्मयांस्त्वं हि संपश्यसि महीरुहान्। नदीं वैतरणीं घोरां रुधि
रौघनिवाहिनीं॥१९॥खड्गपत्रवनं चैव भीमं पश्यसि रावण। तप्तकांचनपुष्पां च वैडूर्यप्रवरच्छदां॥२०॥द्रक्ष्यसे शाल्मलीं तीक्ष्णा ॥राम॥
मायसैः कंटकैश्चितां॥न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः॥२१॥धारितुं शक्ष्यसि चिरं विषं पीत्वेव निर्घृणः॥बद्धस्त्वं का ॥५८॥

लपाशेन दुर्निवारेण रावण ॥२२॥ क्व गतो लप्स्यसे शर्म भर्तुर्मम महात्मनः । निमेषांतरमात्रेण विना भ्रातरमाहवे ॥२३॥ राक्षसानि
हता येन सहस्राणि चतुर्दश ॥ स कथं राघवो वीरः सर्वास्त्रकुशलो बली ॥२४॥ न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणं । एतच्चा
न्यच्च परुषं वैदेही रावणं कगा ॥२५॥ भयशोकसमाविष्टा करुणं विललाप ह ॥२६॥ तथा भृशार्त्ता बहुरूपभाषिणीं विलापपूर्वं क
रुणं च भामिनी । जहार पापः करुणं विचेष्टतीं नृपात्मजामागतगात्रवेपथुः ॥२७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकां
डे त्रिपंचाशः सर्गः ॥५३॥ ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती । ददर्श गिरिशृंगस्थान् पंच वानरपुंगवान् ॥१॥ तेषां मध्ये वि
शालाक्षी कौशेयं कनकप्रभं । उत्तरीयं वरारोहा शुभान्याभरणानि च ॥२॥ मुमोच यदि रामाय शंसेयुरिति मैथिली । वस्त्रमुत्सृ
ज्य तन्मध्ये निक्षिप्तं सह भूषणं ॥३॥ संभ्रमात्तु दशग्रीवस्तत्कर्म च न बुद्धवान् । पिंगाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव ॥४॥
विक्रोशंतीं तथा सीतां ददृशुर्वानरर्षभाः । स च पंपामतिक्रम्य लंकामभिमुखः पुरीं ॥५॥ जगाम मैथिलीं गृह्य रुदतीं राक्षसेश्वरः
तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः ॥६॥ उत्संगेनेव भुजंगीं तीक्ष्णदंष्ट्रां महाविषां । वनानि सरितः शैलान् सरांसि च विहा
यसा ॥७॥ स क्षिप्रं समतीयाय शरश्चापादिव च्युतः । तिमिनक्रनिकेतं तु वरुणालयमक्षयं ॥८॥ सरितां शरणं गत्वा समतीयाय
सागरं । संभ्रमात्परिवृत्तोर्मिरुद्धमीनमहोरगः ॥९॥ वैदेह्यां ह्रियमाणायां बभूव वरुणालयः । अंतरिक्षगता वाचः ससृजुश्चा

॥

॥ रा० आ० ॥ रणास्तदा ॥२०॥ एतदंतो दशग्रीवद्भुतिसिद्धास्तदाब्रुवन् । सतु सीतां निवेष्टंतीमंकेनादाय रावणः ॥२१॥ प्रविवेश पुरीं लंकां रूपिणीं मृत्यु
॥५९॥ मात्मनः ॥ सोभिगम्य पुरीं लंकां सुविभक्तमहापथां ॥२२॥ संरूढकक्ष्याबहुलं स्वमंतःपुरमाविशत् । तत्र तामसितापांगीं शोकमोहप ॥ ।
रायणां ॥२३॥ निदधे रावणः सीतां मयो मायामिवासुरीं ॥ अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ॥२४॥ यथा नैनां पुमान्स्त्री वा सीतां
पश्यत्वसंमतः । मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥२५॥ यद्यदिच्छेत्तदेवास्या देयं मच्छंदतो यथा ॥ या च वक्ष्यति वैदेहीं
वचनं किंचिदप्रियं ॥२६॥ अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियं । तथोक्त्वा राक्षसीस्तास्तु राक्षसेंद्रः प्रतापवान् ॥२७॥ निष्क्र
म्यांतःपुरात्तस्मात्किंकृत्यमिति चिंतयन् । ददर्शाष्टौ महावीर्यान्राक्षसान्पिशिताशनान् ॥२८॥ स तान्दृष्ट्वा महावीर्यो वरदा
नेन मोहितः । उवाचैतानिदं वाक्यं प्रशस्य बलवीर्यतः ॥२९॥ नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः । जनस्थानं हतस्थानं भूतपू
र्वं खरालयं ॥३०॥ तत्रोष्यतां जनस्थाने शून्ये निहतराक्षसे ॥ पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥३१॥ बहुसैन्यं महावीर्यं
जनस्थाने निवेशितं ॥ सदूषणखरं युद्धे निहतं रामसायकैः ॥३२॥ ततः क्रोधो ममापूर्वो धैर्यस्योपरि वर्द्धते ॥ वैरं च सुमहज्जा
तं रामं प्रति सुदारुणं ॥३३॥ निर्यातयितुमिच्छामि तं च वैरं महारिपोः । न हि पश्याम्यहं निद्रामहत्वा संयुगे रिपुं ॥३४॥ तं त्विदानी ॥ राम ॥
महं हत्वा खरदूषणघातिनं । रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्द्धनः ॥३५॥ जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता । प्रवृत्तिरु ॥५९॥

पनेतस्या किं करोतीति तत्वतः॥२६॥ अप्रमादाच्च गंतव्यं सर्वैरेव निशाचरैः। कर्त्तव्यश्च सदा यत्नो राघवस्य वधं प्रति॥२७॥ युष्मा
कं च वलज्ञोऽहं वहुशो रणमूर्द्धनि। अतश्चास्मिन्जनस्थाने मया यूयं निवेशिताः॥२८॥ ततः प्रियं वाक्यमुपेत्य राक्षसा महा
र्थमष्टाव भिवंद्य रावणं॥ विहाय लंकां सहिताः प्रतस्थिरे यतो जनस्थानमलक्ष्यदर्शनाः॥२९॥ ततस्तु सीतामुपलभ्य मैथिलीं सु
संप्रहृष्टः प्रतिगृह्य रावणः। प्रसज्य रामेण च वैरमुत्तमं वभूव मोहान्मुदितः स राक्षसः॥३०॥ इत्यार्षे श्रीरामायणे वाल्मीकीये
आरण्यकांडे चतुःपंचाशः सर्गः॥५४॥ संदिश्य राक्षसान् घोरान् रावणोऽष्टौ महावलान्॥ आत्मानं वुद्धिवैक्लव्यात्कृतकृत्यम
मन्यत॥१॥ स चिंतयानो वैदेहीं कामवाणावपीडितः॥ प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन्॥२॥ स प्रविश्य तु तद्वेश्म रावणो
राक्षसेश्वरः॥ अपश्यद्राक्षसीमध्ये सीतां शोकपरायणां॥३॥ अश्रुपूर्णमुखीं दीनां शोकभारावपीडितां॥ वायुवेगैरिवाक्रांतां म
ज्जंतीं नावमर्णवे॥ मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृतां॥ अधोमुखमुखीं सीतां तामभ्येत्य निशाचरः॥४॥ तां तु शोकवशां दीनाम
वशां राक्षसाधिपः॥ स वलाद्दर्शयामास गृहं देवगृहोपमं॥५॥ हर्म्यप्रासादसंवाधं स्त्रीसहस्रनिषेवितं॥ नानापक्षिगणैर्जुष्टं नानार
त्नसमन्वितं॥६॥ कांचनैस्तापनीयैश्च स्फटिकै राजतैस्तथा॥ वज्रवैडूर्यचित्रैश्च स्तंभैर्दृष्टिमनोरमैः॥७॥ दिव्यदुंदुभिनिर्घोषं तप्त
कांचनभूषणं। सोपानं कांचनं चित्रमारुरोह तया सह॥८॥ दांतिका राजताश्चैव गवाक्षाः प्रियदर्शनाः। हेमजालावृताश्चासन्

॥रा०आ० तत्रप्रासादपंक्तयः॥१०॥सुधामणिविचित्राणिभूमिभागानिसर्वशः।दशग्रीवःस्वभवनेप्रादर्शयतमैथिलीं॥११॥दीर्घिकाःपुष्करि
॥६०॥ ण्यश्चनानापुष्पसमावृताः।रावणोदर्शयामाससीतांशोकपरायणां॥१२॥दर्शयित्वातुवैदेहींकृत्स्नंतद्भवनोत्तमं।उवाचवाक्यं
पापात्मारावणोजनकात्मजां॥१३॥दशराक्षसकोट्यश्चद्वाविंशतितथापरा।वर्जयित्वाजनान्वृद्धान्बालांश्चरजनीचरान्॥१४॥ये
षांप्रभुरहंसीतेसर्वेषांभीमकर्मणां॥सहस्रमेकमेकस्यममकार्यपुरःसरं।यदिदंराज्यतंत्रंमेत्वयिसर्वंप्रतिष्ठितं।जीवितंचवि
शालाक्षित्वंमेप्राणैर्गरीयसी॥१६॥बह्वीनामुत्तमस्त्रीणांममयोसौपरिग्रहः।तासांत्वमीश्वरीसीतेममभार्याभवप्रिये॥१७॥सा
धुकिंतेन्ययाबुद्ध्यारोचयस्ववचोमम।भजस्वमाभितप्तस्यप्रसादंकर्त्तुमर्हसि॥१८॥परिक्षिप्तासमुद्रेणलंकेयंशतयोजना।ने
यंधर्षयितुंशक्यासेंद्रैरपिसुरासुरैः॥१९॥नदेवेषुनयक्षेषुगंधर्वेषूरगेषुच।अहंपश्यामिलोकेषुयोमेवीर्यसमोभवेत्॥
२०॥राज्यभ्रष्टेनदीनेनतापसेनगतायुषा।किंकरिष्यसिरामेणमानुषेणाल्पतेजसा॥२१॥भजस्वसीतेमामेवभर्त्ताहंसदृश
स्तव।यौवनंत्वध्रुवंभीरुरमस्वेहमयासह॥२२॥दर्शनेमाकृथाबुद्धिंराघवस्यवरानने।कास्यशक्तिरिहागंतुंअपिसीतेमनोर
थैः॥२३॥नशक्योवायुराकाशेपाशैर्बद्धुंमहाजवः।दीप्यमानस्यवाप्यग्नेर्ग्रहीतुंविमलांशिखां॥२४॥त्रयाणामपिलोकानांन ॥राम॥
नंतपश्यामिशोभने॥विक्रमेणनयेद्यस्त्वांमद्बाहुपरिपालितां॥२५॥लंकायांसुमहद्राज्यमिदंत्वमनुपालय।त्वत्प्रेष्यामद्विधाश्चैववैदे ॥६०॥

वाश्चापिसुरासुराः॥२६॥अभिषेकोदकक्लिन्नातुष्टाचरमयस्वमां॥दुष्कृतंयत्पुराकर्मवनवासेनतद्गतं॥२७॥यच्चतेसुकृतं
कर्मतस्येहफलमाप्नुहि॥इहसर्वाणिमाल्यानिदिव्यगंधानिमैथिलि॥२८॥भूषणानिचमुख्यानितानिसेवमयासह॥पुष्पकं
नामसुश्रोणिभ्रातुर्वैश्रवणस्यमे॥२९॥विमानंसूर्यसंकाशंतरसानिर्जितंमया॥विशालंरमणीयंचतद्विमानंमनोजवं॥३०॥
तत्रसीतेमयासार्द्धंविहरस्वयथासुखं॥वदनंपद्मसंकाशंविमलंचारुदर्शनं॥३१॥शोकार्त्तंतुवरारोहेनभ्राजतिवरानने॥ए
वंवदतितस्मिन्सावस्त्रांतेनवरांगना॥३२॥पिधायेंदुनिभंसीतामुखमश्रूण्यवर्त्तयत्॥ध्यायंतींतामिवास्वस्थांदीनचिंतां
हतप्रभां॥३३॥उवाचवचनंसीतांरावणोरजनीचरः॥अलंव्रीडेनवैदेहिधर्मपेलोकृतेनते॥३४॥आर्त्तोयंदैवनिष्पंदोयस्त्वा
मभिगमिष्यति॥एतौपादौमयास्निग्धौशिरोभिःपरिपीडितौ॥३५॥प्रसादंकुरुमे क्षिप्रंवश्योदासोहमस्मिते॥नेमाःशून्या
मयावाचःशुष्यमाणेनभाषिताः॥३६॥नचापिरावणःकांचित्मूर्ध्नास्त्रींप्रणमेतह॥एवमुक्त्वादशग्रीवोमैथिलींजनकात्मजां
॥कृतांतवशमापन्नोममेयमितिमन्यते॥३७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेपंचपंचाशःसर्गः॥५५॥सातथोक्ता
तुवैदेहीनिर्भयाशोककर्षिता॥तृणमंतरतःकृत्वारावणंप्रत्यभाषत॥१॥राजादशरथोनामधर्मसेतुरिवाचलः॥सत्यसंधःपरि
ज्ञातोयस्यपुत्रःसराघवः॥२॥रामोनामसधर्मात्मात्रिषुलोकेषुविश्रुतः॥दीर्घबाहुर्विशालाक्षोदैवतंसपतिर्मम॥३॥इक्ष्वाकूणां

।।रा०आ० कुलेजातःसिंहस्कंधोमहाद्युतिः।लक्ष्मणेनसहभ्रात्रायस्तेप्राणान्वधिष्यति।४।प्रत्यसंयद्यहंतस्यत्वयास्याद्धर्षितावला
।।६१।। त्।।शयितात्वंहतःसंख्येजनस्थानेयथाखरः।५।यएतेराक्षसाःप्रोक्ताघोररूपामहाबलाः।राघवेनिर्विषाःसर्वेसुपर्णेप
न्नगायथा।६।तस्याज्याविप्रमुक्तास्तेशराःकांचनभूषणाः।शरीरंविधमिष्यंतिगंगाकूलमिवोर्मयः।।७।असुरैर्वासुरैर्वात्वंय
द्यवध्योसिरावण।उत्पाद्यसुमहद्वैरंजीवंस्तस्यनमोक्ष्यसे।८।सतेजीवितशेषस्यराघवोंऽतकरोबली।पशोर्यूपगतस्येव
जीवितंतवदुर्लभं।।९।यदिपश्येत्सरामस्त्वांरोषदीप्तेनचक्षुषा।रक्षस्त्वमद्यनिर्दग्धोगच्छेःसद्यःपराभवं।।१०।यश्चंद्रंनभ
सोभूमौपातयेन्नाशयेतवा।सागरंशोषयेद्वापिससीतांमोचयेदिह।११।गतासुस्त्वंगतश्रीकोगतसत्वोजितेंद्रियः।लंक
वैधव्यसंयुक्तात्वत्कृतेनभविष्यति।।१२।नतेपापमिदंकर्मसुखोदर्कंभविष्यति।याहंनीताविनाभावंपतिपार्श्वात्त्वयाव
नात्।।१३।सहिदेवरसंयुक्तोममभर्त्तामहाद्युतिः।निर्भयोवीर्यमाश्रित्यशून्येवसतिदंडके।१४।सतेवीर्यंबलंदर्पमुत्सेकंचत
थाविधं।।अपनेष्यतिगात्रेभ्यःशरवर्षेणसंयुगे।।१५।यदाविनाशोभूतानांदृश्यतेकालचोदितः।।तदाकार्येप्रमाद्यंतिनराःका
लवशंगताः।।१६।मांप्रधृष्यसतेकालःप्राप्तोऽयंराक्षसाधम।।आत्मनोराक्षसानांचवधायांतःपुरस्यच।।१७।नशक्यायज्ञम ।।राम।।
ध्यस्थावेदीस्रुग्भांडमंडिता।द्विजातिमंत्रसंपूताचंडालेनावमर्द्दितुं।।१८।यथाहंधर्मनित्यस्यधर्मपत्नीदृढव्रता।।त्वयास्प्रष्टुंन ।।६१।।

शक्यास्मिराक्षसाधमपापिना॥१९॥क्रीडंतीराजहंसेनपद्मखंडेषुनित्यशः।हंसीसातृणमध्यस्थंकथंद्रक्ष्येतमद्गुकं॥२०॥इदं
शरीरंनिःसंज्ञंबंधवाघातयस्ववा॥नेदंशरीरंरक्ष्यंमेजीवितंचापिराक्षस॥२१॥नतुशक्ष्याम्यपक्रोशंपृथिव्यांदातुमात्मनः।ए
वमुक्त्वातुवैदेहीक्रोधात्सपरुषंवचः॥२२॥रावणंमैथिलीतत्रपुनर्नोवाचकिंचन।सीतायावचनंश्रुत्वापरुषंरोमहर्षणं॥
२३॥प्रत्युवाचततःसीतांभयसंदर्शनंवचः॥शृणुमैथिलिमद्वाक्यंमासान्द्वादशभामिनि॥२४॥कालेनानेननाभ्येषियदिमां
चारुहासिनि।ततस्त्वांप्रातराशार्थंसूदाःछेत्स्यंतिलेशशः॥२५॥इत्युक्त्वापरुषंवाक्यंरावणःशत्रुरावणः।राक्षसीश्चत
तःक्रुद्धइदंवचनमब्रवीत॥२६॥शीघ्रमेवहिराक्षस्योविरूपाघोरदर्शनाः।दर्पमस्यापनेष्यंतुमांसशोणितभोजनाः॥२७॥वचना
देवतास्तस्यविकृताघोरदर्शनाः।कृतप्रांजलयोभूत्वाजानकींपर्यवारयन्॥२८॥सताःप्रोवाचराजातुरावणोघोरदर्शनः।प्रचा
र्यचरणोत्कर्षैर्दारयन्निवमेदिनीं॥२९॥अशोकवनिकामध्येमैथिलीनियतामिति।तत्रेयंरक्ष्यतांगूढंयुष्माभिःपरिवारिता
३०॥तत्रैनांतर्जनैर्घोरैःपुनःसांत्वैश्चमैथिलीं॥आनयध्वंहिविवशांवन्यांगजवधूमिव॥३१॥इतिःप्रतिसमादिष्टाराक्षस्योरा
वणेनताः॥अशोकवनिकांजग्मुर्मैथिलींपरिगृह्यताः॥३२॥सर्वकामफलैर्वृक्षैर्नानापुष्पफलैर्वृतां।सर्वकालमदैश्चापिद्वि
जैःसमुपसेवितां॥३३॥सातुशोकपरीतांगीमैथिलीजनकात्मजा।राक्षसीवशमापन्नाव्याघ्रीणांहरिणीयथा॥३४॥शोकेनमह

॥रा०आ० नात्रस्तामैथिलीजनकात्मजा॥नशर्मलभतेभीरुःपाशवद्धामृगीयथा॥२५॥नविंदतेतत्रतुशर्ममैथिलीविरुपनेत्राभिरतीवत
॥६२॥ र्जिता॥पतिंस्मरंतीदयितंसलक्ष्मणंविचेतनाभू[illegible]द्भयशोकपीडिता॥२६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेषट्पं
चाशःसर्गः॥५६॥राक्षसंमृगरूपेणचरंतंकामरूपिणं।निहत्यरामोमारीचंतूर्णंपथिन्यवर्तत॥१॥तस्यसंत्वरमाणस्यद्रष्टुका
मस्यमैथिलीं॥क्रूरस्वरोथगोमायुर्विननादास्यपृष्ठतः॥२॥तस्यस्वरमथालक्ष्यदारुणंरोमहर्षणं।रामःप्रोवाचगोमायोःस्वरेण
परिशंकितः॥३॥अशुभंवतमन्येहंगोमायुर्वाश्यतेयथा॥स्वस्तिस्यादथवैदेह्याराक्षसैर्भक्षणंविना॥४॥मारीचेनतुविज्ञायस्व
रमालक्ष्यमामकं॥विक्रुष्टंमृगरूपेणलक्ष्मणःशृणुयाद्यदि॥५॥ससौमित्रिःस्वरंश्रुत्वातांचहित्वाथमैथिलीं।तयैवप्रहितःक्षि
प्रंमत्सकाशमिहेष्यति॥६॥राक्षसैःसहितैर्नूनंसीतायाइप्सितोवधः।कांचनश्चमृगोभूत्वाव्यपनीयाश्रमात्तुमां॥७॥दूरंनीत्वातु
मारीचोराक्षसोभूच्छराहतः।हालक्ष्मणहतोस्मीतियद्वाक्यमाजहारह।८॥अपिस्वस्तिभवेताभ्यांरहिताभ्यांमयावने।जन
स्याननिमित्तंहिकृतवैरोस्मिराक्षसैः।९॥निमित्तानिचघोराणिदृश्यंतेद्यबहूनिच॥इत्येवंचिंतयन्रामःश्रुत्वागोमायुनिस्व
नं।१०।निवर्तमानस्त्वरितोजगामाश्रममात्मवान्॥आत्मनश्चापनयनंमृगरूपेणराक्षसा।११॥आजगामजनस्थानंराघवः॥ ॥राम॥
परिशंकितः नंदीनमनसंदीनमासेदुर्मृगपक्षिणः।१२।सव्यंकृत्वामहात्मानंघोरांश्चससृजुःस्वनान्॥तानिदृष्ट्वानिमित्तानि ॥६२॥

महाघोराणिराघवः॥१३॥ततोलक्ष्मणमायांतंददर्शविगतप्रभं॥ततोविदूरेरामेणसमीयायसलक्ष्मणः॥१४॥विषण्णासुविषण्णे
नदुःखितोदुःखभागिना॥संजगर्हेऽथतंभ्राताहृष्टालक्ष्मणमागतं॥१५॥विहायसीतांविजनेवनेराक्षससेविते॥गृहीत्वाचक
रंसव्यंलक्ष्मणंरघुनंदनः॥१६॥उवाचमधुरोदर्कमिदंपरुषमार्त्तवत्॥अहोलक्ष्मणगर्ह्यंतेकृतंयत्तुविहायतां॥१७॥सीता
मिहागतःसौम्यकच्चित्स्वस्तिभवेदिति॥नमेस्तिसंशयोवीरसर्वथाजनकात्मजा॥१८॥विनष्टाभक्षितावापिराक्षसैर्वनचारि
भिः॥अशुभान्येवभूयिष्ठंयथाप्रादुर्भवंतिमे॥१९॥अपिलक्ष्मणसीतायाःसान्निध्यंप्राप्नुयामहे॥जीवंत्यापुरुषव्याघ्रसुतायाज
नकस्यवै॥२०॥यथावैमृगसंघाश्चगोमायुश्चाथभैरवं॥वाश्यंतेशकुनाश्चापिप्रदीप्तामभितोदिशं॥२१॥अपिस्वस्तिभवेदस्या
राजपुत्र्यामहाबलइदंहिरक्षोमृगसन्निकाशंप्रलोभ्यमांदूरमनुप्रयातं॥२२॥हतंकथंचिन्महताश्रमेणसराक्षसोभून्म्रि
यमाणएव॥मनश्चमेदीनमिहाप्रहृष्टंचक्षुश्चसव्यंकुरुतेविकारं॥२३॥असंशयंलक्ष्मणनास्तिसीताहृतामृतावापथिवर्त्त
तेवा॥२४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेसप्तपंचाशःसर्गः॥५७॥सदृष्ट्वालक्ष्मणंदीनंशून्येदशरथात्मजः॥पर्य
पृच्छतधर्मात्मावैदेहीमागतंविना॥१॥प्रस्थितंदंडकारण्यंयामामनुजगाम्ह॥क्वसालक्ष्मणवैदेहीयांहित्वात्वमिहागतः॥२॥
राज्यभ्रष्टस्यदीनस्यदंडकान्परिधावतः॥क्वसादुःखसहायामेवैदेहीतनुमध्यमा॥३॥यांविनानोत्सहेवीरमुहूर्त्तमपिजीवि

तुं॥ क्व सा प्राणसहाया मे सीता सुरसुतोपमा॥४॥ पतित्वममराणां च पृथिव्याश्चापि लक्ष्मण। विना तां तपनीयाभां नेच्छेयं जनकात्मजां॥
५॥ कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम। कच्चित्प्रव्राजनं सौम्य न मे मिथ्या भविष्यति॥६॥ सीतानिमित्तं सौमित्रे मृते मयि गते
त्वयि॥ कच्चित्सकामा कैकेयी सुखिता सा भविष्यति॥७॥ तां पुत्रराज्यसिद्धार्था मृतपुत्रा तपस्विनी॥ उपस्थास्यति कौशल्या कच्चि
त्सौम्य न कैकेयीं॥८॥ यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः। सुवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण॥९॥ यदि मामाश्रम
गतं वैदेही नाभिभाषते। पुनः प्रहसिता सीता विनशिष्यामि लक्ष्मण॥१०॥ ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न वा। त्वयि प्रमत्ते
रक्षोभिर्भक्षिता वा तपस्विनी॥११॥ सुकुमारी च बाला च नित्यं वासुखदर्शिनी। मद्वियोगेन वैदेही व्यक्तं शोचति दुर्मनाः॥१२॥ सर्व
था रक्षसा तेन जिह्मेन सुदुरात्मना। वदता लक्ष्मणेत्युच्चैस्तवापि जनितं भयं॥१३॥ श्रुतश्च शंके वैदेह्या स स्वरः सदृशो मम। त्रस्त
या प्रेषितस्त्वं च द्रष्टुं मां शीघ्रमागतः॥१४॥ सर्वथा तु कृतं कष्टं सीतामुत्सृज्यता वने। प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरं॥१५॥ दुः
खिताः खरघातेन राक्षसाः पिशिताशनाः। तैः सीता निहता घोरैर्भविष्यति न संशयः॥१६॥ अहोस्मि व्यसने मग्नः सर्वथा रिपुना
शन॥ किं त्विदानीं करिष्यामि शंके प्राप्तव्यमीदृशं॥१७॥ इति सीतां वरारोहां चिंतयन्नेव राघवः। आजगाम जनस्थानं त्वरया सहल
क्ष्मणः॥१८॥ विगर्हमाणोनुजमार्तरूपं क्षुधाश्रमाच्चैव पिपासया च॥ विनिश्वसन् शुष्कमुखो विषण्णः प्रतिश्रयं प्राप्य समीक्ष्य शू

न्यं ॥१९॥ स्वमाश्रमं संप्रविगाह्य वीरो विहारदेशाननुसृत्य कांश्चित्। एतत्तदित्येव निवासभूमौ प्रहृष्टरोमा व्यथितो बभूव ॥२०॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे अष्टपंचाशः सर्गः ५८ ॥ तथाश्रमादुपावृत्तमंतरा रघुनंदनः। परिपप्रच्छ सौमि
त्रिं रामो दुःखार्दितं पुनः ॥१॥ तमुवाच किमर्थं त्वमागतोपास्य मैथिलीं। यदा सा तव विश्वासाद्वने विरहिता मया ॥२॥ दृष्ट्वैवा
भ्यागतं त्वां मे मैथिलीं त्यज्य लक्ष्मण। शंकमानं महत्पापं यत्सत्यं व्यथितं मनः ॥३॥ स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे। दृष्ट्वा
लक्ष्मण दूरे त्वां तया विरहितं पथि ॥४॥ एवमुक्तस्तु सौमित्रिर्लक्ष्मणः शुभलक्षणः। भूयो दुःखसमाविष्टो दुःखितं राममब्रवी
त् ॥५॥ न स्वयं कामकारेण तां त्यक्त्वाहमिहागतः। प्रचोदितस्तयैवोग्रैस्त्वत्सकाशमिहागतः ॥६॥ आर्येणेव परा क्रुष्टं हा सीते ल
क्ष्मणेति च। परित्राहीति यद्वाक्यं वैदेह्यास्तच्छ्रुतिं गतं ॥७॥ सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली। गच्छ गच्छेति मामाह रुदंती भ
यविक्लवा ॥८॥ प्रचोद्यमानेन मया गच्छेति बहुशस्तया। प्रत्युक्ता मैथिली वाक्यमिदं तत्प्रत्ययान्वितं ॥९॥ न तत्पश्याम्यहं रक्षो य
दस्य भयमावहेत्। निर्वृत्ता भव नास्त्येतत्केनाप्येवमुदाहृतं ॥१०॥ विगर्हितं च नीचं च कथमार्योभिधास्यति। त्राहीति वचनं सीते य
स्त्रायेत्त्रिदशानपि ॥११॥ किंनिमित्तं तु केनापि भ्रातुरालंब्य मे स्वरं। राक्षसेनेरितं वाक्यं लक्ष्मण त्राहि मामिति ॥१२॥ राक्षसेनेरि
तं वाक्यं त्रासात्त्राहीति शोभने। न भवत्या व्यथा कार्या कुनारीजनसेविता ॥१३॥ अलं विक्लवमालंब्य स्वस्था भव निरुत्सुका ॥१४॥ न चा

 स्तित्रिषुलोकेषुपुमान्योराघवंरणे।जातोवाजायमानोवासंयुगेयःपराजयेत्॥१४॥अजेयोराघवोयुद्धेदेवैःशक्रपुरोगमैः॥एव
 मुक्तातुवैदेहीपरिमोहितचेतना॥१५॥उवाचाश्रूणिमुंचंतीदारुणंमामिदंवचः।भावोमयितवात्यर्थंपापाचारनिवेशितः॥१६॥
विनाशंभ्रातरिप्राप्तेनचत्वंमामवाप्स्यसे।संकेताद्भरतेनत्वंरामंसमनुगच्छसि॥१७॥क्रोशंतंहियथात्यर्थंनैनमभ्यवपद्यसे॥
रिपुःप्रच्छन्नचारीत्वंमदर्थमनुगच्छसि॥१८॥राघवस्यांतरंप्रेप्सुस्तथैनंनाभिपद्यसे॥एवमुक्तोहिवैदेह्यासंरब्धोरक्तलोचनः
॥१९॥क्रोधात्प्रस्फुरमाणोष्ठआश्रमादभिनिर्गतः।एवंब्रुवाणंसौमित्रिंरामःसंतापमोहितः॥२०॥अब्रवीद्दुष्कृतंसौम्यतांविनायत्व
मागतः।जानन्नपिसमर्थंमांरक्षसांविनिवारणे॥२१॥अनेनक्रोधवाक्येनमैथिल्यानिर्गतोभवान्॥नहितेपरितुष्यामित्यक्त्वा
यद्यपिमैथिलीं॥२२॥क्रुद्धायाःपरुषंश्रुत्वास्त्रियायत्त्वमिहागतः।सर्वथात्वविनीतंतेसीतयायत्प्रचोदितः॥२३॥क्रोधस्यवशमाग
म्यनाकरोःशासनंमम॥असौहिराक्षसःशेतेशरेणाभिहतोमया॥२४॥मृगरूपेणयेनाहमाश्रमादपवाहितः॥विकृष्यचापंपरि
धायसायकंसलीलबाणेनचताडितोमया।मार्गंतनुंत्यज्यचविक्लवस्वरोबभूवकेयूरधरःसराक्षसः॥२५॥शराहतेनैवत
दार्तयागिरास्वरंममालंब्यसुदूरसुश्रवं॥उदाहृतंतद्वचनंसुदारुणंत्वमागतोयेनविहायमैथिलीं॥२६॥इत्यार्षेश्रीरामायणे 
वाल्मीकीयेआरण्यकांडेएकोनषष्टितमःसर्गः॥५९॥भृशमाव्रजमानस्यतस्याथोवामलोचनं॥प्रस्फुरच्चास्खलद्रामोवेपथु 

स्वास्यजायत॥१॥ उपलक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः। अपि क्षेमं तु सीताया आजहार पुनः पुनः॥२॥ त्वरमाणो जगामाथ सीता
दर्शनलालसः। शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः॥३॥ उद्भ्रमन्निव वेगेन विक्षिपन् रघुनंदनः। तत्र तत्र जनस्थानमभिवी
क्ष्य समंततः॥४॥ ददर्श पर्णशालां च सीतया रहितां तदा। श्रिया विरहितां ध्वस्तां हेमंते पद्मिनीमिव॥५॥ रुदंतमिव वृक्षैश्च म्ला
नपुष्पमृगद्विजं। श्रिया विहीनं विध्वस्तं संत्यक्तं वनदेवतैः॥६॥ विप्रकीर्णाजिनकुशमपविद्धबृसीकटं। दृष्ट्वा शून्योटजस्था
नं विललाप पुनः पुनः॥७॥ हृता मृता विनष्टा वा भक्षिता वा भविष्यति। निलीनाप्यथवा भीरु रथवा वनमाश्रिता॥८॥ गता विचेतुं
पुष्पाणि फलान्यपि च वा पुनः। अथवा पद्मिनीं याता जलार्थं वा नदीं गता॥९॥ यत्नान्मृगयमाणस्तु नाससाद वने प्रियां। शोक
रक्तेक्षणः श्रीमानुन्मत्त इव लक्ष्यते॥१०॥ वृक्षाद्वृक्षं प्रधावन् सः गिरेर्गिरिं नदान्नदं। बभ्राम विपिने दीनः शोकपंकार्णवप्लुतः॥
११॥ अस्ति कच्चित्त्वया दृष्टा सा कदंब वनप्रिया। कदंब यदि जानीषे शंस सीतां शुभाननां॥१२॥ स्निग्धपल्लवसंकाशां पीतकौ
शेयवासिनीं। शंसस्व यदि वा दृष्टा बिल्व बिल्वोपमस्तनी॥१३॥ अथवार्जुन शंसस्व प्रियां तामर्जुनप्रियां। जनकस्य सुता भीरुर्य
दि जीवति वा न वा॥१४॥ ककुभः करभोरूं तां व्यक्तं जानाति मैथिलीं। लतापल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः॥१५॥ भ्रमरैरुपगी
तश्च तथा द्रुमवरो ह्यसि। एष व्यक्तं विजानाति तिलकस्तिलकप्रियां॥१६॥ अशोक शोकापनुद शोकोपहतचेतसं। त्वं नामानं कुरु

॥रा० आ०॥ क्षिप्तंप्रियासंदर्शनाद्धिमाम्॥१७॥यदितालस्त्वयादृष्टापक्वतालफलस्तनी।कथयस्ववरारोहांकारुण्यंयदितेमयि॥१८॥यदिदृष्टा
॥६५॥ त्वयाजंबोजांबूनदसमप्रभा।प्रियांयदिविजानीषेनिःशंकंकथयस्वमे॥१९॥अहोत्वंकर्णिकाराद्यसुपुष्पैःशोभसेभृशं।कर्णिका
रप्रियांसाध्वींशंसदृष्टाप्रियायदि॥२०॥चूतनीपमहासालान्पनसान्कुरवांस्तथा।दाडिमानसनान्गत्वादृष्ट्वारामोमहाब
ल॥२१॥बकुलानथपुन्नागान्चंपकान्केतकांस्तथा॥पृच्छन्रामोवनेभ्रांतउन्मत्तइवलक्ष्यते॥२२॥अथवामृगशावाक्षींमृग
जानासिमैथिलीं।मृगविप्रेक्षणाकांतामृगीभिःसहिताभवेत्॥२३॥गजसागजनासोरुर्यदिदृष्टात्वयाभवेत्।तांमन्येविदितांतुभ्यं
आख्याहिवरवारण॥२४॥शार्दूलयदिसादृष्टाप्रियाचंद्रसमानना।मैथिलीममविस्रब्धःकथयस्वनतेभयं॥२५॥किंधावसिप्रि
येनूनंदृष्टासिकमलेक्षणे।वृक्षैराच्छाद्यचात्मानंकिंमांनप्रतिभाषसे॥२६॥तिष्ठतिष्ठवरारोहेनतेस्तिकरुणामयि।नात्यर्थंहास्य
शीलासिकिमर्थंमामुपेक्षसे॥२७॥पीतकौशेयकेनासिसूचितावरवर्णिनि।धावंत्यपिमयादृष्टातिष्ठयद्यस्तिसौहृदं॥२८॥नैव
सानूनमथवाहिंसिताचारुहासिनि।कृच्छ्रंप्राप्तंहिमांनूनंयतोपेक्षितुमर्हति॥२९॥व्यक्तंसाभक्षिताबालाराक्षसैःपिशिताशनैः
विभज्यांगानिसर्वाणिमयाविरहिताप्रिया॥३०॥नूनंतच्छुभदंतोष्ठंसुनासंशुभकुंडलं।पूर्णचंद्रनिभंग्रस्तंमुखंनिष्प्रभतांगतं॥३१॥सा ॥राम॥
हिचंपकवर्णाभाग्रीवाग्रैवेयशोभिता।कोमलाविलपंत्यास्तुकांतायाभक्षिताशुभा॥३२॥नूनंविक्षिप्यमाणौतौबाहूपल्लवकोमलौ ॥६५॥

भक्षितौवेपमानाग्रेसहस्ताभरणोगतौ॥३३॥मयाविरहितावालाभक्षितावद्रुवांधवा।हालक्ष्मणमहावाहोपश्यसेत्वंप्रियांक्व
चित्॥३४॥हाप्रियेक्वगताभद्रेहासीतेतिपुनःपुनः।इत्येवंविलपन्रामःपरिधावन्वनाद्वनं॥३५॥क्वचिदुद्भ्रमतेवेगात्क्वचिद्विभ्रम
तेवलात्॥क्वचिन्मत्तइवाभातिकांतान्वेषणतत्परः॥३६॥सवनानिनदीःशैलान्गिरिप्रस्रवणानिच॥काननानिचवेगेनभ्रमन्वि
परिसंस्थितः॥३७॥तथासगत्वाविपुलंमहद्वनंपरीत्यसर्वंत्वथमैथिलींप्रति॥अधिष्ठिताशःसचकारमार्गणेपुनःप्रियायाःपरमंप
रिश्रमं॥३८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेषष्टितमःसर्गः॥६०॥दृष्ट्वाश्रमपदंशून्यंरामोदशरथात्मजः।रहितांप
र्णशालांचप्रविद्धान्यासनानिच॥१॥अदृष्ट्वातत्रवैदेहींसंनिरीक्ष्यचसर्वतः।उवाचरामःप्राक्रुश्यप्रगृह्यरुचिरौभुजौ॥२॥क्वनुल
क्ष्मणवैदेहीक्ववादिशमितोगता॥केनाहृतावासौमित्रेकेनवाभक्षिताप्रिया॥३॥वृक्षेणावार्ययदिमांसीतेहसितुमिच्छसि।अलंते
हसितेनाद्यमांभजस्वसुदुःखितं॥४॥यैःसहक्रीडसेसीतेविश्वस्तैर्मृगपोतकैः।एतेहीनास्त्वयासीतेध्यायंत्यस्राविलेक्षणाः॥५॥सी
तयारहितोहंवैनहिजीवामिलक्ष्मण।वृतःशोकेनमहतासीताहरणजेनमां॥६॥परलोकेमहाराजोनूनंद्रक्ष्यतिमेपिता।कथंप्र
तिज्ञांसंश्रुत्यमयात्वमभियोजितः॥७॥अपूरयित्वातंकालंमत्सकाशमिहागतः।कामवृत्तमनार्यंमांमृषावादिनमेवच॥८॥धि
क्त्वामितिपरेलोकेव्यक्तंवक्ष्यतिमेपिता॥विवशंशोकसंतप्तंदीनंभग्नमनोरथं॥९॥मामिहोत्सृज्यकरुणंकीर्तिर्नरमिवानृजुं।क

गच्छसि वरारोहे मां नो त्सृज सुमध्यमे ॥१०॥ त्वया विरहिता श्चाहं मोक्ष्ये जीवितमात्मनः इत्येवं विलपन् रामः सीतादर्शनलालसः ॥११॥
न ददर्श सुदुःखार्त्तो राघवो जनकात्मजां ॥ अनासादयमानं तं सीतां दशरथात्मजं ॥१२॥ पंकमासाद्य विपुलं सीदंतमिव कुंजरं ॥ ल
क्ष्मणो राममत्यर्थमुवाच हितकाम्यया ॥१३॥ मा विषादं महाबाहो कुरु यत्नं मया सह ॥ इदं गिरिवनं वीर बहुकंदरशोभितं ॥१४॥
प्रियकाननसंचारा वनोन्मत्ता च मैथिली ॥ काननं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पितां ॥१५॥ सरितं वापि संप्राप्ता मीनवंजुलसे
वितां ॥ स्नातुकामा वलीना स्याद्धासकामा वने क्वचित् ॥१६॥ जिज्ञासमाना वैदेही त्वां मां च पुरुषर्षभ ॥ तस्यास्त्वन्वेषणे श्रीमन्क्षिप्र
मेव यतावहे ॥१७॥ वनं सर्वं विचिनुवो यत्र सा जनकात्मजा ॥ मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः ॥१८॥ एवमुक्तस्तु सौ
हार्दाल्लक्ष्मणेन समाहितः ॥ सह सौमित्रिणा रामो विचेतुमुपचक्रमे ॥१९॥ तौ वनानि गिरींश्चैव सरितश्च सरांसि च ॥ निखिले
न विचिन्वंतौ सीतां दशरथात्मजौ ॥२०॥ तस्य शैलस्य सानूनि गुहांश्च शिखराणि च ॥ निखिलेन विचिन्वंतौ नैव तामभिजग्मतुः
२१॥ विचिंत्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत् ॥ वनं सर्वं विचिनुतं पद्मिन्यः फुल्लपंकजाः ॥२२॥ गिरिश्चायं महाप्राज्ञ बहुकंदर
निर्झरः ॥ न हि पश्यामि वैदेहीं प्राणेभ्योपि गरीयसीं ॥२३॥ एवं स विलपन् रामः सीताहरणकर्षितः ॥ दीनः शोकसमाविष्टो मुहूर्त्तं वि
ह्वलोभवत् ॥२४॥ बहुशः स तु निश्वस्य रामो राजीवलोचनः ॥ हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥२५॥ स विह्वलितसर्वांगो

गतबुद्धिर्विचेतनः॥ विषसादातुरोदीनो निश्वस्याशीतमारुतं॥२६॥ तं सांत्वयामास ततो लक्ष्मणः प्रियबांधवः। बहुप्रकारं धर्मज्ञः
प्रश्रितः प्रश्रितांजलिः॥२७॥ अनादृत्य तु तद्वाक्यं लक्ष्मणोष्टपुटच्युतं॥ अपश्यंस्तां प्रियां सीतां प्राक्रोशत्स पुनः पुनः॥२८॥ इत्यार्षे
श्रीरामायणे वाल्मीकीये आरण्यकांडे एकषष्टितमः सर्गः॥६१॥ सीतामपश्यन्धर्मात्मा शोकोपहतचेतनः। विललाप महाबाहू रा
मः कमललोचनः। पश्यन्निव च तां सीतां अपश्यन्मदनार्दितः॥१॥ उवाच राघवो वाक्यं विलापाश्रयदुर्वचं। त्वमशोकस्य शाखा
भिः पुष्पप्रियतया प्रिये॥२॥ आवृणोषि शरीरं स्वं मम शोकविवर्द्धनी। कदलीस्कंधसदृशौ कदल्या संवृतावुभौ॥ ऊरू पश्या
मि ते देवि नासि शक्ता निगूहितुं॥ कर्णिकारवनं भद्रे हसंती देवि सेवसे॥४॥ अलं ते परिहासेन ममायासवहेन वै॥ विशेषेणा
श्रमस्थाने हासोयं न प्रशस्यते॥५॥ अवगच्छामि ते शीलं परिहासप्रियं प्रिये॥ आगच्छ त्वं विशालाक्षि शून्योयमुटजस्तव॥६॥ सुव्यक्तं
राक्षसैः सीता भक्षिता वा हृता पि वा। न हि सा विलपंतं मामुपसंप्रैति लक्ष्मण॥७॥ एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण॥ शं
संतीव हि वैदेहीं भक्षितां रजनीचरैः॥८॥ हा मम आर्ये क्व यातासि हा साध्वि वरवर्णिनि। हा सकामाद्य कैकेयी देवी साद्य भविष्य
ति॥९॥ सीतया सह निर्यातो विना सीतामुपागतः। कथं नाम प्रवेक्ष्यामि शून्यमंतःपुरं पुनः॥१०॥ निवीर्य इति लोकोयं निर्दयश्चे
ति वक्ष्यति। कातरत्वं प्रकाशं हि सीतापनयनेन मां॥११॥ निवृत्तवनवासश्च जनकं मिथिलाधिपं। कुशलं परिपृच्छंतं कथं शक्ष्ये नि

॥रा०आ०॥ री क्षितुं ॥२२॥ विदेहराजो नूनं मां दृष्ट्वा विरहितं तया। दुहितृस्नेहसंतप्तो मोहस्य वशमेष्यति ॥२३॥ अथवा न गमिष्यामि पुरीं भर
॥६७॥ तपालितां। स्वर्गोपि च तया हीनः शून्य एव मतो मम ॥२४॥ मामिहोत्सृज्य हि वने गच्छायोध्यां पुरीं शुभां। न त्वहं तां विना सीतां जीवे
यं हि कथंचन ॥२५॥ गाढमाश्लिष्य भरतो वाच्यो मद्वचनात्त्वया। अनुज्ञातोसि रामेण पालयेति वसुंधरां ॥२६॥ अंवा च मम कैके
यी सुमित्रा च त्वया विभो। कौसल्या च यथान्यायमभिवाद्या ममाज्ञया ॥२७॥ रक्षणीया प्रयत्नेन भवता युक्तकारिणा। सीतायाश्च
विनाशोयं मम चामित्रसूदन ॥२८॥ विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत् ॥२९॥ इति विलपति राघवे सुदीने वनमुपगम्य
तया विना सुकेश्या। भयविकलमुखस्तु लक्ष्मणोपि व्यथितमना भृशमातुरो वभूव ॥३०॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आ
रण्यकांडे द्विषष्टितमः सर्गः ॥६२॥ स राजपुत्रः प्रियया विहीनः शोकेन कामेन च पीड्यमानः। विषादयन् भ्रातरमार्त्तरूपो भू
यो विषादं प्रविवेश तीव्रं ॥१॥ स लक्ष्मणं शोकवशाभिपन्नं शोके निमग्नो विपुले हि रामः। उवाच वाक्यं व्यसनानुरूपमुष्णं वि
निश्वस्य रुदन् सशोकः ॥२॥ न मद्विधो दुष्कृतकर्मकारी मन्ये द्वितीयोस्ति वसुंधरायां। शोकानुशोको हि परंपराया मामेति भि
दन् हृदयं मनश्च ॥३॥ पूर्वं मया नूनमभीप्सितानि पापानि कर्माण्यसकृत्कृतानि। तत्रायमद्यापतितो विपाको दुःखेन दुःखं य ॥राम॥
दहं विशामि ॥४॥ राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशो जननीवियोगः। सर्वाणि मे लक्ष्मणशोकवेगमापूरयंति प्रविचिं ॥६७॥

तितानि ॥५॥ सर्वेतुदुःखंममलक्ष्मणेदंशातंशरीरेवनमेत्यशून्यं। सीतावियोगात्पुनरप्युदीर्णंकाष्ठैरिवाग्निःसहसाप्रदीप्तः॥६॥
सानूनमार्याममराक्षसेनवालाहृताखंसमुपेत्यभीरुः। अपस्वरंसुस्वरविप्रलापाभयेनविक्रंदितवत्यभीक्ष्णं॥७॥ हरिचंदन
स्यप्रियदर्शनस्यसदोचितावुत्तमचंदनस्य वृत्तौस्तनौशोणितपंकदिग्धौनूनंप्रियायाममनाथितायाः॥८॥ नतच्छ्लक्ष्णसुव्यक्त
मृदुप्रलापं। तस्यामुखंकुंचितकेशभारं। रक्षोवशंनूनमुपागतायानभ्राजतेराहुमुखेयथेंदुः॥९॥ मद्बाहुपाशस्यसदोचितां
तांग्रीवांप्रियायाममसुव्रतायाः। रक्षांसिनूनंपरिपीडयंतिशून्येहिभित्वारुधिराशनानि॥१०॥ मयाविहीनाविजनेवनेसा
रक्षोभिराहृत्यविकृष्यमाणा। नूनंविनादंकुररीवदीनासामुक्तवत्यायतकांतनेत्रा॥११॥ अस्मिन्मयासार्द्धमुदारशीलातलेपू
र्वमुपोपविष्टा। कांतस्मितालक्ष्मणजातहासामामाहसीतावहुवाक्यजातं॥१२॥ गोदावरीयंसरितांवरिष्ठाप्रियाप्रियाया
ममनित्यकालं। अप्यत्रगच्छेदितिचिंतयामि नैकाकिनीयातिहिसाकदाचित्॥१३॥ पद्माननापद्मपलाशनेत्रापद्मानिवाने
तुमभिप्रयाता। तदप्ययुक्तंनहिसाकदाचित्मयाविनागच्छतिपंकजानि॥१४॥ कामंत्विदंपुष्पितवृक्षखंडंनानाविधैःपक्षि
गणैरुपेतं। वनंप्रयातानुतदप्ययुक्तमेकाकिनीसातिविभेतिभीरुः॥१५॥ आदित्यभोलोककृताकृतज्ञलोकस्यसत्यानृतक
र्मसाक्षिन्। ममप्रियासाक्वगताहृतावाशंसस्वमेशोकवशस्यसत्यं॥१६॥ लोकेषुसर्वेषुनचास्तिकिंचिद्यत्तेननित्यंविदितं।

॥रा० आ०॥ भवेत्तत्॥शंसस्व वायो कुलशालिनीं तां हृता मृता वा पथि वर्तते वा॥१७॥ अतीव तं शोकविधेयदेहं रामं विसंज्ञं विलपंतमेवं॥ उवाच सौ
॥६८॥ मित्रिरदीनसत्वो न्याये स्थितः कालहितं च वाक्यं॥१८॥ शोकं च मुंचार्य धृतिं भजस्व सोत्साहता चास्तु विमार्गणे स्याः॥ उत्साहवंतो
हि नरा न लोके सीदंति कर्मस्वतिदुष्करेषु॥१९॥ इतीव सौमित्रिमुदग्रपौरुषं ब्रुवंतमार्तो रघुवंशवर्द्धनः॥ न चिंतयामास धृतिं वि
मुक्तवान् पुनश्च दुःखं महदभ्युपागतः॥२०॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे त्रिषष्ठितमः सर्गः॥६३॥ स दीनो दीन
या वाचा लक्ष्मणं वाक्यमब्रवीत्॥ शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीं॥१॥ अपि गोदावरीं सीता पद्मान्यानयितुं गता॥ एवमु
क्तस्तु रामेण लक्ष्मणः पुनरेव हि॥२॥ नदीं गोदावरीं रम्यां जगाम लघुविक्रमः॥ तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत्॥३॥ नैनां
पश्यामि तीर्थेषु क्रोशतो न शृणोति मे॥ कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी॥४॥ न हि तं वेद्मि वै राम यत्र सा तनुमध्यमा॥ लक्ष्म
णस्य वचः श्रुत्वा दीनः संतापमोहितः॥५॥ रामः समभिचक्राम स्वयं गोदावरीं नदीं॥ स तत्रैव स्थितो रामः क्व सीतेत्येवमब्रवीत्॥६॥ भूतानि
राक्षसेंद्रेण वधार्हेण हृतामपि॥ न तां शशंसू रामाय तथा गोदावरी नदी॥७॥ ततः प्रचोदिता भूतैः शंसास्मै तां प्रियामिति॥ न च साभ्यव
दत्सीतां पृष्टा रामेण शोचता॥८॥ रावणस्य च यद्रूपं कर्माणि च दुरात्मनः॥ ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस ह॥९॥ निराशस्तु तया ॥राम॥
नद्या सीताया दर्शने कृतः॥ उवाच रामः सौमित्रिं सीतादर्शनकर्षितः॥१०॥ एषा गोदावरी सौम्य किंचिन्न प्रतिभाषते॥ किं नु लक्ष्मण ॥६८॥

वक्ष्यामि सममेत्य जनकं वचः ॥११॥ मातरं चैव वैदेह्या विना तामहमप्रियं । यामे राज्यविहीनस्य वने वन्येन जीवतः सर्वं व्यपनयेच्छो
कं वैदेही नु सा गता ॥१२॥ ज्ञातिपक्षविहीनस्य राजपुत्रीमपश्यतः मन्ये दीर्घा भविष्यंति रात्रयो मम जाग्रतः ॥१३॥ मंदाकिनीं जनस्थान
मिमं प्रस्रवणं गिरिं । संहृष्टो विचरिष्यामि यदि सीता हि दृश्यते ॥१४॥ एते मृगा महावीर्या मामीक्षंते मुहुर्मुहुः ॥ वक्तुकामा इव हि मे इंगिता
न्युपलक्षये ॥१५॥ तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह । क्व सीतेति निरीक्षन्वै बाष्पसंरुद्धया दृशा ॥१६॥ एवमुक्ता नरेंद्रेण ते मृगाः स
हसोत्थिताः । दक्षिणाभिमुखाः सर्वे दर्शयंतो नभस्थलं ॥१७॥ मैथिली ह्रियमाणा सा दिशं यामन्वपद्यत । तेन मार्गेण धावंतो निरीक्षंते न
राधिपं ॥१८॥ येन मार्गं च भूमिं च निरीक्षंते स्म ते मृगाः पुनश्च मार्गमिच्छंतो लक्ष्मणेनोपलक्षिताः ॥१९॥ तेषां वचन सर्वस्वं लक्षयामा
स चेंगितं । उवाच लक्ष्मणो ज्येष्ठं धीमान्भ्रातरमग्रतः ॥२०॥ क्व सीतेति त्वया पृष्टा यथैते सहसोत्थिताः । दर्शयंति क्षितिं चैव दक्षिणां
च दिशं मृगाः ॥२१॥ धुंसा गच्छाव हे देव दिशमेतां च नैर्ऋतीं । यदि स्यादागमः कश्चिदार्या वा साथ लक्ष्यते ॥२२॥ बाढमित्येव काकुत्स्थः
प्रस्थितो दक्षिणां दिशं । लक्ष्मणानुचरः श्रीमान्वीक्षमाणो वसुंधरां ॥२३॥ एवं संभाषमाणौ तावन्योन्यं भ्रातरावुभौ । वसुंधरायां पतितं
पुष्पमार्गमपश्यतां ॥२४॥ तां पुष्पवृष्टिं पतितां दृष्ट्वा रामो महीतले । उवाच लक्ष्मणं रामो दुःखितो दुःखितं वचः ॥२५॥ अभिजानामि पु
ष्पाणि तानीमानीह लक्ष्मण । अपिनद्धानि वैदेह्या मया दत्तानि कानने ॥२६॥ मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी । अभिरक्षंति

॥रा०आ०॥ पुष्पाणि प्रकुर्वंतो मम प्रियं॥२७॥एवमुक्त्वा महाबाहुर्लक्ष्मणं पुरुषर्षभं।उवाच रामो धर्मात्मा गिरिं प्रस्रवणाभिधं॥२८॥कच्चित्क्षितिभृतां
॥६९॥ नाथ दृष्टा सर्वांगसुंदरी।रामा रम्ये वने तस्मिन्मया विरहिता त्वया॥२९॥क्रुद्धोब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा।तां हेमवर्णां सुमुखीं
सीतां दर्शय पर्वत॥३०॥यावत्सर्वाणि सानूनि न ते विध्वंसयाम्यहं।एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति।३१।शंसन्निव ततः सीतां
नादर्शयत राघवे।ततो दाशरथी रामः उवाच च शिलोच्चयं॥३२॥मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यति।असेव्यस्त्वं ततश्चैव
निस्तृणद्रुमपल्लवः॥३३॥इमां वा सरितं चैव शोषयिष्यामि लक्ष्मण।यदि नाख्याति मे सीतामद्य चंद्रनिभाननां॥३४॥एवं स रुषि
तो रामो दिधक्षन्निव चक्षुषा।ददर्श भूमौ निःक्रांतं राक्षसस्य महत्पदं॥३५॥त्रस्ताया रामकांक्षिण्याः प्रधावंत्या इतस्ततः।राक्षसे
नुसृताया वैदेह्याश्च पदानि तु॥३६॥स समीक्ष्य परिक्रांतं सीताया राक्षसस्य च।भग्नं धनुश्च तूणीं च विकीर्णं बहुधा रथं॥३७
संभ्रांतहृदयो रामः शशंस भ्रातरं प्रियं।पश्य लक्ष्मण वैदेह्याः शीर्णाः कनकबिंदवः।३८।भूषणानां हि सौमित्रे माल्यानि विविधा
नि च।तप्तबिंदुनिकाशैश्च चित्रैः कनकबिंदुभिः॥३९॥आवृतं पश्य सौमित्रे सर्वतो धरणीतलं॥मन्ये लक्ष्मण वैदेही राक्षसैः कामरू
पिभिः॥४०॥भित्त्वा भित्त्वा विभक्तांगं भक्षिता वा भविष्यति।तस्या निमित्तं सीताया द्वयोर्विवदमानयोः।४१।बभूव युद्धं सौमित्रे घोरं ॥राम॥
राक्षसयोरिह॥मुक्तामणिविचित्रं च तपनीयविभूषणं॥४३॥धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः।राक्षसानामिदं वत्स पुरा ॥६९॥

णामथवापि॥४३॥तरुणादित्यसंकाशंवैडूर्यगुलिकाचितं।विशीर्णंपतितंभूमौकवचंकस्यकांचनं।छत्रंशतशलाकंचदिव्यमा
ल्योपशोभितं॥४४॥भग्नदंडमिदंकस्यभूमौसौम्यनिपातितं।कांचनोरश्छदाश्चेमेपिशाचवदनाःखराः॥४५॥भीमरूपामहाका
याःकस्यवानिहतारणे।दीप्तपावकसंकाशोद्युतिमान्समरध्वजः॥४६॥अपविद्धश्चभग्नश्चकस्यसांग्रामिकोरथः।रक्षेयोमा
त्रांविशिखास्तपनीयविभूषिताः॥४७॥कस्येमेविहतावाणाःप्रकीर्णाघोरकर्मणः।शरावरौशरैःपूर्णौविध्वस्तौपश्यलक्ष्मण॥
४८॥प्रतोदाभिशुहस्तोवैकस्यायंसारथिर्हतः।पदवीपुरुषस्येकाव्यक्तंकस्यापिरक्षसः॥४९॥वैरंशतगुणंपापैर्ममासीज्जी
वितांतकं॥सुघोरहृदयैःसौम्यराक्षसैःकामरूपिभिः॥५०॥हृतामृतावासीताहिभक्षितावातपस्विनी।नधर्मस्त्रायतेसी
तांह्रियमाणांमहावने॥५१॥भक्षितायांहिवैदेह्यांहृतायामपिलक्ष्मण।केहिलोकेप्रियंकर्तुंसक्ताःसौम्यमहेश्वराः॥५२॥कर्त्तार
मपिलोकानांशूरंकरुणवेदिनं।अज्ञानादवमन्येरन्सर्वभूतानिलक्ष्मण॥५३॥मृदुलोकहितेयुक्तंदांतंकरुणवेदिनं।निर्वी
र्यइतिमन्यंतेनूनंमांत्रिदशेश्वराः॥५४॥मांप्राप्यहिगुणोदोषःसंवृत्तःपश्यलक्ष्मण।अद्यैवसर्वभूतानांरक्षसामभवायच॥५५॥
संहृत्यैवशशिज्योत्स्नांमहान्सूर्यइवोदितः।संहृत्यैवगुणान्सर्वान्ममतेजःप्रकाशते॥५६॥नैवयक्षानगंधर्वानपिशाचानराक्ष
साः।किंनरावामनुष्यावासुखंप्राप्स्यंतिलक्ष्मण॥५७॥ममास्त्रवाणसंपूर्णमाकाशंपश्यलक्ष्मण।निःसंतापकरिष्यामित्यद्यत्रै

॥रा०आ०॥ लोकचारिणं ॥५८॥ सन्निरुद्धग्रहगणमावारितनिशाकरं ॥ विप्रनष्टानलमरुद्भास्करद्युतिसंवृतं ॥५९॥ विनिर्मथितशैलाग्रं शुष्य-
॥७०॥ माणजलाशयं ध्वस्तद्रुमलतागुल्मं विप्रनाशितसागरं ॥६०॥ त्रैलोक्यं तु करिष्यामि संयुक्तं कालधर्मणा ॥ न तां कुशलिनीं सी-
तां प्रदास्यति मे मेश्वराः ॥६१॥ अस्मिन्मुहूर्ते सौमित्रे मम द्रक्ष्यंति विक्रमं ॥ नाकाशमुत्पतिष्यंति सर्वभूतानि लक्ष्मण ॥६२॥ मम
चापगुणोन्मुक्तैर्बाणजालैर्निरंतरं ॥ मर्दितं मम नाराचैर्ध्वस्तभ्रान्तमृगद्विजं ॥६३॥ समाकुलममर्यादं जगत्पश्याद्य लक्ष्मण ॥
आकर्णपूर्णैरिषुभिर्जीवलोकं रासदं ॥६४॥ करिष्ये मैथिलीहेतोरपिशाचमराक्षसं ॥ मम रोषप्रयुक्तानां सायकानां बलं सुराः
॥६५॥ द्रक्ष्यंति ज्याविमुक्तानाममर्षाद्दूरपातिनां ॥ नैव देवा न दैतेया न पिशाचा न राक्षसाः ॥६६॥ भविष्यंति मम क्रोधात्त्रैलोक्ये
विप्रणाशिते ॥ देवदानवयक्षाणां लोका ये रक्षसामपि ॥६७॥ बहुधा निपतिष्यंति बाणौघैः शकलीकृताः ॥ निर्मर्यादानहं लो-
सा कान् करिष्ये मम सायकैः ॥६८॥ हृतां मृतां वा सौमित्रे न दास्यंति ममेश्वराः ॥ तथारूपां हि वैदेहीं न दास्यंति यदि प्रियां ॥६९॥ ना-
शयामि जगत्सर्वं त्रैलोक्यं सचराचरं ॥ यावद्दर्शनमस्या वै तापयामि च सायकैः ॥७०॥ इत्युक्त्वा रोषताम्राक्षो स्फुरमाणोष्ठसं-
पुटः ॥ वल्कलाजिनमाबध्य जटाभारमबंधयत् ॥७१॥ तस्य क्रुद्धस्य रामस्य तथाभूतस्य धीमतः ॥ त्रिपुरं जघ्नुषः पूर्वं रुद्रस्ये- ॥राम॥
व बभौ तनुः ॥ लक्ष्मणादथ चादाय रामो निःपीड्य कार्मुकं ॥ शरमादाय संदीप्तं घोरमाशीविषोपमं ॥ संदधे धनुषि श्रीमान् ॥७०॥

रामःपरपुरंजयः॥७३॥युगांताग्निरिवक्रुद्धइदंवचनमब्रवीत् यथाजरायथामृत्युर्यथाकालोयथाविधिः॥७४॥नित्यं
नप्रतिहन्यंतेसर्वभूतेषुलक्ष्मण॥तथाहंक्रोधसंयुक्तोननिवार्योस्म्यसंशयः॥७५॥पुरेवमेचारुदतीमनिंदितांदिशंतिसी
तांयदिनाद्यमैथिलीं॥सदेवगंधर्वमनुष्यपन्नगंजगत्सशैलंपरिवर्तयाम्यहं॥७६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआ
आरण्यकांडेचतुःषष्टितमःसर्गः॥६४॥तप्यमानंतथारामंसीताहरणकर्षितं॥लोकानामभवेयुक्तंस वर्तकमिवान
लं॥१॥वीक्षमाणंधनुःसज्यंनिश्वसंतंपुनःपुनः॥हंतुकामंपशुंरुद्रंक्रुद्धंदक्षक्रतौयथा॥२॥अदृष्टपूर्वंसंक्रुद्धंदृष्ट्वारामं
सलक्ष्मणः॥अब्रवीत्प्रांजलिर्वाक्यंमुखेनपरिशुष्यता॥३॥पुराभूत्वामृदुर्दांतःसर्वभूतहितेरतः॥नक्रोधवशमापन्नःप्रकृ।
तिंहातुमर्हसि॥४॥चंद्रेलक्ष्मीःप्रभासूर्येगतिर्वायौभुविक्षमा॥एतच्चनियतंसर्वंत्वयिचानुत्तमंयशः॥५॥एकस्यनापराधेनलो
कान्त्वंहंतुमर्हसि॥नतुजानामिकस्यायंभग्नःसांग्रामिकोरथः॥६॥केनवाकस्यवाहेतोःसायुधःसपरिच्छदः॥क्षुरनेमि
गतश्चायंसिक्तोरुधिरबिंदुभिः॥७॥देशोनिर्वृत्तसंग्रामःसुघोरःपार्थिवात्मज॥एकस्यतुविमर्दोयंनद्वयोर्वदतांवर॥८॥नहि
वृत्तंहिपश्यामिबलस्यमहतःपदं॥नैकस्यतुकृतेलोकान्विनाशयितुमर्हसि॥९॥युक्तदंडाहिमृदवःप्रशांतावसुधाधिपाः
सदात्वंसर्वभूतानांशरण्यःपरमागतिः॥१०॥कोनुदारप्रणाशंतेसाधुमन्येतराघव॥सरितःसागराःशैलादेवगंधर्वदानवाः

॥रा०आ० २१॥नालंतेविप्रियंकर्तुंदीक्षितस्येवसाधवः।येनराजन्हृतासीतातमन्वेष्टुंत्वमर्हसि॥२२॥मद्द्वितीयोधनुष्पाणिःसहायैःप
॥७१॥ रमर्षिभिः।समुद्रंचविचेष्यामःपर्वतांश्चवनानिच॥२३॥गुहाश्चविविधाघोराःनलिनीःपार्वतीश्चह।देवगंधर्वलोकांश्च
विचेष्यामःसमाहिताः॥२४॥यावन्नाधिगमिष्यामस्तवभार्यापहारिणं।नचेत्त्वांस्मात्प्रदास्यंतिपत्नींतेत्रिदशेश्वराः॥२५॥को
शलेंद्रततःपश्चात्‌वाणमोक्षंकरिष्यसि॥२६॥शीलेनसाम्नाविनयेनसीतांनयेनननप्राप्स्यसिचेन्नरेंद्र।ततःसमुत्सादयहे
मपुंखैर्महेंद्रवज्रप्रतिमैःशरौघैः॥२७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेपंचषष्टितमःसर्गः॥६५॥तंतथाशोक
संतप्तंपरिद्यूनमचेतसं।मोहेनमहताविष्टंविलपंतमनाथवत्॥१॥ततःसौमित्रिराश्वास्यमुहूर्तादिवलक्ष्मणः।रामंसंवोध
यामासचरणौचाभिपीडयन्॥२॥महतातपसारामममहताचापिकर्मणा।राज्ञादशरथेनासिलब्धोमृतमिवामरैः॥३॥तवचैवगुणै
र्वद्धस्त्वद्वियोगान्महीपतिः।राजादेवत्वमापन्नोभरतस्ययथाश्रुतं॥४॥आश्वासिहिनरश्रेष्ठप्राणिनःकस्यनापदः।संस्पृशंत्य
ग्निवद्राजन्क्षणेनव्यपयांतिच॥५॥यदिदुःखमिदंप्राप्तंकाकुत्स्थनसहिष्यसे।प्राकृतश्चाल्पसत्वश्चइतरःकःसहिष्यति॥६॥
दुःखितोहिभवान्लोकांस्तेजसायदिधक्ष्यते।आर्ताःप्रजानरव्याघ्रक्कनुयास्यंतिनिर्वृतिं॥७॥लोकस्वभावएवैषोययातिर्नहुषा ॥राम॥
त्मजः।गतःशक्रेणसालोक्यमनयस्तंसमस्पृशत्॥८॥महर्षिर्योवसिष्ठस्तुयःपितुर्नःपुरोहितः।अन्हापुत्रशतंजज्ञेतथैवास्यपु ॥७१॥

नर्हसि॥९॥याचेयंजगतोमातादेवीलोकनमस्कृता॥अस्याश्चचलनंभूमेर्दृश्यतेसत्यसंश्रव॥१०॥यौचेमौजगतांनेत्रेयत्रसर्वं
प्रतिष्ठितं॥आदित्यचंद्रौग्रहणमभ्युपेतौमहाबलौ॥११॥सुमहांत्यपिभूतानिदेवाश्चपुरुषर्षभ॥नदैवस्यप्रमुंचंतिसर्वभूतादि
देहिनः॥१२॥शक्रादिष्वपिदेवेषुवर्त्तमानौनयानयौ॥श्रूयतेनरशार्दूलनत्वंव्यथितुमर्हसि॥१३॥नष्टायामपिवैदेह्यांहृताय
मपिवानघ॥शोचितुंनार्हसेवीरयथान्यःप्राकृतस्तथा॥१४॥त्वद्विधानहिशोचंतिसततंसत्यदर्शिनः॥सुमहत्स्वपिकृच्छ्रेषुरा
मानिर्विस्मदर्शनाः॥१५॥तत्वतोहिनरश्रेष्ठबुद्ध्यासमनुचिंतय॥बुद्ध्यायुक्तामहात्मानोविजानंतिशुभाशुभं॥१६॥अदृष्टगुणदो
षाणामधृतानांचकर्मणां॥नान्तरेणक्रियातेषांफलमिष्टंचवर्त्तते॥१७॥त्वमेवहिपुरावीरत्वमनुशिष्यस्तिराघव॥अनुशिष्य
तिकोनुत्वामपिसाक्षाद्बृहस्पतिः॥१८॥बुद्धिश्चतेमहाप्राज्ञलोकैरैतैर्दुरन्वया॥शोकेनाभिप्रसुप्तंतेज्ञानंसंबोधयाम्यहं॥१९॥दिव्यं
चमानुषंचैवमात्मनश्चपराक्रमं॥इक्ष्वाकुवृषभावेक्ष्यतस्वद्विषतांवधे॥२०॥किंतेसर्वविनाशेनकृतेनपुरुषर्षभ॥तमेववत्वं
रिपुंपापंविज्ञायोद्धर्तुमर्हसि॥२१॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेषट्षष्टितमःसर्गः॥६६॥पूर्वजोप्युक्तमात्रस्तु
लक्ष्मणेनसुभाषितं॥सारग्राहीमहासारंप्रतिजग्राहराघवः॥१॥सनिगृह्यमहाबाहुःप्रवृद्धंक्रोधमात्मनः॥अवष्टभ्यधनुः
श्चित्रंरामोलक्ष्मणमब्रवीत्॥२॥किंकरिष्यामहेवत्सक्वगच्छावचलक्ष्मण॥केनोपायेनपश्येयंसीतामितिविचिंतयन्॥३॥तंतथापरि

॥रा॰आ॰ तापार्त्तंलक्ष्मणोराममब्रवीत्॥इदमेवजनस्थानंत्वमन्वेषितुमर्हसि॥४॥राक्षसैर्बहुभिःकीर्णंनानाद्रुमलतायुतं॥संतीहगिरिदुर्गा
॥७२॥ णिनिर्झराःकंदराणिच॥५॥गुहाश्चविविधाघोरानानामृगगणाकुलाः॥आवासाःकिन्नराणांचगंधर्वभवनानिच॥६॥तानियु
क्तोमयासार्द्धंसमन्वेषितुमर्हसि॥त्वद्विधाबुद्धिसंपन्नामहात्मानोनरर्षभाः॥७॥आपत्सुनप्रकंपंतेवायुवेगैरिवाचलाः॥इत्यु
क्तस्तद्वनंसर्वंविचचारसलक्ष्मणः॥८॥क्रुद्धोरामःशरंघोरंसंधायधनुषिक्षुरं॥ततःपर्वतकूटाभंमहाकायंद्विजोत्तमं॥९॥ददर्शप
तितंभूमौक्षतजार्द्रंजटायुषं॥तंदृष्ट्वागिरिशृंगाभंरामोलक्ष्मणमब्रवीत्॥१०॥अनेनकिलवैदेहीभक्षितानात्रसंशयः॥गृध्ररूपमि
दंव्यक्तंरक्षोभ्रमतिकाननं॥११॥भक्षयित्वाविशालाक्षीमास्तेसीतांयथासुखं॥एनंवधिष्येदीप्ताग्रैःशरैर्घोरैरजिह्मगैः॥१२॥इत्यु
क्त्वाभ्यपतद्गृध्रंसंधायधनुषिक्षुरं॥क्रुद्धोरामःसुसंभ्रांतश्चालयन्निवमेदिनीं॥१३॥तंदीनंदीनयावाचासफेनंरुधिरंवमन्॥
अभ्यभाषतपक्षीतुरामंदशरथात्मजं॥१४॥यामोषधीमिवायुष्मन्अन्वेषसिमहावने॥सादेवीममचप्राणारावणेनोभयं
हृतं॥१५॥त्वयाविरहितादेवीलक्ष्मणेनचराघव॥ह्रियमाणामयादृष्टारावणेनबलीयसा॥१६॥सीतामभ्यवपन्नोहंरावणश्च
रणेमया॥विध्वंसितरथछत्रःपतितोधरणीतले॥१७॥एतदस्यधनुर्भग्नमेतदस्यशरावरं॥अयमस्यरणेरामभग्नःसांग्रामिको ॥राम॥
रथः॥१८॥अयंतुसारथिस्तस्यमत्पक्षनिहतोयुधि॥परिश्रांतस्यमेपक्षौछित्वाखड्गेनरावणः॥१९॥सीतामादायवैदेहीमुत्स ॥७२॥

पातविहायसं।रक्षसानिहतंपूर्वंनमांहंतुंत्वमर्हसि॥२०॥रामस्तस्यतुविज्ञायसीतासक्तांकथांप्रियां।गृध्रराजंपरिष्वज्यपरि
त्यज्यमहद्धनु॥निपपातावशोभूमौरुरोदसहलक्ष्मणः॥२१॥एकमेकायनेगृध्रंनिश्वसंतंकथंचन।समीक्ष्यदुःखितोरामः
सौमित्रिमिदमब्रवीत्॥२२॥राज्यभ्रष्टंवनेवासःसीतानष्टामृतोद्विजः।ईदृशीयंममालक्ष्मीनिर्दहेदपिपावकं॥२३॥संपूर्ण
मपिचेदद्यप्रविशेयंमहोदधिं।सोपिनूनंममालक्ष्म्याविशुष्येत्सरितांपतिः॥२४॥नास्त्यभाग्यतरोलोकेमत्तोस्मिन्सचराचरे
येनेयंमहतीप्राप्तामयाव्यसनवागुरा॥२५॥अयंपितुर्वयस्योमेगृध्रराजोजरान्वितः।शेतेविनिहतोभूमौममभाग्यविपर्य
यात्॥२६॥इत्येवमुक्त्वाबहुशोराघवःसहलक्ष्मणः।जटायुषंचपस्पर्शपितृस्नेहंनिदर्शयन्॥२७॥निकृत्तपक्षंरुधिरावसि
क्तंतंगृध्रराजंपरिरभ्यरामः॥क्वमैथिलीप्राणसमागतेतिविमुच्यवाचंनिपपातभूमौ॥२८॥इत्यार्षेश्रीरामायणेवाल्मीकीये
आरण्यकांडेसप्तषष्टितमःसर्गः॥६७॥रामःप्रेक्ष्यतुतंगृध्रंभुविरौद्रेणपातितं।सौमित्रिंमित्रसंपन्नमिदंवचनमब्रवीत्॥१॥मम
यंनूनमर्थेषुयतमानोविहंगमः॥राक्षसेनहतःसंख्येप्राणांस्त्यजतिदुस्त्यजान्॥२॥अयमस्यशरीरेस्मिन्प्राणोलक्ष्मणदृश्य
ते।तथास्वरविहीनोयंविक्लवंसमुदैक्षत॥३॥जटायोयदिशक्नोषिवाक्यंव्याहरितुंपुनः।सीतामाख्याहिभद्रंतेवधमाख्याहिचात्म
नः॥४॥किंनिमित्तोहरत्सीतांरावणस्तस्यकिंमया।अपराधंतुयंदृष्ट्वारावणेनहृताप्रिया॥५॥कथंतच्चंद्रसंकाशंमुखमासीन्म

नोहरं।सीतयाकानिचोक्तानितस्मिन्कालेद्विजोत्तम॥६॥कथंवीर्यःकथंरूपःकिंकर्मासचराक्षसः।क्वचास्यभवनंतातब्रूहिमेपरि
पृच्छतः॥७॥तमुद्वीक्ष्याथधर्मात्माविलपंतमनाथवत्॥वाचातिसन्नयाराममिदंवचनमब्रवीत्॥८॥साहृताराक्षसेंद्रेणरावणे
नविहायसा।मायामास्थायविपुलांवातदुर्दिनसंकुलां॥९॥परिश्रांतस्यमेतातपक्षौछित्वानिशाचरः।सीतामादायवैदेहींप्र
यातोदक्षिणामुखः॥१०॥उपरुध्यंतिमेप्राणादृष्टिर्भ्रमतिराघव।पश्यामिवृक्षान्सौवर्णानुशीरकृतमूर्द्धजान्॥११॥येनयातिमुहू
र्तेनसीतामादायरावणः।विप्रनष्टंधनंक्षिप्रंतत्स्वामीप्रतिपद्यते॥१२॥विंदोनाममुहूर्तोसौसचकाकुत्स्थनाबुधत्॥झषवद्ब
डिशंगृह्यक्षिप्रमेवविनश्यति॥१३॥नचत्वयाव्यथाकार्याजनकस्यसुतांप्रति।वैदेह्यारंस्यसेक्षिप्रंहत्वातंरावणंरणे॥१४॥अ
संमूढस्यगृध्रस्यरामंप्रत्यनुभाषतः॥आस्यात्सुस्रावरुधिरंम्रियमाणस्यसामिषं॥१५॥पुत्रोविश्रवसःसाक्षाद्भ्रातावैश्रव
णस्यच॥इत्युक्त्वादुर्लभान्प्राणान्मुमोचपतगेश्वरः॥१६॥ब्रूहिब्रूहीतिरामस्यब्रुवाणस्यकृतांजलेः॥त्यक्त्वाशरीरंगृध्रस्यप्राणा
जग्मुर्विहायसं॥१७॥सनिक्षिप्यशिरोभूमौप्रसार्यचरणौतथा।विक्षिप्यचशरीरंस्वंपपातधरणीतले॥१८॥तंगृध्रंप्रेक्ष्यताम्राक्षं
गतासुमचलोपमं॥रामःसुबहुभिर्दुःखैर्दीनःसौमित्रिमब्रवीत्॥१९॥बहूनिरक्षसांवासेवर्षाणिवसतासुखं।अनेनदंडकारण्ये
विचीर्णमिवपक्षिणा॥२०॥अने कवार्षिकोयस्तुचिरकालसमुत्थितः।सोयमद्यहतःशेतेकालोहिदुरतिक्रमः॥२१॥पश्यल

क्ष्मण गृध्रोयमुपकारी हतश्च मे। सीतामभ्यवपन्नोयं रावणेन बलीयसा।।२२।। गृध्रराज्यं परित्यज्य पितृपैतामहं महत्।। मम हेतो
रयं प्राणान्मुमोच पतगेश्वरः।।२३।। सर्वत्र खलु दृश्यंते साधवो धर्मचारिणः।। शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि।।२४।। सीता
हरणजं दुःखं न मे सौम्य तथागतं।। यथा विनाशो गृध्रस्य मत्कृते च परंतप।।२५।। राजा दशरथः श्रीमान् यथा मम महायशाः।। पूज
नीयश्च मान्यश्च तथायं पतगेश्वरः।।२६।। सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकं।। गृध्रराजं दिधक्षामि मत्कृते निधनं गतं।।२७।।
नाथं पतगलोकस्य चितिमारोपयाम्यहं।। इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा।।२८।। या गतिर्यज्ञशीलानामाहिताग्नेश्च या ग
तिः।। अपरावर्त्तिनां या च या च भूमिप्रदायिनां।।२९।। मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्।। गृध्रराज महासत्व संस्कृतश्च
मया व्रज।।३०।। एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरं।। ददाह रामो धर्मात्मा स्वबंधुमिव दुःखितः।।३१।। रामोपि सह सौमित्रि
र्वनं यात्वा स वीर्यवान्।। स्थूलान्हत्वा महारोहाननुतस्तार तं द्विजं।।३२।। रोहिमांसानि चोद्धृत्य पेशीकृत्वा महायशाः।। शकुनाय
ददौ रामो रम्ये तहरितशाद्वले।।३३।। यत्तत्प्रेतस्य मर्त्यस्य कथयंति द्विजातयः।। तत्स्वर्गगमनं क्षिप्रं याम्यसूक्तं जजाप ह।।३४।। ततो
गोदावरीं गत्वा नदीं नरवरात्मजौ।। उदकं चक्रतुस्तस्मै गृध्रराजाय तावुभौ।।३५।। शास्त्रदृष्टेन विधिना जलं गृध्राय राघवौ।। स्नात्वा
तौ गृध्रराजाय उदकं चक्रतुस्तदा।।३६।। स गृध्रराजः कृतवान्यशस्करं सुदुष्करं कर्म रणे निपातितः। महर्षिकल्पेन च संस्कृ

तस्तदाजगामपुण्यांगतिमात्मनःशुभां॥३७॥कृतोदकौतावपिपक्षिसत्तमेस्थिरांचबुद्धिंप्रणिधायजग्मतुःप्रवेश्यसीताधिग
मेततोमनोवनंसुरेंद्राविवविष्णुवासवौ॥३८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेअष्टषष्टितमःसर्गः॥६८॥कृत्वैवमु
दकंतस्मैप्रस्थितौराघवौतदा॥अन्वेषंतौवनेसीतांजग्मतुःपश्चिमांदिशं॥१॥तौदिशंदक्षिणांगृत्यशरचापासिधारिणौ॥अ
विप्रहतमैक्ष्वाकौपंथानंप्रतिजग्मतुः॥२॥गुल्मैर्वृक्षैश्चबहुभिर्लताभिश्चप्रवेष्टितं॥आवृतंसर्वतोदुर्गंगहनंघोरदर्शनं॥३॥
अतिक्रम्यतुवेगेनगृहीत्वादक्षिणांदिशं॥सुभीमंतंमहारण्यंव्यतीयातौमहाबलौ॥४॥ततःपरंजनस्थानात्त्रिक्रोशंगम्यरा
घवौ॥क्रौंचारण्यंविविशतुर्गहनंतौमहौजसौ॥५॥नानामेघघनप्रख्यंप्रहृष्टमिवसर्वतः॥नानावर्णैःशुभैःपुष्पैर्मृगपक्षि
गणैर्युतं॥६॥दिदृक्षमाणौवैदेहींतद्वनंतौविचिक्यतुः॥तत्रतत्रावतिष्ठंतौसीताहरणदुःखितौ॥७॥ततःपूर्वेणतौगम्यत्रि
क्रोशंभ्रातरौतदा॥क्रौंचारण्यमतिक्रम्यमतंगाश्रममंतरा॥८॥दृष्ट्वाथतद्वनंघोरंबहुभीममृगद्विजं॥नानासत्वमृगाकी
र्णंसर्वंगहनपादपं॥९॥ददृशातेतुतौतत्रदरींदशरथात्मजौ॥पातालसमगंभीरांतमसानित्यसंवृतां॥१०॥आसाद्यचनरव्या
घ्रौदर्यास्तस्याविदूरतः॥ददृशतुर्महारूपांराक्षसींविकृताननां॥११॥भयदामल्पसत्वानांबीभत्सांरौद्रदर्शनां॥लंबोदरींतीक्ष्
ण्णदंष्ट्रांकरालींपरुषत्वचं॥१२॥भक्षयंतीमृगान्भीमान्विकटांमुक्तमूर्द्धजां॥प्रैक्षेतांतौततदातत्रभ्रातरौरामलक्ष्मणौ॥१३॥

सासमासाद्यतौवीरौव्रजंतंभ्रातुरग्रतः। एहिरंस्यावहेत्युक्त्वासमालंभतलक्ष्मणं॥१४॥ उवाचचैनंवचनंसौमित्रिमुपगृह्यसा
अहंत्वयोमुखीनामलाभस्तेत्वमसिप्रिय॥१५॥ नाथपर्वतदुर्गेषुनदीनांपुलिनेषुच॥ आयुश्चिरमिदंवीरत्वंमयासहरंस्य
से॥१६॥ एवमुक्तस्तुकुपितःखड्गमुद्धृत्यलक्ष्मणः॥ कर्णनासेस्तनौतस्यानिचकर्तारिमर्दनः॥१७॥ कर्णनासेनिकृत्तेतुविस्वरं
विननादसा। यथागतंप्रदुद्रावराक्षसीघोरदर्शना॥१८॥ तस्यांगतायांगहनंविशंतौवनमोजसा॥ आसेदतुरमित्रघ्नौभ्रातरौ
रामलक्ष्मणौ॥१९॥ लक्ष्मणस्तुमहातेजाःसत्यवान्शीलवान्शुचिः॥ अब्रवीत्प्रांजलिर्वाक्यंभ्रातरंदीप्ततेजसं॥२०॥ स्पंदतेमे
दृढंबाहुरुद्विग्नमिवमेमनः॥ प्रायशश्चाप्यनिष्टानिनिमित्तान्युपलक्षये॥२१॥ तस्मात्सज्जीभवार्यत्वंकुरुष्ववचनंहितं। ममैव
हिनिमित्तानिसद्यःशंसंतिसंभ्रमं॥२२॥ एषवंचुलकोनामपक्षीपरमदारुणः॥ आवयोर्विजयंयुद्धेशंसन्निवविनर्दति॥२३॥ त
योरन्विषतोरेवंसर्वंतद्वनमोजसा॥ संजज्ञेविपुलःशब्दःप्रभंजन्निवतद्वनं॥२४॥ संवेष्टितमिवात्यर्थंगहनंमातरिश्वना॥ वन
स्यतस्यशब्दोभूद्दिवमापूरयन्निव॥२५॥ तंशब्दंकांक्षमाणस्तुरामस्तस्थैमहानुजः॥ ददर्शसुमहाकायंराक्षसंविपुलोरसं॥२६॥
आसेदतुस्ततस्तत्रतावुभौप्रमुखेस्थितं॥ विवृद्धमशिरोग्रीवंकबंधमुदरेमुखं॥२७॥ रोमभिर्निशितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रि
तं॥ नीलमेघनिभंरौद्रंमेघस्तनितनिस्वनं॥२८॥ अग्निज्वालानिकाशेनललाटस्थेनदीप्यता महापक्ष्मेणपिंगेनविपुलेनायते

॥रा०आ० नचा॥२९॥एकेनोरसिघोरेणनयनेनसुदर्शिना।महादंष्ट्रोपपन्नेनलेलिहानंमहामुखं॥३०॥भक्षयंतंमहाघोरान्नृक्ष सिंहमृ
॥७५॥ द्विपान्॥घोरौभुजौविकुर्वाणमुभौयोजनमायतौ॥३१॥कराभ्यांविविधान्गृह्यऋक्षान्पक्षिगणान्मृगान्।आकर्षंतंविकर्षं
तमनेकान्मृगयूथपान्॥३२॥स्थितमावृत्यपंथानंतयोर्भ्रात्रोःप्रपन्नयोः।अथतत्समतिक्रम्यक्रोशमात्रंददृशतुः॥३३॥महां
तंदारुणंभीमंकबंधंभुजसंवृतं।कबंधमिवसंस्थानादतिघोरप्रदर्शनं॥३४॥समहाबाहुरत्यर्थंप्रसार्यविपुलौभुजौ॥जग्राह
सहितावेवराघवौपीडयन्बलात्॥३५॥खड्गिनौदृढधन्वानौतिग्मतेजौमहाभुजौ॥भ्रातरौविवशंप्राप्तौकृष्यमाणौमहाबलौ
॥३६॥तत्रधैर्याच्चशूरस्तुराघवोनैवविव्यथे।कस्मादनाश्रयत्वाच्चलक्ष्मणस्त्वभिविव्यथे॥उवाचसविषण्णःसन्राघवंराघवा
नुजः॥३७॥पश्यमांविवशंवीरराक्षसस्यवशंगतं॥मयैकेनविनिर्मुक्तःपरिमुंचस्वराघव॥३८॥मांहिभूतबलिंदत्वापलाय
स्वयथासुखं॥अधिगंतासिवैदेहीमचिरेणेतिमेमतिः॥प्रतिलभ्यचकाकुत्स्थपितृपैतामहींमहीं॥तत्रमांराममराज्यस्थःस्म
र्तुमर्हसिसर्वदा॥४०॥नहिमेत्वत्समोबंधुःकश्चनान्योविद्यते।नमातुश्चममास्त्रेयोविनाशश्चकथंचन॥४१॥विषीदत्यतिम
त्वंहिप्रियपुत्राहिसाभृशम्॥तंतुसंपन्नयावाचापरितापार्त्तमातुरं॥४२॥आश्वास्यहेतोर्वचनमिदमाहपरंतपः।पुत्रोदशर ॥राम॥
थस्यासिद्वितीयोममचानुजः॥४३॥सप्राहतद्वोदारःकथंनामविषीदसि।माषराशिमयःपापोरूपमात्रंहिभीषणं॥४४॥मा ॥७५॥

स्मत्रासंकथावीरनहित्वादृग्विषीदति ततःसगत्वानितद्रक्षःक्षुधयाभिप्रसंतदा॥४५॥महाजगरसंकाशौखरगोमभिराद्व॰
तौ॥तीक्ष्णरोमनखौवाहूपंचास्याविवपन्नगौ॥४६॥ताभ्यांतुकृष्यमाणौतुवाणपातमिवागतौ॥कृच्छ्रेणदूरतस्तस्यतत्रदृष्ट्वा
व्यवस्थितौ॥४७॥एतस्मिन्नंतरेक्रूरोभ्रातरौरामलक्ष्मणौ॥तावुवाचमहावाहुःकवंधोदानवोत्तमः॥४८॥कौयुवांवृषभस्कं
धौमहाखड्गधनुर्द्धरौ॥घोरंदेशमिमंप्राप्तौममभक्षावुपस्थितौ॥४९॥वदतंकार्यमिहवांकिमर्थंचागतावुभौ॥इमंदेशमनुप्राप्तौ
क्षुधार्त्तस्येहतिष्ठतः॥५०॥सचापवाणखड्गौचतीक्ष्णशृंगाविवर्षभौ॥ममास्यमनुसंप्राप्तौदुर्लभंजीवितंपुनः॥५१॥तस्यतद्वच
नंश्रुत्वाकवंधस्यमहात्मनः॥उवाचलक्ष्मणंरामोमुखेनपरिशुष्यता॥५२॥कृच्छ्रात्कृच्छ्रतरंप्राप्यदारुणंसत्यविक्रम॥व्यसनं
जीवितांतायप्राप्तमप्राप्यतांप्रियां॥५३॥कालस्यसुमहद्वीर्यंसर्वभूतेषुलक्ष्मण॥त्वांचमांचनरव्याघ्रव्यसनैःपश्यमोहितौ॥५४॥
नातिभारोतिदैवस्यसर्वभूतेषुलक्ष्मण॥शूराश्चबलवंतश्चकृतास्त्राश्चमहारणे॥कालाभिपन्नाःसीदंतियथावालुकसेतवः॥५५॥
इतिब्रुवाणोदृढसत्यविक्रमोमहायशादाशरथिःप्रतापवान॥अवेक्ष्यसौमित्रिमुदारविक्रमंस्थिरांतदास्वांमतिमात्मना
करोत॥५६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेएकोनसप्ततितमःसर्गः॥६९॥तौतुतत्रस्थितौदृष्ट्वाभ्रातरौरामलक्ष्म
णौ॥वाहुपाशपरिक्षिप्तौकवंधोवाक्यमब्रवीत॥१॥तिष्ठतःकिंतुमांदृष्ट्वाक्षुधार्त्तंक्षत्रियर्षभौ॥आहारार्थंतुसंदिष्टौदैवेनगत

चेतनो॥२॥तच्छ्रुत्वालक्ष्मणोवाक्यंप्राप्तकालंहितंतदा।उवाचार्त्तिसमापन्नोविक्रमेकृतलक्षणः॥३॥त्वांचमांचपुरातूर्णमादत्तेराक्ष
साधमः॥तस्मादसिभ्यामस्याशुवाहूछिंदावहेगुरू॥४॥भीषणोयंमहाकायोराक्षसोभुजविक्रमः।लोकंह्यतिजितंकृत्वाह्या
वांहंतुमिहेच्छति॥५॥निश्चेष्टानांवधोराजन्कुत्सितोजगतीपतेः।क्रतुमध्योपनीतानांपशूनामिवराघव॥६॥एतत्संजल्पितं
श्रुत्वातयोःक्रुद्धस्तुराक्षसः।विदार्यास्यंततोरौद्रंतौभक्षयितुमारभत्॥७॥ततस्तौदेशकालज्ञौखड्गाभ्यामेवराघवौ।अच्छिंदतां
सुसंहृष्टौवाहूतस्यांसदेशयोः॥८॥दक्षिणोदक्षिणंवाहुमसक्तमसिनाततः।चिच्छेदरामोवेगेनसव्यंवीरस्तुलक्ष्मणः॥९॥स
पपातमहावाहुःछिन्नवाहुर्महास्वनः।खंचरवांचदिशश्चैवनादयन्जलदोयथा॥१०॥सनिकृत्तौभुजौदृष्ट्वाशोणितौघपरि
प्लुतः।दीनःपप्रच्छतौवीरौकौयुवामितिदानवः॥११॥इतितस्यब्रुवाणस्यलक्ष्मणःशुभलक्षणः।शशंसतस्यकाकुत्स्थंकवंधस्य
महावलः॥१२॥अयमिक्ष्वाकुदायादोरामोनामजनैःश्रुतः।अस्यैवावरजंविद्धिभ्रातरंमांचलक्ष्मणं॥१३॥मात्राप्रतिहतेराज्ये
रामःप्रव्राजितोवनं।मयासहचरत्येषःभार्ययाचमहद्वनं॥१४॥अस्यदेवप्रभावस्यवसतोविजनेवने।रक्षसापहृताभार्या
यामिच्छंताविहागतौ॥१५॥त्वंतुकोवा किमर्थंवाकवंधसदृशोवने।आस्येनोरसिदीप्तेनभग्नजंघोविचेष्टसे॥१६॥एवमु
क्तःकवंधस्तुलक्ष्मणेनोत्तमंवचः।उवाचवचनंप्रीतस्तदिंद्रवचनंस्मरन्।स्वागतंवांनरव्याघ्रौदिष्ट्यापश्यामिचाप्यहं॥दि

स्याचेमौ निकृत्तौ मेयुवाभ्यां बाहू वंधनौ ॥ २८ ॥ विरूपं यत्त्वमे रूपं प्राप्तं तद्यविनया यथा । तन्मे शृणु नरव्याघ्र तत्वतः शंसतस्तव
॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे सप्ततितमः सर्गः ॥ ७० ॥ पुरा राम महाबाहो महाबलपराक्रम । रूपमासीन्म
माचिंत्यं त्रिषु लोकेषु विश्रुतं ॥ १ ॥ यथा सूर्यस्य सोमस्य शक्रस्य च यथा वपुः सोहं रूपमिदं कृत्वा लोकवित्रासनं महत् ॥ २ ॥
ऋषीन्वनगतान् राम त्रासयामि ततस्ततः । ततः स्थूलशिरा नाम महर्षिः कोपितो मया ॥ ३ ॥ स चिन्वन्विविधं वन्यं रूपेणानेन ध
र्षितः । तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ॥ ४ ॥ एतदेव नृशंसं ते रूपमस्तु विगर्हितं ॥ स मया याचितः क्रुद्धः शापस्यांतो
भवेदिति ॥ ५ ॥ अभिशापकृतस्येति तेनेदं भाषितं वचः ॥ ५ ॥ यदा छित्वा भुजौ रामस्त्वां दहेद्विजने वने । तदा त्वं प्राप्स्यसे रूपं स्व
मेव विपुलं शुभं ॥ ६ ॥ श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण ॥ इंद्रशापादिदं रूपं प्राप्तमेवं रणाजिरे ॥ ७ ॥ अहं हि तपसोग्रे
ण पितामहमतोषयं । दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोस्पृशत् ॥ ८ ॥ दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति ॥ इत्येवं
बुद्धिमास्थाय रणे शक्रमधर्षयं ॥ ९ ॥ तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा । सक्थ्नी च शिरश्चैव शरीरे संप्रवेशितौ ॥ १० ॥ स म
या याच्यमानः सन्नानयद्यमसादनं । पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् ॥ ११ ॥ अनाहारः कथं शक्तो भग्नसक्थिशि
रोमुखः ॥ वज्रिणाभिहतः कालं सुदीर्घमपि जीवितं ॥ १२ ॥ एवमुक्तस्तु मे शक्रो बाहू योजनमायतौ । प्रादादास्ये च मे कुक्षौ तीक्ष्ण

॥रा० आ०॥ क्षाद्दंडमकल्पयत्॥१३॥ सोहंभुजाभ्यांदीर्घाभ्यांसमाकृष्यवनेचरान्। सिंहान्द्वीपान्मृगव्याघ्रान्भक्षयामिसमंततः॥१४॥
॥७७॥ सतुमामब्रवीदिंद्रोयदारामःसलक्ष्मणः। छेत्स्यतेसमरेबाहूतदास्वर्गंगमिष्यसि॥१५॥ अनेनवपुषातातवनेस्मिन्राजसत्त
मः॥ यद्यत्पश्यामिसर्वस्यग्रहणंसाधुरोचये॥१६॥ अवश्यंग्रहणंरामोमन्येहंसमुपैष्यति॥ इमांबुद्धिंपुरस्कृत्यदेहंन्यासंकृत
श्रमः॥१७॥ सत्वंरामोसिभद्रंतेनाहमन्येनराघव॥ शक्योहंतुंयथातत्वमेतदुक्तंमहर्षिणा॥१८॥ अहंहिमतिसाचिव्यंकरि
ष्यामिनरर्षभ॥ मित्रंचैवोपदेक्ष्यामियुवाभ्यांसंस्कृतोग्निना॥१९॥ एवमुक्तस्तुधर्मात्मादनुनातेनराघवः। इदंजगादवचनं
लक्ष्मणस्योपशृण्वतः॥२०॥ रावणेनहृताभार्यासीतामममयशस्विनी॥ निष्क्रांतस्यजनस्थानात्सहभ्रात्रायथासुखं॥२१॥ ना
ममात्रंतुजानामिनरूपंतस्यरक्षसः॥ निवासंवाप्रभावंवावयंतस्यनविद्महे॥२२॥ शोकार्त्तानामनाथानामेवंविपरिधा
वतां॥ कारुण्यंसदृशंकर्तुमुपकारेणवर्त्ततां॥२३॥ काष्ठान्यानीयशुष्कानिकालेभग्नानिकुंजरैः॥ धक्ष्यामस्त्वांवयंवीरश्वभ्रे
महतिकल्पिते॥२४॥ सत्वंसीतांसमाचक्ष्वयेनवायत्रवाहृता॥ कुरुकल्याणमत्यर्थंयदिजानासितत्वतः॥२५॥ एवमुक्तस्तुरामे
णवाक्यंतेदनुरनुत्तमं॥ प्रोवाचकुशलंवक्तुंवक्तारमपिराघवं॥२६॥ दिव्यमस्तिनमेज्ञानंनाभिजानामिमैथिलीं॥ यस्तांज्ञास्यति ॥राम॥
तंवक्ष्येदग्धःस्वंरूपमास्थितः॥२७॥ योभिजानातितद्रक्षस्तद्वक्ष्येराममत्परं॥ अदग्धस्यतुविज्ञातुंशक्तिरस्तिनमेप्रभो॥२८॥ राक्षसंतु ॥७७॥

महावीर्य सीता येन हता तव ॥ विज्ञानं हि मम भ्रष्टं शापदोषेण राघव ॥ २९ ॥ स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितं ॥ किंतु यावन्न
यात्यस्तं सविता श्रांतवाहनः ॥ ३० ॥ तावन्मामवटे क्षिप्त्वा दह राम यथाविधि ॥ दग्धस्त्वयाऽहमवटे न्यायेन रघुनंदन ॥ ३१ ॥ वक्ष्यामि तं
महावीर यस्तं ज्ञास्यति राक्षसं ॥ तेन सख्यं च कर्तव्यं न्यायवृत्तेन राघव ॥ ३२ ॥ कल्पयिष्यति ते प्रीतः साहाय्यं लघुविक्रम ॥ न हि त
स्यास्त्यविज्ञातं त्रिषु लोकेषु राघव ॥ सर्वान्परिसृतो लोकान्पुरा वै कारणांतरे ॥ ३३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे ए
कसप्ततितमः सर्गः ॥ ७१ ॥ एवमुक्तौ तु तौ वीरौ कबंधेन नरेश्वरौ ॥ गिरिप्रदरमासाद्य पावकं विससर्जतुः ॥ १ ॥ लक्ष्मणस्तु महोल्काभि
र्ज्वलिताभिः समंततः ॥ चितामादीपयामास सा प्रजज्वाल सर्वतः ॥ २ ॥ तच्छरीरं कबंधस्य घृतपिंडोपमं महत् ॥ मेदसा पच्यमानस्य मं
दं दहति पावकः ॥ स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः ॥ अरजे वाससी बिभ्रन्मालां दिव्यां महाबलः ॥ ४ ॥ ततश्चितायाः वेगेन
भास्वरो विमलांबरः ॥ उत्पपाताशु संहृष्टः सर्वप्रत्यंगभूषणः ॥ ५ ॥ विमाने भास्करे तिष्ठन्हंसयुक्ते यशस्करे ॥ प्रभया च महातेजा
दिशो दश विराजयन् ॥ ६ ॥ सोंतरिक्षगतो वाक्यं कबंधो राममब्रवीत् ॥ शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि ॥ राम षड्युक्तयो
लोके याभिः सर्वं विमृश्यते ॥ परिमृष्टो दशांतेन दशाभागेन सेव्यते ॥ ८ ॥ दशाभागगतो हीनस्त्वं राम सह लक्ष्मणः ॥ यत्कृते व्यसनं प्राप्तं
त्वया दारप्रधर्षणं ॥ ९ ॥ तदवश्यं त्वया कार्यं स सुहृत्सुहृदां वर ॥ अकृत्वा न हि ते सिद्धिमहं पश्यामि चिंतयन् ॥ १० ॥ श्रूयतां राम वक्ष्या

॥रा०आ०॥ मिसुग्रीवो नामवानरः।भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना॥११॥ऋष्यमूके गिरिवरे पंपापर्यंतशोभिते॥निवसत्यात्मवान्वी
॥७८॥ रश्चतुर्भिः सह वानरैः॥१२॥वानरेंद्रो महावीर्यस्तेजोवानमितप्रभः॥सत्यसंधो विनीतश्च धृतिमान्मतिमान्महान्॥१३॥दक्षः प्रगल्भो द्यु
तिमान्महावलपराक्रमः।भ्रात्रा विवासितो वीर राज्यहेतोर्महावलः॥१४॥स ते सहायो मित्रं च सीतायाः परिमार्गणे॥भविष्यति हि ते
राममा च शोके मनः कृथाः॥१५॥भवितव्यं हि यच्चापि न तच्छक्यमिहान्यथा॥कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः॥१६॥गच्छ शी
घ्रमितो वीर सुग्रीवं तं महावलं।वयस्यं तं कुरु क्षिप्रमितो गत्वाद्य राघव॥१७॥अग्नौ हायसमागम्य दीप्यमाने विभावसौ॥न च ते सो
वमंतव्यः सुग्रीवो वानराधिपः॥१८॥कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान्॥शक्तो ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितं॥१९
कृतार्थो वाकृतार्थो वा कृत्यं तव करिष्यति॥स ऋक्षरजसः पुत्रः पंपामटति शंकितः॥२०॥भास्करस्यौरसः पुत्रो वालिना कृतकिल्वि
षः।सन्निधायायुधं क्षिप्रमृष्यमूकालयं कपिं॥कुरु राघव सत्येन वयस्यं वनचारिणं॥स हि स्थानानि सर्वाणि कार्त्स्न्येन कपिपुंगवः
२२।नरमांसाशिनां लोके नैपुण्यमधिगच्छति॥न तस्याविदितं लोके किंचिदस्ति हि राघव॥२३॥यावत्सूर्यः प्रतपति सहस्रांशुररिंदम
सनदीर्विपुलान् शैलान् गिरिदुर्गाणि कंदरान्॥२४॥अन्वीय वानरैः सार्द्धं पत्नीं तेधिगमिष्यति॥वानरांश्च महाभागान्प्रेषयिष्यति रा ॥राम॥
घव॥२५॥दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीं॥गमिष्यंति वरारोहां निर्मलां रावणालये॥२६॥स मेरुशृंगाग्रगतामनिंदितां प्र ॥७८॥

विश्यपातालतलेपि वाश्रितां ॥ प्लवंगमानामृषभस्तव प्रियां निहत्य रक्षांसि पुनः प्रदास्यति ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकी
ये आरण्यकांडे द्विसप्ततितमः सर्गः ॥ ७२ ॥ निदर्शयित्वा रामाय सीतायाः प्रतिपादने ॥ वाक्यमन्वर्थमर्थज्ञः कवंधः पुनरब्रवीत्
१ ॥ एष राम गिरेः पंथा यत्रैते पुष्पिता द्रुमाः ॥ प्रतीचीं दिशमाश्रित्य प्रकाशंते मनोरमाः ॥ २ ॥ जंबूप्रियालपनसाः न्यग्रोधप्लक्षतिंदु-
काः ॥ अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः ॥ ३ ॥ धन्वना नागवृक्षाश्च तिलका नक्तमालिकाः ॥ नीलाशोकाः कदंबा
श्च करवीराश्च पुष्पिताः ॥ ४ ॥ अग्निमुख्या अशोकाश्च सुरक्ताः पारिभद्रकाः ॥ तानारुह्याथ वा भूमौ पातयित्वा च तान् बलात्
५ ॥ फलान्यमृतकल्पानि भक्षयंतौ गमिष्यथः ॥ तदतिक्रम्य काकुत्स्थ वनं पुष्पितपादपं ॥ ६ ॥ नंदनप्रतिमं चान्यत्कुरवो ह्युत्तरा इ-
व ॥ सर्वकालफला यत्र पादपास्तु मधुस्रवाः ॥ ७ ॥ सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा ॥ फलभारानताश्चैव महाविटपधारिणः ॥ ८ ॥ रा
शोभंते तरवस्तत्र महापर्वतसन्निभाः ॥ तानारुह्याथ भूमौ पातयित्वा यथासुखं ॥ ९ ॥ फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्-
ति ॥ चक्रमंतौ वरान्देशाञ्छैलं वनाद्वनं ॥ १० ॥ ततः पुष्करिणीं वीरौ पंपां नाम गमिष्यथः ॥ अशर्करामविभ्रंशां समतीर्थामशैव-
लां ॥ ११ ॥ रामसंजातवालूकां कमलोत्पलशोभितां ॥ तत्र हंसाः प्लवाः क्रौंचाः कुरराश्चैव राघव ॥ १२ ॥ वल्गुस्वना निकूजंति पंपासलि-
लगोचराः ॥ नोद्विजंते नरान्दृष्ट्वा वधस्याकोविदाः शुभाः ॥ घृतपिंडोपमान्स्थूलांस्तान्द्विजान्भक्षयिष्यथः ॥ रोहितान्वक्रतुंडां ॥

श्चनलमीनांश्चराघव।।१४।।पंपायामिषुभिर्मत्स्यान्हत्वाचादायनित्यशः।निस्त्वक्पक्षानयस्तप्तानंकुशानेककंटकान्।।१५
तवभक्त्यासमायुक्तोलक्ष्मणःसंप्रदास्यति।भृशंतेखादतोमत्स्यान्पंपायांपुष्पसंचये।।१६।।पद्मगंधिशिवंवारिस्वादुशीतम
नामयं।।उद्धृत्यसितमक्लिष्टंरूप्यस्फटिकसन्निभं।।१७।।अथपुष्करपर्णेनलक्ष्मणःपाययिष्यति।।स्थूलान्गिरिगुहाशय्यान्व
राहान्वनचारिणः।।१८।।अपांलोभादुपावृत्तान्वृषभानिवनर्दतः।रूपान्वितांश्चपंपायांद्रक्ष्यासित्वंनरोत्तम।।१९।।सायान्हेवि
चरन्रामविटपान्माल्यधारिणः।शीतोदकंचपंपायांदृष्ट्वाशोकंविहास्यसि।।२०।।सुमनोभिश्चितांस्तत्रतिलकान्नक्तमालि
कान्।।उत्पलानिचफुल्लानिपंकजानिचराघव।।२१।।नतानिकश्चिन्माल्यानितत्ररोपयितानरः।।नचवैम्लानतांयांतिनचशीर्यंति
राघव।।२२।।मतंगशिष्यास्तत्रासन्नृषयःसुसमाहिताः।तेषांभारातितप्तानांवन्यमाहरतांगुरोः।।२३।।येप्रपेतुर्महींतूर्णंशरीरात्
स्वेदबिंदवः।।तानिमाल्यानिजातानिमुनीनांतपसातदा।।२४।।स्वेदबिंदुसमुत्थानिनविनश्यंतिराघव।।तेषामद्यापितत्रैवदृश्य
तेपरिचारिणी।।२५।।श्रमणीशबरीनामकाकुत्स्थचिरजीविनी।त्वांतुधर्मेस्थितानित्यंसर्वभूतनमस्कृतं।।२६।।दृष्ट्वादेवोप
मंरामस्वर्गलोकंगमिष्यति।।ततस्तद्रामपंपायास्तीरमाश्रित्यपश्चिमं।।२७।।आश्रमस्थानमतुलंगुह्यंकाकुत्स्थपश्यसि।।न
तत्राक्रमितुंनागाःशक्नुवंतितदाश्रमं।।२८।।विविधास्तत्रवैनागावनेतस्मिंश्चपर्वते।ऋषेस्तस्यमतंगस्यविधानात्तच्चकाननं

२९ ॥ तस्मिन्नंदनसंकाशे देवारण्योपमे वने । नानाविहगसंकीर्णे रंस्यसे राम निर्वृतः ॥ ३० ॥ ऋष्यमूकस्तु पंपायाः पुरस्तात्पुष्पितद्रुमः
सुदुःखारोहणं नाम शिशुनागाभिरक्षितः ॥ ३१ ॥ महात्मभिर्महाकायैर्वृतो मंत्रै द्विजातिभिः । उदारो ब्रह्मणा चैव पूर्वकाले विनिर्मि
तः ॥ ३२ ॥ शयानः पुरुषो राम तस्य शैलस्य मूर्द्धनि । यत्स्वप्ने लभते वित्तं तत्प्रवुद्धोधिगच्छति ॥ ३३ ॥ न त्वेनं विषमाचारः पापकर्माधि
रोहति । नत्रैव प्रहरंत्येनं सुप्तमादाय राक्षसाः ॥ ३४ ॥ ततोपि शिशुनागानामाक्रंदः श्रूयते महान् । क्रीडतां राम पंपायां मतंगारण्य
वासिनां ॥ ३५ ॥ सिक्ता रुधिरधाराभिः संहृत्य परमद्विपाः । प्रचरंति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ ३६ ॥ ते तत्र पीत्वा पानीयं विमलं
शीतलं सुखं । निर्वृताः संविगाहंते वनानि वनगोचराः ॥ ३७ ॥ ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् । रुरूनपेतानजयान् दृ
ष्ट्वा शोकं जहिष्यसि ॥ ३८ ॥ राम तस्य तु शैलस्य महती शोभते गुहा । शिलापिधाना काकुत्स्थ दुःखं तस्याः प्रवेशने ॥ ३९ ॥ तस्या गुहायाः
प्राग्भागे महांछीतोदको ह्रदः ॥ वहुमुलफलो रम्यो नानानगसमावृतः ॥ ४० ॥ तस्यां वसति सुग्रीवश्चतुर्भिः सह वानरैः । कदाचिच्छि
खरे तस्य पर्वतस्यावतिष्ठते ॥ ४१ ॥ कवंधस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ । स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान् ॥ ४२
तं तु खस्थं महाभागं कवंधं रामलक्ष्मणौ । प्रस्थितस्त्वं व्रजस्वेति वाक्यमूचतुरंतिकात् ॥ ४३ ॥ गम्यतां कार्यसिद्धार्थमिति तावब्र
वीच ॥ सुप्रीतौ तावनुज्ञाप्य कवंधः प्रस्थितस्तदा ॥ ४४ ॥ स तत्कवंधः प्रतिपद्य रूपं वृतः श्रिया भास्करसर्वदेहः । निदर्शयन्राममवेक्ष्य ख

रवस्यःसख्यंकुरुष्वेतितदाप्रभुवाच॥४५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेत्रिसप्ततितमःसर्गः॥७३॥तौकवंधेनतंमार्गंपं
पायादर्शितंवने॥आतस्थतुर्दिशंगृह्यप्रतीचींनृवरात्मजौ॥१॥तौशैलेष्वाचितानेकान्क्षौद्रकल्पफलान्द्रुमान्॥वीक्षंतौजग्मतुर्द्र
ष्टुंसुग्रीवंरामलक्ष्मणौ॥२॥कृत्वाचशैलपृष्ठेतुतौवासंरघुनंदनौ॥पंपायाःपश्चिमंतीरमुपतस्थतुराघवौ॥३॥तौपुष्करण्याःपंपा
यास्तीरमासाद्यपश्चिमं॥अपश्यतांततस्तत्रशबर्यारम्यमाश्रमं॥४॥तौतमाश्रममासाद्यद्रुमैर्बहुभिरावृतं॥सुरम्यमभिवीक्षं
तौशबरीमभ्युपेयतुः॥५॥तौदृष्ट्वातुतदासिद्धासमुत्थायकृतांजलिः॥रामस्यपादौजग्राहलक्ष्मणस्यचधीमतः॥६॥पाद्यमाचम
नीयंतुसर्वंप्रादाद्यथाविधि॥तमुवाचततोरामःश्रमणींसंशितव्रतां॥७॥कच्चित्तेनिर्जिताविघ्नाःकच्चित्तेवर्द्धतेतपः॥कच्चित्ते
नियतःकोपःआहारश्चतपोधने॥८॥कच्चित्तेनियमाःप्राप्ताःकच्चित्तेमनसःसुखं॥कच्चित्तेगुरुशुश्रूषासफलाचारुभाषिणि॥९॥
रामेणतापसीपृष्टासासिद्धासिद्धसंमता॥शशंसशबरीवृद्धारामायप्रत्यवस्थिता॥१०॥अद्यप्राप्तातपःसिद्धिस्तवसंदर्शनान्म
या॥अद्यमेसफलंजन्मगुरवश्चसुपूजिताः॥११॥अद्यमेसफलंतप्तंस्वर्गश्चैवभविष्यति॥त्वयिदेववरेरामपूजितेपुरुषर्षभ॥
१२॥तवाहंचक्षुषारामपूतासौम्येनमानद॥गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिंदम॥१३॥चित्रकूटंत्वयिप्राप्तेविमानैरतुल
प्रभैः॥इतस्तेदिवमारूढायानहंपर्य्यचारिषं॥१४॥तैश्चाहमुक्ताधर्मज्ञैर्महाभागैर्महर्षिभिः॥आगमिष्यतितेरामःसुपुण्यमिममा

श्रमं॥१५॥मनेप्रतिगृहीतश्चःसौमित्रिसहितोतिथिः।तंचदृष्ट्वावरान्लोकानक्षयांस्त्वंगमिष्यसि॥१६॥एवमुक्तामहाभागेस्त
दाहंपुरुषर्षभ।मयातुसंचितंवन्यंविविधंपुरुषर्षभ॥१७॥तवार्थेपुरुषव्याघ्रपंपायास्तीरसंभवं॥एवमुक्तःसधर्मात्माशवर्य्याश
वरीमिदं।१८।राघवःप्राहविज्ञानेतांनित्यमवहिष्कृतां॥दनोःसकाशात्तत्वेनप्रभावंतेमहात्मनां॥१९॥श्रुतंप्रत्यक्षमिच्छामिसंद्रष्टुंय
दिमन्यसे।एतत्तुवचनंश्रुत्वारामवक्राद्विनिःसृतं॥२०॥शवरीदर्शयामासतावुभौतद्वनंमहत्॥पश्यमेघघनप्रख्यंमृगपक्षि
समाकुलं॥२१॥मतंगवनमित्येवविश्रुतंरघुनंदन।इहतेभावितात्मानोगुरवोमेमहाद्युते॥२२॥जुहावांचक्रिरेतीर्थंमंत्रवन्मं
त्रपूजितं।इयंप्रत्यक्स्थलीवेदीयत्रतेमेसुसत्कृताः॥२३॥पुष्पोपहारंकुर्वंतिश्रमादुद्वेजिभिःकरैः।तेषांतपःप्रभावेनपश्या
द्यापिरघूत्तम॥२४॥द्योतयंतिदिशःसर्वाःश्रियावेद्यतुलप्रभा॥अशक्नुवद्भिस्तैर्गंतुमुपवासश्रमालसैः॥२५॥चिंतितेनागतान्स
त्तसहितान्पश्यसागरान्॥कृताभिषेकैस्तैर्न्यस्तावल्कलाःपादपेष्विह॥२६॥अद्यापिनविशुष्यंतिप्रदेशेरघुनंदन।देवकार्याणि
कुर्वद्भिर्यानीमानिकृतानिवै॥२७॥पुष्पैःकुवलयैःसार्द्धमम्लानत्वंनयंतिवै॥कृत्स्नंवनमिदंदृष्टंश्रोतव्यंचश्रुतंत्वया॥२८॥तदिच्छा
म्यभ्यनुज्ञातात्यक्तुमेतत्कलेवरं।तेषामिच्छाम्यहंगंतुंसमीपंभावितात्मनां॥२९॥मुनीनामाश्रमोयेषामहंचपरिचारिणी॥धर्मिष्ठा
यावचःश्रुत्वाराघवःसहलक्ष्मणः॥३०॥प्रहर्षमतुलंलेभेत्याश्चर्यमितितत्वतः।तामुवाचततोरामःश्रमणींसंशितव्रतां॥३१॥अर्चि

॥रा०आ०॥ तोहंत्वयाभद्रेगच्छकामंयथासुखं॥इत्युक्ताजटिलावृद्धाचीरकृष्णाजिनांबरा॥३२॥तस्मिन्मुहूर्तेशबरीदेहंजीर्णंविहायतत्॥अ
॥८१॥ नुज्ञातातुरामेणहुत्वात्मानंहुताशने॥३३॥ज्वलत्पावकसंकाशास्वर्गमेवजगामसा॥दिव्याभरणसंयुक्तादिव्यमाल्यानुलेपना॥
॥३४॥दिव्यांबरधरातत्रबभूवप्रियदर्शना॥विराजयंतीतंदेशंविद्युत्सौदामिनीयथा॥३५॥प्रणम्यशिरसारामंस्वर्गंगताशुभभा॥
नना॥यत्रतेसुकृतात्मानोविहरंतिमहर्षयः॥तत्पुण्यंशबरीस्थानंजगामात्मसमाधिना॥३६॥इत्यार्षेश्रीरामायणेवाल्मी
कीयेआरण्यकांडेचतुःसप्ततितमःसर्गः॥७४॥दिवंतुतस्यांयातायांशबर्यांस्वेनतेजसा॥लक्ष्मणेनसहभ्रात्राचिंतयामासरा
ला घवः॥१॥चिंतयित्वातुधर्मात्माप्रभावंतंमहात्मनां॥हितकारिणमेकाग्रंलक्ष्मणंराघवोब्रवीत्॥२॥दृष्टोमयाश्रमःसौम्यबह्वाश्च
र्यकृतात्मना॥विश्वस्तमृगशार्दूलोनानाविहगशोभितः॥३॥सप्तानांचसमुद्राणांयेषुतीर्थेषुलक्ष्मण॥उपस्पृष्टंचविधिवत्पितर
श्चापितर्पिताः॥४॥प्रनष्टमशुभंयत्तत्कल्याणंसमुपस्थितं॥तेनत्वेतत्प्रहृष्टंमेमनोलक्ष्मणसंप्रति॥५॥निश्चितंहिनरव्याघ्रशु
भमाशुभविष्यति॥तदागच्छगमिष्यावःपंपांतांप्रियदर्शनां॥६॥ऋष्यमूकोगिरिर्यत्रनातिदूरंप्रकाशते॥यस्मिन्वसतिधर्मा
त्मासुग्रीवोंशुमतःसुतः॥७॥नित्यंवालिभयत्रस्तश्चतुर्भिःसहवानरैः॥अभित्वरयतंद्रष्टुंसुग्रीवंवानरर्षभं॥८॥तदधीनंहिमेसौ राम॥
म्यसीतायाःपरिमार्गणं॥इतिब्रुवाणंकाकुत्स्थंसौमित्रिरिदमब्रवीत्॥९॥गच्छावस्त्वरितंतत्रममापित्वरतेमनः॥आश्रमात्तुत ॥८१॥

तस्तस्मान्निष्क्रम्य स विशां पतिः॥२०॥ आजगाम ततस्तस्माल्लक्ष्मणेन सह प्रभुः समीक्षमाणो पुष्पाढ्यं सर्वतो विपुलद्रुमं॥२१॥
कोयष्टिकैश्चार्ज्जुनकैः शतपत्रैश्च कीरकैः एतैश्चान्यैश्च विविधैर्नादितं तद्वनं महत्॥२२॥ समाजग्मतुरव्यग्रौ राघवौ सुसम
हितौ॥ स रामो विविधान्वृक्षान्सरांसि विविधानि च॥२३॥ पश्यन्कामाभिसंतप्तो जगाम परमं ह्रदं॥ स तां विलोकयन्रामो दूरा
दुदकवाहिनीं॥२४॥ मतंगसरसं नाम ह्रदं समवगाहत॥ स तु शोकसमाविष्टो रामो दशरथात्मजः॥२५॥ विवेश नलिनीं संपो
पंकजैश्च समावृतां॥ तिलकाशोकपुन्नागवकुलोद्दालकाशिनीं॥२६॥ रम्योपवनसंबाधां पद्मसंपीडितोदकां॥ स्फटिकोपम
तोयां तां श्लक्ष्णवालुकसंततां॥२७॥ मत्स्यकच्छपसंबाधां तीरस्थद्रुमशोभितां॥ सखीभिरिव संयुक्तां लताभिरनुवेष्टितां॥२८
किन्नरोरगगंधर्वयक्षराक्षससेवितां॥ स ददर्श ततः पंपामुदारजनसेवितां॥२९॥ नानाद्रुमलताकीर्णां पंपां पानीयवाहिनीं
पद्मैः सौगंधिकैस्ताम्रां शुक्लां कुमुदमंडलैः॥३०॥ नीलां कुवलयैर्जातैर्बहुवर्णां कुथामिव॥ अरविंदोत्पलवतीं पद्मसौगंधिका
युतां॥३१॥ पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादितां॥ स तां दृष्ट्वा च वै पंपां रामः सौमित्रिणा सह॥३२॥ विललाप स तेजस्वी कामा
द्दशरथात्मजः॥ तिलकैर्बीजपूरैश्च वटैः शुक्लद्रुमैस्तथा॥३३॥ पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः मालतीकुंदगुल्मैश्च भां
डीरैर्निचुलैस्तथा॥३४॥ अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः अन्यैश्च विविधैर्वृक्षैः प्रमदामिव भूषितां॥३५॥ स ददर्श ततः पंपां

शीतवारिनिधिं शुभां॥ प्रहृष्टनानाशकुनां पादपैरुपशोभितां॥२६॥ पुष्पितोपवनोपेतां सालचंपकशोभितां॥ षट्पदौघसमा-
विष्टां श्रीमतीमतुलप्रभां॥२७॥ सतामासाद्य पंपां च विषसाद महामनाः॥ अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमंडितः॥२८॥ ऋष्य-
मूक इति ख्यातः पुण्यः पुष्पितकाननः॥ हरेरृक्षरजा नाम पुत्रस्तस्य महात्मनः॥२९॥ अध्यास्ते तं महावीर्यः सुग्रीव इति
विश्रुतः॥ सुग्रीवमभिगच्छ त्वं वानरेंद्रं नरर्षभ॥३०॥ इत्युक्त्वा च पुनर्वाक्यं लक्ष्मणं सत्यविक्रमं॥ राज्यभ्रष्टेन दीनेन। तस्यामा-
सक्तचेतसा॥३१॥ कथं मया विना सीतां शक्यं लक्ष्मण जीवितुं॥३२॥ इत्येवमुक्त्वा मदनाभिपीडितः स लक्ष्मणं वाक्यमदीन-
सत्वः॥ विवेश पंपां नलिनीं मनोरमां रघूत्तमः शोकविषादयंत्रितः॥३३॥ ततो महद्वर्त्म च दूरसंक्रमं क्रमेण गत्वा सविलोक-
यन्वनं॥ ददर्श पंपां शुभदर्शकाननामनेकनानाविधपक्षिसंकुलां॥३४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आरण्यकांडे पं-
पादर्शनं नाम पंचसप्ततितमः सर्गः॥७५॥।

